# Shri Shiva Mahapuranam 5 Uma Samhita

# શ્રીશિવમહાપુરાણમ્ પ ઉમાસંહિતા

## Document Information

Text title : shivapurANam 5 umAsaMhitA

File name : shivapurANam5umAsaMhitA.itx

Category : shiva, purANa, shivapurANa

Location : doc_purana

Proofread by : Revathy Rajaraman and team members Malati Shekar, Latha Murali, Meenakshi Premanand, Jayalakshmi, Gayathri, Uma Mahesh, Sripriya, Sornavalli

Latest update : January 23, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2026

*sanskritdocuments.org*

# શ્રીશિવમહાપુરાણમ્ ૫ ઉમાસંહિતા

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥ પઞ્ચમી ઉમાસંહિતા

## ૫.૧. પ્રથમોઽધ્યાયઃ । ઋષ્ણોપમન્યુસંવાદે સ્વગતિવર્ણનમ્ ।

યો ધત્તે ભુવનાનિ સત્ત્વગુણવાન્સ્રષ્ટા રજઃસંશ્રયઃ
સંહર્ત્તા તમસાન્વિતો ગુણવતીં માયામતીત્ય સ્થિતઃ ।
સત્યાનન્દમનન્તબોધમમલં બ્રહ્માદિસંજ્ઞાસ્પદં
નિત્યં સત્ત્વસમન્વયાદધિગતં પૂર્ણં શિવં ધીમહિ ॥ ૧॥

ઋષય ઊચુઃ ।
સૂત સૂત મહાપ્રાજ્ઞ વ્યાસશિષ્ય નમોઽસ્તુ તે ।
ચતુર્થી કોટિરુદ્રાખ્યા શ્રાવિતા સંહિતા ત્વયા ॥ ૨॥

અથોમાસંહિતાન્તઃસ્થનાનાખ્યાનસમન્વિતમ્ ।
બ્રૂહિ શમ્ભોશ્ચરિત્રં વૈ સામ્બસ્ય પરમાત્મનઃ ॥ ૩॥

સૂત ઉવાચ ।
મહર્ષયઃ શૌનકાદ્યાઃ શ‍ૃણુત પ્રેમતઃ શુભમ્ ।
શાઙ્કરં ચરિતં દિવ્યં ભુક્તિમુક્તિપ્રદં પરમ્ ॥ ૪॥

ઇતીદૃશં પુણ્યપ્રશ્નં પૃષ્ટવાન્ મુનિસત્તમઃ ।
વ્યાસઃ સનત્કુમારં વૈ શૈવં સચ્ચરિતં જગૌ ॥ ૫॥

સનત્કુમાર ઉવાચ ।
વાસુદેવાય યત્પ્રોક્તમુપમન્યુમહર્ષિણા ।
તદુચ્યતે મયા વ્યાસ ચરિતં હિ મહેશિતુઃ ॥ ૬॥

પુરા પુત્રાર્થમગમત્કૈલાસં શઙ્કરાલયમ્ ।

વસુદેવસુતઃ કૃષ્ણસ્તપસ્તપ્તું શિવસ્ય હિ ॥ ૭॥

અત્રોપમન્યું સન્દૃષ્ટ્વા તપન્તં શ‍ૃઙ્ગ ઉત્તમે ।
પ્રણમ્ય ભક્ત્યા સ મુનિં પર્યપૃચ્છત્કૃતાઞ્જલિઃ ॥ ૮॥

શ્રીકૃષ્ણ ઉવાચ ।
ઉપમન્યો મહાપ્રાજ્ઞ શૈવપ્રવર સન્મતે ।
પુત્રાર્થમગમં તપ્તું તપોઽત્ર ગિરિશસ્ય હિ ॥ ૯॥

બ્રૂહિ શઙ્કરમાહાત્મ્યં સદાનન્દકરં મુને ।
યચ્છ્રુત્વા ભક્તિતઃ કુર્યાં તપ ઐશ્વરમુત્તમમ્ ॥ ૧૦॥

સનત્કુમાર ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય વાસુદેવસ્ય ધીમતઃ ।
પ્રત્યુવાચ પ્રસન્નાત્મા હ્યુપમન્યુઃ સ્મરન્ શિવમ્ ॥ ૧૧॥

ઉપમન્યુરુવાચ ।
શ‍ૃણુ કૃષ્ણ મહાશૈવ મહિમાનં મહેશિતુઃ ।
યમદ્રાક્ષમહં શમ્ભોર્ભક્તિવર્ધનમુત્તમમ્ ॥ ૧૨॥

તપઃસ્થોઽહં સમદ્રાક્ષં શઙ્કરં ચ તદાયુધાન્ ।
પરિવારં સમસ્તં ચ વિષ્ણ્વાદીનમરાદિકાન્ ॥ ૧૩॥

ત્રિભિરંશૈઃ શોભમાનમજસ્રસુખમવ્યયમ્ ।
એકપાદં મહાદંષ્ટ્રં સજ્વાલકવલૈર્મુખૈઃ ॥ ૧૪॥

દ્વિસહસ્રમયૂખાનાં જ્યોતિષાતિવિરાજિતમ્ ।
સર્વાસ્ત્રપ્રવરાબાધમનેકાક્ષં સહસ્રપાત્ ॥ ૧૫॥

યશ્ચ કલ્પાન્તસમયે વિશ્વં સંહરતિ ધ્રુવમ્ ।
નાવધ્યો યસ્ય ચ ભવેત્ત્રૈલૌક્યે સચરાચરે ॥ ૧૬॥

મહેશ્વરભુજોત્સૃષ્ટં ત્રૈલોક્યં સચરાચરમ્ ।
નિર્દદાહ દ્રુતં કૃત્સ્નં નિમેષાર્દ્ધાન્ન સંશયઃ ॥ ૧૭॥

તપઃસ્થો રુદ્રપાર્શ્વસ્થં દૃષ્ટવાનહમવ્યયમ્ ।
ગુહ્યમસ્ત્રં પરં ચાસ્ય ન તુલ્યમધિકં ક્વચિત્ ॥ ૧૮॥

યત્તચ્છૂલમિતિ ખ્યાતં સર્વલોકેષુ શૂલિનઃ ।
વિજયાભિધમત્યુગ્રં સર્વશસ્ત્રાસ્ત્રનાશકમ્ ॥ ૧૯॥

દારયેદ્યન્મહીં કૃત્સ્નાં શોષયેદ્યન્મહોદધિમ્ ।
પાતયેદખિલં જ્યોતિશ્ચક્રં યન્નાત્ર સંશયઃ ॥ ૨૦॥

યૌવનાશ્વો હતો યેન માન્ધાતા સબલઃ પુરા ।
ચક્રવર્તી મહાતેજાસ્ત્રૈલોક્યવિજયો નૃપઃ ॥ ૨૧॥

દર્પાવિષ્ટો હૈહયશ્ચ નિઃક્ષિપ્તો લવણાસુરઃ ।
શત્રુઘ્નં નૃપતિં યુદ્ધે સમાહૂય સમન્તતઃ ॥ ૨૨॥

તસ્મિન્દૈત્યે વિનષ્ટે તુ રુદ્રહસ્તે ગતં તુ યત્ ।
તચ્છૂલમિતિ તીક્ષ્ણાગ્રં સન્ત્રાસજનનં મહત્ ॥ ૨૩॥

ત્રિશિખાં ભ્રૂકુટીં કૃત્વા તર્જયન્તમિવ સ્થિતમ્ ।
વિધૂમ્રાનલસઙ્કાશં બાલસૂર્યમિવોદિતમ્ ॥ ૨૪॥

સર્પહસ્તમનિર્દેશ્યં પાશહસ્તમિવાન્તકમ્ ।
પરશું તીક્ષ્ણધારં ચ સર્પાદ્યૈશ્ચ વિભૂષિતમ્ ॥ ૨૫॥

કલ્પાન્તદહનાકારં તથા પુરુષવિગ્રહમ્ ।
યત્તદ્ભાર્ગવરામસ્ય ક્ષત્રિયાન્તકરં રણે ॥ ૨૬॥

રામો યદ્બલમાશ્રિત્ય શિવદત્તશ્ચ વૈ પુરા ।
ત્રિઃસપ્તકૃત્વો સ ક્ષત્રં દદાહ હૃષિતો મુનિઃ ॥ ૨૭॥

સુદર્શનં તથા ચક્રં સહસ્રવદનં વિભુમ્ ।
દ્વિસહસ્રભુજં દેવમદ્રાક્ષં પુરુષાકૃતિમ્ ॥ ૨૮॥

દ્વિસહસ્રેક્ષણં દીપ્તં સહસ્રચરણાકુલમ્ ।
કોટિસૂર્યપ્રતીકાશં ત્રૈલોક્યદહનક્ષમમ્ ॥ ૨૯॥

વજ્રં મહોજ્જ્વલં તીક્ષ્ણં શતપર્વમનુત્તમમ્ ।
મહાધનુઃ પિનાકં ચ સતૂણીરં મહાદ્યુતિમ્ ॥ ૩૦॥

શક્તિં ખઙ્ગં ચ પાશં ચ મહાદીપ્તં સમાઙ્કુશમ્ ।
ગદાં ચ મહતીં દિવ્યામન્યાન્યસ્ત્રાણિ દૃષ્ટવાન્ ॥ ૩૧॥

તથા ચ લોકપાલાનામસ્ત્રાણ્યેતાનિ યાનિ ચ ।
અદ્રાક્ષં તાનિ સર્વાણિ ભગવદ્રુદ્રપાર્શ્વતઃ ॥ ૩૨॥

સવ્યદેશે તુ દેવસ્ય બ્રહ્મા લોકપિતામહઃ ।
વિમાનં દિવ્યમાસ્થાય હંસયુક્તં મનોઽનુગમ્ ॥ ૩૩॥

વામપાર્શ્વે તુ તસ્યૈવ શઙ્ખચક્રગદાધરઃ ।
વૈનતેયં સમાસ્થાય તથા નારાયણઃ સ્થિતઃ ॥ ૩૪॥

સ્વાયમ્ભુવાદ્યા મનવો ભૃગ્વાદ્યા ઋષયસ્તથા ।
શક્રાદ્યા દેવતાશ્ચૈવ સર્વ એવ સમં યયુઃ ॥ ૩૫॥

સ્કન્દઃ શક્તિં સમાદાય મયૂરસ્થઃ સઘણ્ટકઃ ।
દેવ્યાઃ સમીપે સન્તસ્થૌ દ્વિતીય ઇવ પાવકઃ ॥ ૩૬॥

નન્દી શૂલં સમાદાય ભવાગ્રે સમવસ્થિતઃ ।
સર્વભૂતગણાશ્ચૈવ માતરો વિવિધાઃ સ્થિતાઃ ॥ ૩૭॥

તેઽભિવાદ્ય મહેશાનં પરિવાર્ય સમન્તતઃ ।
અસ્તુવન્વિવિધૈઃ સ્તોત્રૈર્મહાદેવં તદા સુરાઃ ॥ ૩૮॥

યત્કિઞ્ચિત્તુ જગત્યસ્મિન્દૃશ્યતે શ્રૂયતેઽથવા ।
તત્સર્વં ભગવત્પાર્શ્વે નિરીક્ષ્યાહં સુવિસ્મિતઃ ॥ ૩૯॥

સુમહદ્ધૈર્યમાલમ્બ્ય પ્રાઞ્જલિર્વિવિધૈઃ સ્તવૈઃ ।
પરમાનન્દસમ્મગ્નોઽભૂવં કૃષ્ણાહમધ્વરે ॥ ૪૦॥

સમ્મુખે શઙ્કરં દૃષ્ટ્વા બાષ્પગદ્ગદયા ગિરા ।
અપૂજયં સુવિધિવદહં શ્રદ્ધાસમન્વિતઃ ॥ ૪૧॥

ભગવાનથ સુપ્રીતઃ શઙ્કરઃ પરમેશ્વરઃ ।
વાણ્યા મધુરયા પ્રીત્યા મામાહ પ્રહસન્નિવ ॥ ૪૨॥

ન વિચાલયિતું શક્યો મયા વિપ્ર પુનઃ પુનઃ ।
પરીક્ષિતોઽસિ ભદ્રં તે ભવાન્ભક્ત્યાન્વિતો દૃઢઃ ॥ ૪૩॥

તસ્માત્તે પરિતુષ્ટોઽસ્મિ વરં વરય સુવ્રત ।
દુર્લભં સર્વદેવેષુ નાદેયં વિદ્યતે તવ ॥ ૪૪॥

સ ચાહં તદ્વચઃ શ્રુત્વા શમ્ભોઃ સત્પ્રેમસંયુતમ્ ।
દેવં તં પ્રાઞ્જલિર્ભૂત્વાબ્રુવં ભક્તાનુકમ્પિનમ્ ॥ ૪૫॥

ઉપમન્યુરુવાચ ।
ભગવન્યદિ તુષ્ટોઽસિ યદિ ભક્તિઃ સ્થિરા મયિ ।
તેન સત્યેન મે જ્ઞાનં ત્રિકાલવિષયં ભવેત્ ॥ ૪૬॥

પ્રયચ્છ ભક્તિં વિપુલાં ત્વયિ ચાવ્યભિચારિણીમ્ ।
સાન્વયસ્યાપિ નિત્યં મે ભૂરિ ક્ષીરૌદનં ભવેત્ ॥ ૪૭॥

મમાસ્તુ તવ સાન્નિધ્યં નિત્યં ચૈવાશ્રમે વિભો ।
તવ ભક્તેષુ સખ્યં સ્યાદન્યોઽન્યેષુ સદા ભવેત્ ॥ ૪૮॥

એવમુક્તો મયા શમ્ભુર્વિહસ્ય પરમેશ્વરઃ ।
કૃપાદૃષ્ટ્યા નિરીક્ષ્યાશુ માં સ પ્રાહ યદૂદ્વહ ॥ ૪૯॥

શ્રીશિવ ઉવાચ ।
ઉપમન્યો મુને તાત વર્જિતસ્ત્વં ભવિષ્યસિ ।
જરામરણજૈર્દોષૈઃ સર્વકામાન્વિતો ભવ ॥ ૫૦॥

મુનીનાં પૂજનીયશ્ચ યશોધનસમન્વિતઃ ।
શીલરૂપગુણૈશ્વર્યં મત્પ્રસાદાત્પદે પદે ॥ ૫૧॥

ક્ષીરોદસાગરસ્યૈવ સાન્નિધ્યં પયસાં નિધેઃ ।
તત્ર તે ભવિતા નિત્યં યત્ર યત્રેચ્છસે મુને ॥ ૫૨॥

અમૃતાત્મકં તત્ક્ષીરં યાવત્સંયામ્યતે તતઃ ।
ઇમં વૈવસ્વતં કલ્પં પશ્યસે બન્ધુભિઃ સહ ॥ ૫૩॥

ત્વદ્ગોત્રં ચાક્ષયં ચાસ્તુ મત્પ્રસાદાત્સદૈવ હિ ।
સાન્નિધ્યમાશ્રમે તેઽહં કરિષ્યામિ મહામુને ॥ ૫૪॥

મદ્ભક્તિઃ સુસ્થિરા ચાસ્તુ સદા દાસ્યામિ દર્શનમ્ ।
સ્મૃતશ્ચ ભવતા વત્સ પ્રિયસ્ત્વં સર્વથા મમ ॥ ૫૫॥

યથાકામસુખં તિષ્ઠ નોત્કણ્ઠાં કર્તુમર્હસિ ।
સર્વં પ્રપૂર્ણતાં યાતુ ચિન્તિતં નાત્ર સંશયઃ ॥ ૫૬॥

ઉપમન્યુરુવાચ ।
એવમુક્ત્વા સ ભગવાન્ સુર્યકોટિસમપ્રભઃ ।
મહેશાનો વરાન્ દત્ત્વા તત્રૈવાન્તરધીયત ॥ ૫૭॥

એવં દૃષ્ટો મયા કૃષ્ણ પરિવારસમન્વિતઃ ।
શઙ્કરઃ પરમેશાનો ભુક્તિમુક્તિપ્રદાયકઃ ॥ ૫૮॥

શમ્ભુના પરમેશેન યદુક્તં તેન ધીમતા ।
તદવાપ્તં ચ મે સર્વં દેવદેવ સમાધિના ॥ ૫૯॥

પ્રત્યક્ષં ચૈવ તે જાતાન્ ગન્ધર્વાપ્સરસસ્તથા ।
ઋષીન્વિદ્યાધરાંશ્ચૈવ પશ્ય સિદ્ધાન્વ્યવસ્થિતાન્ ॥ ૬૦॥

પશ્ય વૃક્ષાન્મનોરમ્યાન્ સ્નિગ્ધપત્રાન્સુગન્ધિનઃ ।
સર્વર્તુકુસુમૈર્યુક્તાન્સદાપુષ્પફલાન્વિતાન્ ॥ ૬૧॥

સર્વમેતન્મહાબાહો શઙ્કરસ્ય મહાત્મનઃ ।
પ્રસાદાદ્દેવદેવસ્ય વિશ્વં ભાવસમન્વિતમ્ ॥ ૬૨॥

મમાસ્તિ ત્વખિલં જ્ઞાનં પ્રસાદાત્ શૂલપાણિનઃ ।
ભૂતં ભવ્યં ભવિષ્યં ચ સર્વં જાનામિ તત્ત્વતઃ ॥ ૬૩॥

તમહં દૃષ્ટવાન્દેવમપિ દેવાઃ સુરેશ્વરાઃ ।
યં ન પશ્યન્ત્યનારાધ્ય કોઽન્યો ધન્યતરો મયા ॥ ૬૪॥

ષડ્વિંશકમિતિ ખ્યાતં પરં તત્ત્વં સનાતનમ્ ।
એવં ધ્યાયન્તિ વિદ્વાંસો મહત્પરમમક્ષરમ્ ॥ ૬૫॥

સર્વં તત્ત્વવિધાનજ્ઞઃ સર્વતત્ત્વાર્થદર્શનઃ ।
સ એવ ભગવાન્ દેવઃ પ્રધાનપુરુષેશ્વરઃ ॥ ૬૬॥

યો નિજાદ્દક્ષિણાત્પાર્શ્વાદ્ બ્રહ્માણં લોકકારણમ્ ।
વામાદપ્યસૃજદ્વિષ્ણું લોકરક્ષાર્થમીશ્વરઃ ॥ ૬૭॥

કલ્પાન્તે ચૈવ સમ્પ્રાપ્તેઽસૃજદ્ રુદ્રં હૃદઃ પ્રભુઃ ।
તતઃ સમહરત્કૃત્સ્નં જગત્સ્થાવરજઙ્ગમમ્ ॥ ૬૮॥

યુગાન્તે સર્વભૂતાનિ સંવર્તક ઇવાનલઃ ।
કાલો ભૂત્વા મહાદેવો ગ્રસમાનઃ સ તિષ્ઠતિ ॥ ૬૯॥

સર્વજ્ઞઃ સર્વભૂતાત્મા સવર્ભૂતભવોદ્ભવઃ ।
આસ્તે સર્વગતો દેવો દૃશ્યઃ સર્વૈશ્ચ દૈવતૈઃ ॥ ૭૦॥

અતસ્ત્વં પુત્રલાભાય સમારાધય શઙ્કરમ્ ।
શીઘ્રં પ્રસન્નો ભવિતા શિવસ્તે ભક્તવત્સલઃ ॥ ૭૧॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં કૃષ્ણોપમન્યુસંવાદે સ્વગતિવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૫.૧॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૨. દ્વિતીયોઽધ્યાયઃ । સનત્કુમારવ્યાસસંવાદે ઉપમન્યૂપદેશઃ ।

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય મુનેર્વાક્યમુપમન્યોર્મહાત્મનઃ ।
જાતભક્તિર્મહાદેવે કૃષ્ણઃ પ્રોવાચ તં મુનિમ્ ॥ ૧॥

શ્રીકૃષ્ણ ઉવાચ ।
ઉપમન્યો મુને તાત કૃપાં કુરુ મમોપરિ ।
યે યે શિવં સમારાધ્ય કામાનાપુશ્ચ તાન્વદ ॥ ૨॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્યોપમન્યુઃ સ મુનિઃ શૈવવરો મહાન્ ।
કૃષ્ણવાક્યં સુપ્રશસ્ય પ્રત્યુવાચ કૃપાનિધિઃ ॥ ૩॥

ઉપમન્યુરુવાચ ।
યૈર્યૈર્ભવારાધનતઃ પ્રાપ્તો હૃત્કામ એવ હિ ।
તાંસ્તાન્ ભક્તાન્ પ્રવક્ષ્યામિ શ‍ૃણુ ત્વં વૈ યદૂદ્વહ ॥ ૪॥

શર્વાત્સર્વામરૈશ્વર્યં હિરણ્યકશિપુઃ પુરા ।
વર્ષાણાં દશલક્ષાણિ સોઽલભચ્ચન્દ્રશેખરાત્ ॥ ૫॥

તસ્યાથ પુત્રપ્રવરો નન્દનો નામ વિશ્રુતઃ ।
સ ચ શર્વવરાદિન્દ્રં વર્ષાયુતમયોધયત્ ॥ ૬॥

વિષ્ણુચક્રં ચ તદ્ ઘોરં વજ્રમાખણ્ડલસ્ય ચ ।
શીર્ણં પુરાભવત્કૃષ્ણ તદઙ્ગેષુ મહાહવે ॥ ૭॥

ન શસ્ત્રાણિ વહન્ત્યઙ્ગે ધર્મતસ્તસ્ય ધીમતઃ ।
ગ્રહસ્યાતિબલસ્યાજૌ ચક્રવજ્રમુખાન્યપિ ॥ ૮॥

અર્દ્યમાનાશ્ચ વિબુધા ગ્રહેણ સુબલીયસા ।
દેવદત્તવરા જઘ્નુરસુરેન્દ્રાન્ સુરા ભૃશમ્ ॥ ૯॥

તુષ્ટો વિદ્યુત્પ્રભસ્યાપિ ત્રૈલોક્યેશ્વરતામદાત્ ।
શતવર્ષસહસ્રાણિ સર્વલોકેશ્વરો ભવઃ ॥ ૧૦॥

તથા પુત્રસહસ્રાણામયુતં ચ દદૌ શિવઃ ।
મમ ચાનુચરો નિત્યં ભવિષ્યસ્યબ્રવીદિતિ ॥ ૧૧॥

કુશદ્વીપે શુભં રાજ્યમદદાદ્ભગવાન્ ભવઃ ।
સ તસ્મૈ શઙ્કરઃ પ્રીત્યા વાસુદેવ પ્રહૃષ્ટધીઃ ॥ ૧૨॥

ધાત્રા સૃષ્ટઃ શતમખો દૈત્યો વર્ષશતં પુરા ।
તપઃ કૃત્વા સહસ્રં તુ પુત્રાણામલભદ્ભવાત્ ॥ ૧૩॥

યાજ્ઞવલ્ક્ય ઇતિ ખ્યાતો ગીતો વેદેષુ વૈ મુનિઃ ।
આરાધ્ય સ મહાદેવં પ્રાપ્તવાન્ જ્ઞાનમુત્તમમ્ ॥ ૧૪॥

વેદવ્યાસસ્તુ યો નામ્ના પ્રાપ્તવાનતુલં યશઃ ।
સોઽપિ શઙ્કરમારાધ્ય ત્રિકાલજ્ઞાનમાપ્તવાન્ ॥ ૧૫॥

ઇન્દ્રેણ વાલખિલ્યાસ્તે પરિભૂતાસ્તુ શઙ્કરાત્ ।
લેભિરે સોમહર્તારં ગરુડં સર્વદુર્જયમ્ ॥ ૧૬॥

આપઃ પ્રનષ્ટાઃ સર્વાશ્ચ પૂર્વરોષાત્કપર્દિનઃ ।
શર્વં સમકપાલેન દેવૈરિષ્ટ્વાઃ પ્રવર્તિતાઃ ॥ ૧૭॥

અત્રેર્ભાર્યા ચાનસૂયા ત્રીણિ વર્ષશતાનિ ચ ।
મુશલેષુ નિરાહારા સુપ્ત્વા શર્વાત્તતઃ સુતાન્ ॥ ૧૮॥

દત્તાત્રેયં મુનિં લેભે ચન્દ્રં દુર્વાસસં તથા ।
ગઙ્ગાં પ્રવર્તયામાસ ચિત્રકૂટે પતિવ્રતા ॥ ૧૯॥

વિકર્ણશ્ચ મહાદેવં તથા ભક્તસુખાવહમ્ ।
પ્રસાદ્ય મહતીં સિદ્ધિમાપ્તવાન્ મધુસૂદન ॥ ૨૦॥

ચિત્રસેનો નૃપઃ શમ્ભું પ્રસાદ્ય દૃઢભક્તિમાન્ ।
સમસ્તનૃપભીતિભ્યોઽભયં પ્રાપાતુલં ચ કમ્ ॥ ૨૧॥

શ્રીકરો ગોપિકાસૂનુર્નૃપપૂજાવિલોકનાત્ ।
જાતભક્તિર્મહાદેવે પરમાં સિદ્ધિમાપ્તવાન્ ॥ ૨૨॥

ચિત્રાઙ્ગદો નૃપસુતઃ સીમન્તિન્યાઃ પતિર્હરે ।
શિવાનુગ્રહતો મગ્નો યમુનાયાં મૃતો ન હિ ॥ ૨૩॥

સ ચ તક્ષાલયં ગત્વા તન્મૈત્રીં પ્રાપ્ય સુવ્રતઃ ।
આયાતઃ સ્વગૃહં પ્રીતો નાનાધનસમન્વિતઃ ॥ ૨૪॥

સીમન્તિની પ્રિયા તસ્ય સોમવ્રતપરાયણા ।
શિવાનુગ્રહતઃ કૃષ્ણ લેભે સૌભાગ્યમુત્તમમ્ ॥ ૨૫॥

તત્પ્રભાવાદ્ વ્રતે તસ્મિન્નેકો દ્વિજસુતઃ પુરા ।
કશ્ચિત્સ્ત્રીત્વં ગતો લોભાત્કૃતદારાકૃતિશ્છલાત્ ॥ ૨૬॥

ચઞ્ચુકા પુંશ્ચલી દુષ્ટા ગોકર્ણે દ્વિજતઃ પુરા ।
શ્રુત્વા ધર્મકથાં શમ્ભોર્ભક્ત્યા પ્રાપ પરાં ગતિમ્ ॥ ૨૭॥

સ્વસ્ત્ર્યનુગ્રહતઃ પાપી બિન્દુગો ચઞ્ચુકાપતિઃ ।
શ્રુત્વા શિવપુરાણં સ સદ્ગતિં પ્રાપ શાઙ્કરીમ્ ॥ ૨૮॥

પિઙ્ગલા ગણિકા ખ્યાતા મદરાહ્વો દ્વિજાધમઃ ।
શૈવમૃષભમભ્યર્ચ્ય લેભાતે સદ્ગતિં ચ તૌ ॥ ૨૯॥

મહાનન્દાભિધા કશ્ચિદ્વેશ્યા શિવપદારતા ।
દૃઢાત્પણાત્સુપ્રસાદ્ય શિવં લેભે ચ સદ્ગતિમ્ ॥ ૩૦॥

કૈકેયી દ્વિજબાલા ચ સાદરાહ્વા શિવવ્રતા ।
પરમં હિ સુખં પ્રાપ શિવેશવ્રતધારણાત્ ॥ ૩૧॥

વિમર્ષણશ્ચ નૃપતિઃ શિવભક્તિં વિધાય વૈ ।
ગતિં લેભે પરાં કૃષ્ણ શિવાનુગ્રહતઃ પુરા ॥ ૩૨॥

દુર્જનશ્ચ નૃપઃ પાપી બહુસ્ત્રીલમ્પટઃ ખલઃ ।
શિવભક્ત્યા શિવં પ્રાપ નિર્લિપ્તઃ સર્વકર્મસુ ॥ ૩૩॥

સસ્ત્રીકઃ શમ્બરો નામ્ના શઙ્કરશ્ચ શિવવ્રતી ।
ચિતાભસ્મરતો ભક્ત્યા લેભે તદ્ગતિમુત્તમામ્ ॥ ૩૪॥

સૌમિની નામ ચાણ્ડાલી સમ્પૂજ્યાજ્ઞાનતો હિ સા ।
લેભે શૈવીં ગતિં કૃષ્ણ શઙ્કરાનુગ્રહાત્પરાત્ ॥ ૩૫॥

મહાકાલાભિધો વ્યાધઃ કિરાતઃ પરહિંસકઃ ।
સમભ્યર્ચ્ય શિવં ભક્ત્યા લેભે સદ્ગતિમુત્તમામ્ ॥ ૩૬॥

દુર્વાસા મુનિશાર્દૂલઃ શિવાનુગ્રહતઃ પુરા ।
તસ્તાર સ્વમતં લોકે શિવભક્તિં વિમુક્તિદામ્ ॥ ૩૭॥

કૌશિકશ્ચ સમારાધ્ય શઙ્કરં લોક શઙ્કરમ્ ।
બ્રાહ્મણોઽભૂત્ક્ષત્રિયશ્ચ દ્વિતીય ઇવ પદ્મભૂઃ ॥ ૩૮॥

શિવમભ્યર્ચ્ય સદ્ભક્ત્યા વિરઞ્ચિઃ શૈવસત્તમઃ ।

અભૂત્સર્ગકરઃ કૃષ્ણ સર્વલોકપિતામહઃ ॥ ૩૯॥

માર્કણ્ડેયો મુનિવરશ્ચિરઞ્જીવી મહાપ્રભુઃ ।
શિવભક્તવરઃ શ્રીમાન્ શિવાનુગ્રહતો હરે ॥ ૪૦॥

દેવેન્દ્રો હિ મહાશૈવસ્ત્રૈલોક્યં બુભુજે પુરા ।
શિવાનુગ્રહતઃ કૃષ્ણ સર્વદેવાધિપઃ પ્રભુઃ ॥ ૪૧॥

બલિપુત્રો મહાશૈવઃ શિવાનુગ્રહતો વશી ।
બાણો બભૂવ બ્રહ્માણ્ડનાયકઃ સકલેશ્વરઃ ॥ ૪૨॥

હરિઃ શક્તિશ્ચ સદ્ભક્ત્યા દધીચશ્ચ મહેશ્વરઃ ।
શિવાનુગ્રહતોઽભૂવંસ્તથા રામો હિ શાઙ્કરઃ ॥ ૪૩॥

કણાદો ભાર્ગવશ્ચૈવ ગુરુર્ગૌતમ એવ ચ ।
શિવભક્ત્યા બભૂવુસ્તે મહાપ્રભવ ઈશ્વરાઃ ॥ ૪૪॥

શાકલ્યઃ શંસિતાત્મા ચ નવવર્ષશતાન્યપિ ।
ભવમારાધયામાસ મનોયજ્ઞેન માધવ ॥ ૪૫॥

તુતોષ ભગવાનાહ ગ્રન્થકર્તા ભવિષ્યસિ ।
વત્સાક્ષયા ચ તે કીર્તિસ્ત્રૈલોક્યે પ્રભવિષ્યતિ ॥ ૪૬॥

અક્ષયં ચ કુલં તેઽસ્તુ મહર્ષિભિરલઙ્કૃતમ્ ।
ભવિષ્યસિ ઋષિશ્રેષ્ઠ સૂત્રકર્તા સુતસ્તતઃ ॥ ૪૭॥

ઇત્યેવં શઙ્કરાત્પ્રાપ વરં મુનિવરઃ સ વૈ ।
ત્રૈલોક્યે વિતતશ્ચાસીત્પૂજ્યશ્ચ યદુનન્દન ॥ ૪૮॥

સાવર્ણિરિતિ વિખ્યાત ઋષિરાસીત્કૃતે યુગે ।
ઇહ તેન તપસ્તપ્તં ષષ્ટિવર્ષશતાનિ ચ ॥ ૪૯॥

તમાહ ભગવાન્ રુદ્રઃ સાક્ષાત્તુષ્ટોઽસ્મિ તેઽનઘ ।
ગ્રન્થકૃલ્લોકવિખ્યાતો ભવિતાસ્યજરામરઃ ॥ ૫૦॥

એવંવિધો મહાદેવઃ પુણ્યપૂર્વતરૈસ્તતઃ ।
સમર્ચિતઃ શુભાન્ કામાન્ પ્રદદાતિ યથેપ્સિતાન્ ॥ ૫૧॥

એકેનૈવ મુખેનાહં વક્તું ભગવતો ગુણાઃ ।
યે સન્તિ તાન્ન શક્નોમિ હ્યપિ વર્ષશતૈરપિ ॥ ૫૨॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં સનત્કુમારવ્યાસસંવાદે ઉપમન્યૂપદેશો નામ દ્વિતીયોઽધ્યાયઃ ॥ ૫.૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૩. તૃતીયોઽધ્યાયઃ । કૃષ્ણાદિશિવભક્તોદ્ધારણ શિવમાહાત્મ્યવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
એતચ્છ્રુત્વા વચસ્તસ્ય સોઽબ્રવીત્તં મહામુનિમ્ ।
વિસ્મયં પરમં ગત્વોપમન્યું શાન્તમાનસમ્ ॥ ૧॥

વાસુદેવ ઉવાચ ।
ધન્યસ્ત્વમસિ વિપ્રેન્દ્ર કસ્ત્વાં સ્તોતુમલં કૃતી ।
યસ્ય દેવાદિદેવસ્તે સાન્નિધ્યં કુરુતે શ્રમે ॥ ૨॥

દર્શનં મુનિશાર્દૂલ દદ્યાત્સ ભગવાન્ શિવઃ ।
અપિ તાવન્મમાપ્યેવં પ્રસાદં વા કરોત્વસૌ ॥ ૩॥

ઉપમન્યુરુવાચ ।
અચિરેણૈવ કાલેન મહાદેવં ન સંશયઃ ।
તસ્યૈવ કૃપયા ત્વં વૈ દ્રક્ષ્યસે પુરુષોત્તમ ॥ ૪॥

ષોડશે માસિ સુવરાન્ પ્રાપ્સ્યસિ ત્વં મહેશ્વરાત્ ।
સપત્નીકાત્કથં નો દાસ્યતે દેવો વરાન્હરે ॥ ૫॥

પૂજ્યોઽસિ દૈવતૈઃ સર્વૈઃ શ્લાઘનીયઃ સદા ગુણૈઃ ।
જાપ્યં તેઽહં પ્રવક્ષ્યામિ શ્રદ્ધાનાય ચાચ્યુત ॥ ૬॥

તેન જપપ્રભાવેણ સત્યં દ્રક્ષ્યસિ શઙ્કરમ્ ।
આત્મતુલ્યબલં પુત્રં લભિષ્યસિ મહેશ્વરાત્ ॥ ૭॥

જપો નમઃ શિવાયેતિ મન્ત્રરાજમિમં હરે ।
સર્વકામપ્રદં દિવ્યં ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૮॥

સનત્કુમાર ઉવાચ ।
એવં કથયતસ્તસ્ય મહાદેવાશ્રિતાઃ કથાઃ ।

દિનાન્યષ્ટૌ પ્રયાતાનિ મુહૂર્તમિવ તાપસ ॥ ૯॥

નવમે તુ દિને પ્રાપ્તે મુનિના સ ચ દીક્ષિતઃ ।
મન્ત્રમધ્યાપિતં શાર્વમાથર્વશિરસં મહત્ ॥ ૧૦॥

દણ્ડી મુણ્ડી ચ સદ્યોઽસૌ બભૂવ સુસમાહિતઃ ।
પાદાઙ્ગુષ્ઠોદ્ધૃતતનુસ્તેપે ચોર્ધ્વભુજસ્તથા ॥ ૧૧॥

સમ્પ્રાપ્તે ષોડશે માસિ સન્તુષ્ટઃ પરમેશ્વરઃ ।
પાર્વત્યા સહિતઃ શમ્ભુર્દદૌ કૃષ્ણાય દર્શનમ્ ॥ ૧૨॥

પાર્વત્યા સહિતં દેવં ત્રિનેત્રં ચન્દ્રશેખરમ્ ।
બ્રહ્માદ્યૈઃ સ્તૂયમાનં તુ પૂજિતં સિદ્ધકોટિભિઃ ॥ ૧૩॥

દિવ્યમાલ્યામ્બરધરં ભક્તિનમ્રૈઃ સુરાસુરૈઃ ।
પ્રણતં ચ વિશેષેણ નાનાભૂષણભૂષિતમ્ ॥ ૧૪॥

સર્વાશ્ચર્યમયં કાન્તં મહેશમજમવ્યયમ્ ।
નાનાગણાન્વિતં તુષ્ટં પુત્રાભ્યાં સંયુતં પ્રભુમ્ ॥ ૧૫॥

શ્રીકૃષ્ણઃ પ્રાઞ્જલિર્દૃષ્ટ્વા વિસ્મયોત્ફુલ્લલોચનઃ ।
ઈદૃશં શઙ્કરં પ્રીતઃ પ્રણનામ મહોત્સવઃ ॥ ૧૬॥

નાનાવિધૈઃ સ્તુતિપદૈર્વાઙ્મયેનાર્ચયત્તદા ।
સહસ્રનામ્ના દેવેશં તુષ્ટાવ નતકન્ધરઃ ॥ ૧૭॥

તતો દેવાઃ સગન્ધર્વા વિદ્યાધરમહોરગાઃ ।
મુમુચુઃ પુષ્પવૃષ્ટિં ચ સાધુવાદાન્ મનોનુગાન્ ॥ ૧૮॥

પાર્વત્યાશ્ચ મુખં દૃષ્ટ્વા ભગવાન્ ભક્તવત્સલઃ ।
ઉવાચ કેશવં તુષ્ટો રુદ્રશ્ચાથ મહેશ્વરઃ ॥ ૧૯॥

શ્રીમહાદેવ ઉવાચ ।
કૃષ્ણ જાનામિ ભક્તં ત્વાં મયિ નિત્યં દૃઢવ્રતમ્ ।
વૃણીષ્વ ત્વં વરાન્ મત્તઃ પુણ્યાંસ્ત્રૈલોક્યદુર્લભાન્ ॥ ૨૦॥

સનત્કુમાર ઉવાચ ।
તસ્ય તદ્વચનં શ્રુત્વા કૃષ્ણઃ પ્રાઞ્જલિરાદરાત્ ।
પ્રાહ સર્વેશ્વરં શમ્ભું સુપ્રણમ્ય પુનઃ પુનઃ ॥ ૨૧॥

શ્રીકૃષ્ણ ઉવાચ ।

દેવદેવ મહાદેવ યાચેઽહં હ્યુત્તમાન્ વરાન્ ।
ત્વત્તોઽષ્ટપ્રમિતાન્નાથ ત્વયોદ્દિષ્ટાન્ મહેશ્વર ॥ ૨૨॥

તવ ધર્મે મતિર્નિત્યં યશશ્ચાપ્રચલં મહત્ ।
ત્વત્સામીપ્યં સ્થિરા ભક્તિસ્ત્વયિ નિત્યં મમાસ્ત્વતિ ॥ ૨૩॥

સ્ત્રીણાં મમ દશાદ્યાનાં પુત્રાઃ શમ્ભો ભવન્તુ વૈ ।
વધ્યાશ્ચ રિપવઃ સર્વે સઙ્ગ્રામે બલદર્પિતાઃ ॥ ૨૪॥

અપમાનો ભવેન્નૈવ ક્વચિન્મે શત્રુતઃ પ્રભો ।
યોગિનામપિ સર્વેષાં ભવેયમતિવલ્લભઃ ॥ ૨૫॥

ઇત્યષ્ટૌ સુવરાન્દેહિ દેવદેવ નમોઽસ્તુ તે ।
સર્વેશ્વરસ્ત્વમેવાસિ મત્પ્રભુશ્ચ વિશેષતઃ ॥ ૨૬॥

સનત્કુમાર ઉવાચ ।
તસ્ય તદ્વચનં શ્રુત્વા તમાહ ભગવાન્ ભવઃ ।
સર્વં ભવિષ્યતીત્યેવં પુનઃ તં પ્રાહ શૂલધૃક્ ॥ ૨૭॥

સામ્બો નામ મહાવીર્યઃ પુત્રસ્તે ભવિતા બલી ।
ઘોરસંવર્તકાદિત્યઃ શપ્તો મુનિભિરેવ ચ ॥ ૨૮॥

માનુષો ભવિતાસીતિ સ તે પુત્રો ભવિષ્યતિ ।
યદ્યચ્ચ પ્રાર્થિતં કિઞ્ચિત્તત્તત્સર્વં લભસ્વ વૈ ॥ ૨૯॥

સનત્કુમાર ઉવાચ ।
એવં લબ્ધ્વા વરાન્ સર્વાન્ શ્રીકૃષ્ણઃ પરમેશ્વરાત્ ॥

નાનાવિધાભિર્બહ્વીભિઃ સ્તુતિભિઃ સમતોષયત્ ॥ ૩૦॥

તમાહાથ શિવા તુષ્ટા પાર્વતી ભક્તવત્સલા ।
વાસુદેવં મહાત્માનં શમ્ભુભક્તં તપસ્વિનમ્ ॥ ૩૧॥

પાર્વત્યુવાચ ।
વાસુદેવ મહાબુદ્ધે કૃષ્ણ તુષ્ટાસ્મિ તેઽનઘ ।
ગૃહાણ મત્તશ્ચ વરાન્ મનોજ્ઞાન્ ભુવિ દુર્લભાન્ ॥ ૩૨॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્યાઃ પાર્વત્યાઃ સ યદૂદ્વહઃ ।
ઉવાચ સુપ્રસન્નાત્મા ભક્તિયુક્તેન ચેતસા ॥ ૩૩॥

શ્રીકૃષ્ણ ઉવાચ ।
દેવિ ત્વં પરિતુષ્ટાસિ ચેદ્દદાસિ વરાન્હિ મે ।
તપસાનેન સત્યેન બ્રાહ્મણાન્ પ્રતિ માસ્મભૂત્ ॥ ૩૪॥

દ્વેષઃ કદાચિદ્ભદ્રં તુ પૂજયેયં દ્વિજાન્ સદા ।
તુષ્ટૌ ચ માતાપિતરૌ ભવેતાં મમ સર્વદા ॥ ૩૫॥

સર્વભૂતેષ્વાનુકૂલ્યં ભજેયં યત્ર તત્રગઃ ।
કુલે પ્રભૃતિરુચિતા મમાસ્તુ તવ દર્શનાત્ ॥ ૩૬॥

તર્પયેયં સુરેન્દ્રાદીન્દેવાન્ યજ્ઞશતેન તુ ।
યતીનામતિથીનાં ચ સહસ્રાણ્યથ સર્વદા ॥ ૩૭॥

ભોજયેયં સદા ગેહે શ્રદ્ધાપૂતં તુ ભોજનમ્ ।
બાન્ધવૈઃ સહ પ્રીતિસ્તુ નિત્યમસ્તુ સુનિર્વૃતિઃ ॥ ૩૮॥

દેવિ ભાર્યાસહસ્રાણાં ભવેયં પ્રાણવલ્લભઃ ।
અક્ષીણા કામ્યતા તાસુ પ્રસાદાત્તવ શાઙ્કરિ ॥ ૩૯॥

આસાં ચ પિતરો લોકે ભવેયુઃ સત્યવાદિનઃ ।
ઇત્યાદ્યાઃ સુવરાઃ સન્તુ પ્રસાદાત્તવ પાર્વતિ ॥ ૪૦॥

સનત્કુમાર ઉવાચ ।
તસ્ય તદ્વચનં શ્રુત્વા દેવી તં ચાહ વિસ્મિતા ।
એવમસ્ત્વિતિ ભદ્રં તે શાશ્વતી સર્વકામદા ॥ ૪૧॥

તસ્મિંસ્તાંશ્ચ વરાન્ દત્ત્વા પાર્વતીપરમેશ્વરૌ ।
તત્રૈવાન્તશ્ચ દધતુઃ કૃત્વા કૃષ્ણસ્ય સત્કૃપામ્ ॥ ૪૨॥

કૃષ્ણઃ કૃતાર્થમાત્માનમમન્યત મુનીશ્વર ।
ઉપમન્યોર્મુનેરાશુ પ્રાપાશ્રમમનુત્તમમ્ ॥ ૪૩॥

પ્રણમ્ય શિરસા તત્ર તં મુનિં કેશિહા તતઃ ।
તથા વૃત્તં ચ તસ્મૈ તત્ સમાચષ્ટોપમન્યવે ॥ ૪૪॥

સ ચ તં પ્રાહ કોઽન્યઃ સ્યાચ્છર્વાદ્દેવાજ્જનાર્દન ।
મહાદાનપતિર્લોકે ક્રોધે વાતીવ દુઃસહઃ ॥ ૪૫॥

જ્ઞાને તપસિ વા શૌર્યે સ્થૈર્યે વા પદ એવ ચ ।
શ઼ૃણુ શમ્ભોસ્તુ ગોવિન્દ દેવૈશ્વર્યં મહાયશાઃ ॥ ૪૬॥

તચ્છ્રુત્વા શ્રદ્ધયા યુક્તોઽભવચ્છમ્ભોસ્તુ ભક્તિમાન્ ।
પપ્રચ્છ શિવમાહાત્મ્યં સ તં પ્રાહ મુનીશ્વરઃ ॥ ૪૭॥

ઉપમન્યુરુવાચ ।
ભગવાન્ શઙ્કરઃ પૂર્વં બ્રહ્મલોકે મહાત્મના ।
સ્તુતો નામસહસ્રેણ તણ્ડિના બ્રહ્મયોગિના ॥ ૪૮॥

સાઙ્ખ્યાઃ પઠન્તિ તદ્ગીતં વિસ્તીર્ણં ચ નિઘણ્ટુવત્ ।
દુર્જ્ઞાનં માનુષાણાં તુ સ્તોત્રં તત્સર્વકામદમ્ ॥ ૪૯॥

સ્મરન્નિત્યં શઙ્કરં ત્વં ગચ્છ કૃષ્ણ ગૃહં સુખી ।
ભવિષ્યસિ સદા તાત શિવભક્તગણાગ્રણીઃ ॥ ૫૦॥

ઇત્યુક્તસ્તં નમસ્કૃત્ય વાસુદેવો મુનીશ્વરમ્ ।
મનસા સંસ્મરન્ શમ્ભું કેશવો દ્વારકાં યયૌ ॥ ૫૧॥

સનત્કુમાર ઉવાચ ।
એવં કૃષ્ણઃ સમારાધ્ય શઙ્કરં લોકશઙ્કરમ્ ।
કૃતાર્થોઽભૂન્મુનિશ્રેષ્ઠ સર્વાજેયોઽભવત્તથા ॥ ૫૨॥

તથા દાશરથી રામઃ શિવમારાધ્ય ભક્તિતઃ ।
કૃતાર્થોઽભૂન્મુનિશ્રેષ્ઠ વિજયી સર્વતોઽભવત્ ॥ ૫૩॥

તપસ્તપ્ત્વાતિવિપુલં પુરા રામો ગિરૌ મુને ।
શિવાદ્ધનુઃ શરં ચાપં જ્ઞાનં વૈ પરમુત્તમમ્ ॥ ૫૪॥

રાવણં સગણં હત્વા સેતું બદ્ધ્વામ્ભસાં નિધૌ ।
સીતાં પ્રાપ્ય ગૃહં યાતો બુભુજે નિખિલાં મહીમ્ ॥ ૫૫॥

તથા ચ ભાર્ગવો રામો હ્યારાધ્ય તપસા વિભુમ્ ।
નિરીક્ષ્ય દુઃખિતઃ શર્વાત્પિતરં ક્ષત્રિયૈર્હતમ્ ॥ ૫૬॥

તીક્ષ્ણં સ પરશું લેભે નિર્દદાહ ચ તેન તાન્ ।
ત્રિઃસપ્તકૃત્વઃ ક્ષત્રાંશ્ચ પ્રસન્નાત્પરમેશ્વરાત્ ॥ ૫૭॥

અજેયશ્ચામરશ્ચૈવ સોઽદ્યાપિ તપસાં નિધિઃ ।
લિઙ્ગાર્ચનરતો નિત્યં દૃશ્યતે સિદ્ધચારણૈઃ ॥ ૫૮॥

મહેન્દ્રપર્વતે રામઃ સ્થિતસ્તપસિ તિષ્ઠતિ ।
કલ્પાન્તે પુનરેવાસાવૃષિસ્થાનમવાપ્સ્યતિ ॥ ૫૯॥

અસિતસ્યાનુજઃ પૂર્વં પીડયા કૃતવાંસ્તપઃ ।
મૂલગ્રાહેણ વિશ્વસ્ય દેવલો નામ તાપસઃ ॥ ૬૦॥

પુરન્દરેણ શપ્તસ્તુ તપસ્વી યશ્ચ સુસ્થિરમ્ ।
અધર્મ્યં ધર્મમલભલ્લિઙ્ગમારધ્ય કામદમ્ ॥ ૬૧॥

ચાક્ષુષસ્ય મનોઃ પુત્રો મૃગોઽભૂત્તુ મરુસ્થલે ।
વસિષ્ઠશાપાદ્ ગૃત્સમદો દણ્ડકારણ્ય એકલઃ ॥ ૬૨॥

હૃદયે સંસ્મન્ ભક્ત્યા પ્રણવેન યુતં શિવમ્ ।
તસ્માન્મૃત્યુમુખાકારો ગણો મૃગમુખોઽભવત્ ॥ ૬૩॥

અજરામરતાં નીતસ્તીર્વા શાપં પુનશ્ચ સઃ ।
શઙ્કરેણ કૃતઃ પ્રીત્યા નિત્યં લમ્બોદરાનુગઃ ॥ ૬૪॥

ગાર્ગ્યાય પ્રદદૌ શર્વો મોક્ષં ચ ભુવિ દુર્લભમ્ ।
કામચારી મહાક્ષેત્રં કાલજ્ઞાનં મહર્દ્ધિમત્ ॥ ૬૫॥

ચતુષ્પાદં સરસ્વત્યાઃ પારગત્વં ચ શાશ્વતમ્ ।
ન તુલ્યં ચ સહસ્રં તુ પુત્રાણાં પ્રદદૌ શિવઃ ॥ ૬૬॥

વેદવ્યાસં તુ યોગીન્દ્રં પુત્રં તુષ્ટઃ પિનાક ધૃક્ ।
પરાશરાય ચ દદૌ જરામૃત્યુવિવર્જિતમ્ ॥ ૬૭॥

માણ્ડવ્યઃ શઙ્કરેણૈવ જીવં દત્ત્વા વિસર્જિતઃ ।
વર્ષાણાં દશ લક્ષાણિ શૂલાગ્રાદવરોપિતઃ ॥ ૬૮॥

દરિદ્રો બ્રાહ્મણઃ કશ્ચિન્નિક્ષિપ્ય ગુરુવેશ્મનિ ।
પુત્રં તુ ગાલવં યશ્ચ પૂર્વમાસીદ્ ગૃહાશ્રમી ॥ ૬૯॥

ગુપ્તો વા મુનિશાલાયાં ભિક્ષુરાયાતિ તદ્ગૃહમ્ ।
ભાર્યામુવાચ યઃ કશ્ચિદવશ્યં નિર્ધનો યતઃ ॥ ૭૦॥

સ તુ વાચ્યો ભવત્યા ચ ન દૃશ્યન્ત ઇતિ પ્રિયઃ ।
અતિથેરાગતસ્યાપિ કિં દાસ્યામિ ગૃહે વસન્ ॥ ૭૧॥

કદાચિદતિથિઃ કશ્ચિત્ક્ષુત્તૃષાક્ષામતર્ષિતઃ ।
તામુવાચ સ ભર્તા તે ક્વ ગતશ્ચેતિ તં ચ સા ॥ ૭૨॥

પ્રાહ ભર્તા મદીયસ્તુ સામ્પ્રતં ન ચ દૃશ્યતે ।
સ ઋષિસ્તામુવાચેદં જ્ઞાત્વા દિવ્યેન ચક્ષુષા ॥ ૭૩॥

ગૃહસ્થિતઃ પ્રતિચ્છન્નસ્તત્રૈવ સ મૃતો દ્વિજઃ ।
વિશ્વામિત્રાભ્યનુજ્ઞાતસ્તત્પુત્રો ગાલવસ્તથા ॥ ૭૪॥

ગૃહમાગત્ય માતુઃ સ શ્રુત્વા શાપં સુદારુણમ્ ।
આરાધ્ય શઙ્કરં દેવં પૂજાં કૃત્વા તુ શામ્ભવીમ્ ॥ ૭૫॥

ગૃહાદસૌ વિનિષ્કાન્તઃ સસ્મરન્ શઙ્કરં હૃદા ।
અથ તં તનયં દૃષ્ટ્વા પિતા તં પ્રાહ સાઞ્જલિમ્ ॥ ૭૬॥

મહાદેવપ્રસાદાચ્ચ કૃતકૃત્યોઽસ્મિ કૃત્યતઃ ।
ધનવાન્ પુત્રવાંશ્ચૈવ મૃતોઽહં જીવિતઃ પુનઃ ॥ ૭૭॥

ઇતિ વઃ કથિતમશેષં નાહં શક્તઃ સમાસતો વ્યાસાત્ ।
વક્તું શમ્ભોશ્ચ ગુણાન્ શેષસ્યાપિ ન મુખાનિ સ્યુઃ ॥ ૭૮॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં કૃષ્ણાદિશિવભક્તોદ્ધારણ શિવમાહાત્મ્યવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૫.૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૪. ચતુર્થોઽધ્યાયઃ । શિવમાયાપ્રભાવવર્ણનમ્ ।

મુનય ઊચુઃ ।
તાત તાત મહાભાગ ધન્યસ્ત્વં હિ મહામતે ।
અદ્ભુતેયં કથા શમ્ભોઃ શ્રાવિતા પરભક્તિદા ॥ ૧॥

પુનર્બ્રૂહિ કથાં શમ્ભોર્વ્યાસપ્રશ્નાનુસારતઃ ।
સર્વજ્ઞસ્ત્વં વ્યાસશિષ્યઃ શિવતત્ત્વવિચક્ષણઃ ॥ ૨॥

સૂત ઉવાચ ।
એવમેવ ગુરુર્વ્યાસઃ પૃષ્ટવાન્ મેઽજસમ્ભવમ્ ।
સનત્કુમારં સર્વજ્ઞં શિવભક્તં મુનીશ્વરમ્ ॥ ૩॥

વ્યાસ ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ શ્રાવિતેયં શુભા કથા ।

શઙ્કરસ્ય મહેશસ્ય નાનાલીલાવિહારિણઃ ॥ ૪॥

પુનર્બ્રૂહિ મહાદેવમહિમાનં વિશેષતઃ ।
શ્રદ્ધા ચ મહતી શ્રોતું મમ તાત પ્રવર્ધતે ॥ ૫॥

મહિમ્ના યેન શમ્ભોસ્તુ યે યે લોકે વિમોહિતાઃ ।
માયયા જ્ઞાનમાહૃત્ય નાનાલીલાવિહારિણઃ ॥ ૬॥

સનત્કુમાર ઉવાચ ।
શ૰ૃણુ વ્યાસ મહાબુદ્ધે શાઙ્કરીં સુખદાં કથામ્ ।
યસ્યાઃ શ્રવણમાત્રેણ શિવે ભક્તિઃ પ્રજાયતે ॥ ૭॥

શિવઃ સર્વેશ્વરો દેવઃ સર્વાત્મા સર્વદર્શનઃ ।
મહિમ્ના તસ્ય સર્વં હિ વ્યાપ્તં ચ સકલં જગત્ ॥ ૮॥

શિવસ્યૈવ પરા મૂર્તિર્બ્રહ્મવિષ્ણ્વીશ્વરાત્મિકા ।
સર્વભૂતાત્મભૂતાખ્યા ત્રિલિઙ્ગાલિઙ્ગરૂપિણી ॥ ૯॥

દેવાનાં યોનયશ્ચાષ્ટૌ માનુષી નવમી ચ યા ।
તિરશ્ચાં યોનયઃ પઞ્ચ ભવન્ત્યેવં ચતુર્દશ ॥ ૧૦॥

ભૂતા વા વર્તમાના વા ભવિષ્યાશ્ચૈવ સર્વશઃ ।
શિવાત્સર્વે પ્રવર્તન્તે લીયન્તે વૃદ્ધિમાગતાઃ ॥ ૧૧॥

બ્રહ્મેન્દ્રોપેન્દ્રચન્દ્રાણાં દેવદાનવભોગિનામ્ ।
ગન્ધર્વાણાં મનુષ્યાણામન્યેષાં વાપિ સર્વશઃ ॥ ૧૨॥

બન્ધુર્મિત્રમથાચાર્યો રક્ષન્નેતાર્થવાન્ ગુરુઃ ।
કલ્પદ્રુમોઽથ વા ભ્રાતા પિતા માતા શિવો મતઃ ॥ ૧૩॥

શિવઃ સર્વમયઃ પુંસાં સ્વયં વેદ્યઃ પરાત્પરઃ ।
વક્તું ન શક્યતે યશ્ચ પરં ચાનુપરં ચ યત્ ॥ ૧૪॥

તન્માયા પરમા દિવ્યા સર્વત્ર વ્યાપિની મુને ।
તદધીનં જગત્સર્વં સદેવાસુરમાનુષમ્ ॥ ૧૫॥

કામેન સ્વસહાયેન પ્રબલેન મનોભુવા ।
સર્વઃ પ્રધર્ષિતો વીરો વિષ્ણ્વાદિપ્રબલોઽપિ હિ ॥ ૧૬॥

શિવમાયાપ્રભાવેણાભૂદ્ધરિઃ કામમોહિતઃ ।
પરસ્ત્રીધર્ષણં ચક્રે બહુવારં મુનીશ્વર ॥ ૧૭॥

ઇન્દ્રસ્ત્રિદશપો ભૂત્વા ગૌતમસ્ત્રીવિમોહિતઃ ।
પાપં ચકાર દુષ્ટાત્મા શાપં પ્રાપ મુનેસ્તદા ॥ ૧૮॥

પાવકોઽપિ જગચ્છ્રેષ્ઠો મોહિતઃ શિવમાયયા ।
કામાધીનઃ કૃતો ગર્વાત્તતસ્તેનૈવ ચોદ્ધૃતઃ ॥ ૧૯॥

જગત્પ્રાણોઽપિ ગર્વેણ મોહિતઃ શિવમાયયા ।
કામેન નિર્જિતો વ્યાસ ચક્રેઽન્યસ્ત્રીરતિં પુરા ॥ ૨૦॥

ચણ્ડરશ્મિસ્તુ માર્તણ્ડો મોહિતઃ શિવમાયયા ।
કામાકુલો બભૂવાશુ દૃષ્ટ્વાશ્વીં હયરૂપધૃક્ ॥ ૨૧॥

ચન્દ્રશ્ચ મોહિતઃ શમ્ભોર્માયયા કામસઙ્કુલઃ ।
ગુરુપત્નીં જહારાથ યુતસ્તેનૈવ ચોદ્ધૃતઃ ॥ ૨૨॥

પૂર્વં તુ મિત્રાવરુણૌ ઘોરે તપસિ સંસ્થિતૌ ।
મોહિતૌ તાવપિ મુની શિવમાયાવિમોહિતૌ ॥ ૨૩॥

ઉર્વશીં તરુણીં દૃષ્ટ્વા કામુકૌ સમ્બભૂવતુઃ ।
મિત્રઃ કુમ્ભે જહૌ રેતો વરુણોઽપિ તથા જલે ॥ ૨૪॥

તતઃ કુમ્ભાત્સમુત્પન્નો વસિષ્ઠો મિત્રસમ્ભવઃ ।
અગસ્ત્યો વરુણાજ્જાતો વડવાગ્નિસમદ્યુતિઃ ॥ ૨૫॥

દક્ષશ્ચ મોહિતઃ શમ્ભોર્માયયા બ્રહ્મણઃ સુતઃ ।
ભ્રાતૃભિઃ સ ભગિન્યાં વૈ ભોક્તુકામોઽભવત્પુરા ॥ ૨૬॥

બ્રહ્મા ચ બહુવારં હિ મોહિતઃ શિવમાયયા ।
અભવદ્ભોક્તુકામશ્ચ સ્વસુતાયાં પરાસુ ચ ॥ ૨૭॥

ચ્યવનોઽપિ મહાયોગી મોહિતઃ શિવમાયયા ।
સુકન્યયા વિજહ્રે સ કામાસક્તો બભૂવ હ ॥ ૨૮॥

કશ્યપઃ શિવમાયાતો મોહિતઃ કામસઙ્કુલઃ ।
યયાચે કન્યકાં મોહાદ્ધન્વનો નૃપતેઃ પુરા ॥ ૨૯॥

ગરુડઃ શાણ્ડિલીં કન્યાં નેતુકામઃ સુમોહિતઃ ।
વિજ્ઞાતસ્તુ તયા સદ્યો દગ્ધપક્ષો બભૂવ હ ॥ ૩૦॥

વિભાણ્ડકો મુનિર્નારીં દૃષ્ટ્વા કામવશં ગતઃ ।

ઋષ્યશૃઙ્ગસુતસ્તસ્ય મૃગ્યાં જાતઃ શિવાજ્ઞયા ॥ ૩૧॥

ગૌતમશ્ચ મુનિઃ શમ્ભોર્માયામોહિતમાનસઃ ।
દૃષ્ટ્વા શારદ્વતીં નગ્નાં રરામ ક્ષુભિતસ્તયા ॥ ૩૨॥

રેતઃ સ્કન્નં દધાર સ્વં દ્રોણ્યાં ચૈવ સ તાપસઃ ।
તસ્માચ્ચ કલશાજ્જાતો દ્રોણઃ શસ્ત્રભૃતાં વરઃ ॥ ૩૩॥

પરાશરો મહાયોગી મોહિતઃ શિવમાયયા ।
મત્સ્યોદર્યા ચ ચિક્રીડે કુમાર્યા દાશકન્યયા ॥ ૩૪॥

વિશ્વામિત્રો બભૂવાથ મોહિતઃ શિવમાયયા ।
રેમે મેનકયા વ્યાસ વને કામવશં ગતઃ ॥ ૩૫॥

વસિષ્ઠેન વિરોધં તુ કૃતવાન્નષ્ટચેતનઃ ।
પુનઃ શિવપ્રસાદાચ્ચ બ્રાહ્મણોઽભૂત્સ એવ વૈ ॥ ૩૬॥

રાવણો વૈશ્રવાઃ કામી બભૂવ શિવમાયયા ।
સીતાં જહ્રે કુબુદ્ધિસ્તુ મોહિતો મૃત્યુમાપ ચ ॥ ૩૭॥

બૃહસ્પતિર્મુનિવરો મોહિતઃ શિવમાયયા ।
ભ્રાતૃપત્ન્યા વશી રેમે ભરદ્વાજસ્તતોઽભવત્ ॥ ૩૮॥

ઇતિ માયાપ્રભાવો હિ શઙ્કરસ્ય મહાત્મનઃ ।
વર્ણિતસ્તે મયા વ્યાસ કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૩૯॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં શિવમાયાપ્રભાવવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૫.૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૫. પઞ્ચમોઽધ્યાયઃ । મહાપાતકવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
યે પાપનિરતા જીવા મહાનરકહેતવઃ ।
ભગવંસ્તાન્ સમાચક્ષ્વ બ્રહ્મપુત્ર નમોઽસ્તુ તે ॥ ૧॥

સનત્કુમાર ઉવાચ ।
યે પાપનિરતા જીવા મહાનરકહેતવઃ ।

તે સમાસેન કથ્યન્તે સાવધાનતયા શ઼ૃણુ ॥ ૨॥

પરસ્ત્રીદ્રવ્યસઙ્કલ્પશ્ચેતસાનિષ્ટચિન્તનમ્ ।
અકાર્યાભિનિવેશશ્ચ ચતુર્ધા કર્મ માનસમ્ ॥ ૩॥

અવિબદ્ધપ્રલાપત્વમસત્યં ચાપ્રિયં ચ યત્ ।
પરોક્ષતશ્ચ પૈશુન્યં ચતુર્ધા કર્મ વાચિકમ્ ॥ ૪॥

અભક્ષ્યભક્ષણં હિંસા મિથ્યાકાર્યનિવેશનમ્ ।
પરસ્વાનામુપાદાનં ચતુર્ધા કર્મ કાયિકમ્ ॥ ૫॥

ઇત્યેતદ્ દ્વાદશવિધં કર્મ પ્રોક્તં ત્રિસાધનમ્ ।
અસ્ય ભેદાન્ પુનર્વક્ષ્યે યેષાં ફલમનન્તકમ્ ॥ ૬॥

યે દ્વિષન્તિ મહાદેવં સંસારાર્ણવતારકમ્ ।
સુમહત્પાતકં તેષાં નિરયાર્ણવગામિનામ્ ॥ ૭॥

યે શિવજ્ઞાનવક્તારં નિન્દન્તિ ચ તપસ્વિનમ્ ।
ગુરૂન્ પિતૄનથોન્મત્તાસ્તે યાન્તિ નિરયાર્ણવમ્ ॥ ૮॥

શિવનિન્દા ગુરોર્નિન્દા શિવજ્ઞાનસ્ય દૂષણમ્ ।
દેવદ્રવ્યાપહરણં દ્વિજદ્રવ્યવિનાશનમ્ ॥ ૯॥

હરન્તિ યે ચ સમ્મૂઢાશ્શિવજ્ઞાનસ્ય પુસ્તકમ્ ।
મહાન્તિ પાતકાન્યાહુરનન્તફલદાનિ ષટ્ ॥ ૧૦॥

નાભિનન્દન્તિ યે દૃષ્ટ્વા શિવપૂજાં પ્રકલ્પિતામ્ ।
ન નમન્ત્યર્ચિતં દૃષ્ટ્વા શિવલિઙ્ગં સ્તુવન્તિ ન ॥ ૧૧॥

યથેષ્ટચેષ્ટા નિઃશઙ્કાઃ સન્તિષ્ઠન્તે રમન્તિ ચ ।
ઉપચારવિનિર્મુક્તાઃ શિવાગ્રે ગુરુસન્નિધૌ ॥ ૧૨॥

સ્થાનસંસ્કારપૂજાં ચ યે ન કુર્વન્તિ પર્વસુ ।
વિધિવદ્વા ગુરૂણાં ચ કર્મયોગવ્યવસ્થિતાઃ ॥ ૧૩॥

યે ત્યજન્તિ શિવાચારં શિવભક્તાન્દ્વિષન્તિ ચ ।
અસમ્પૂજ્ય શિવજ્ઞાનં યેઽધીયન્તે લિખન્તિ ચ ॥ ૧૪॥

અન્યાયતઃ પ્રયચ્છન્તિ શ઼ૃણ્વન્ત્યુચ્ચારયન્તિ ચ ।
વિક્રીડન્તિ ચ લોભેન કુજ્ઞાનનિયમેન ચ ॥ ૧૫॥

અસંસ્કૃતપ્રદેશેષુ યથેષ્ટં સ્વાપયન્તિ ચ ।
શિવજ્ઞાનકથાક્ષેપં યઃ કૃત્વાન્યત્પ્રભાષતે ॥ ૧૬॥

ન બ્રવીતિ ચ યઃ સત્યં ન પ્રદાનં કરોતિ ચ ।
અશુચિર્વાઽશુચિસ્થાને યઃ પ્રવક્તિ શ઼ૃણોતિ ચ ॥ ૧૭॥

ગુરુપૂજામકૃત્વૈવ યઃ શાસ્ત્રં શ્રોતુમિચ્છતિ ।
ન કરોતિ ચ શુશ્રૂષામાજ્ઞાં ચ ભક્તિભાવતઃ ॥ ૧૮॥

નાભિનન્દતિ તદ્વાક્યમુત્તરં ચ પ્રયચ્છતિ ।
ગુરુકર્મણ્યસાધ્યં યત્તદુપેક્ષાં કરોતિ ચ ॥ ૧૯॥

ગુરુમાર્તમશક્તં ચ વિદેશં પ્રસ્થિતં તથા ।
વૈરિભિઃ પરિભૂતં વા યઃ સન્ત્યજતિ પાપકૃત્ ॥ ૨૦॥

તદ્ભાર્યાપુત્રમિત્રેષુ યશ્ચાવજ્ઞાં કરોતિ ચ ।
એવં સુવાચકસ્યાપિ ગુરોર્ધર્માનુદર્શિનઃ ॥ ૨૧॥

એતાનિ ખલુ સર્વાણિ કર્માણિ મુનિસત્તમ ।
સુમહત્પાતકાન્યાહુઃ શિવનિન્દાસમાનિ ચ ॥ ૨૨॥

બ્રહ્મઘ્નશ્ચ સુરાપશ્ચ સ્તેયી ચ ગુરુતલ્પગઃ ।
મહાપાતકિનસ્ત્વેતે તત્સંયોગી ચ પઞ્ચમઃ ॥ ૨૩॥

ક્રોધાલ્લોભાદ્ભયાદ્ દ્વેષાદ્બ્રાહ્મણસ્ય વધે તુ યઃ ।
મર્માન્તિકં મહાદોષમુક્ત્વા સ બ્રહ્મહા ભવેત્ ॥ ૨૪॥

બ્રાહ્મણં યઃ સમાહૂય દત્ત્વા યશ્ચાદદાતિ ચ ।
નિર્દોષં દૂષયેદ્યસ્તુ સ નરો બ્રહ્મહા ભવેત્ ॥ ૨૫॥

યશ્ચ વિદ્યાભિમાનેન નિસ્તેજયતિ સુદ્વિજમ્ ।
ઉદાસીનં સભામધ્યે બ્રહ્મહા સ પ્રકીર્તિતઃ ॥ ૨૬॥

મિથ્યાગુણૈર્ય આત્માનં નયત્યુત્કર્ષતાં બલાત્ ।
ગુણાનપિ નિરુદ્ધાસ્ય સ ચ વૈ બ્રહ્મહા ભવેત્ ॥ ૨૭॥

ગવાં વૃષાભિભૂતાનાં દ્વિજાનાં ગુરુપૂર્વકમ્ ।
યઃ સમાચરતે વિઘ્નં તમાહુર્બ્રહ્મઘાતકમ્ ॥ ૨૮॥

દેવદ્વિજગવાં ભૂમિં પ્રદત્તાં હરતે તુ યઃ ।
પ્રનષ્ટામપિ કાલેન તમાહુર્બ્રહ્મઘાતકમ્ ॥ ૨૯॥

દેવદ્વિજસ્વહરણમન્યાયેનાર્જિતં તુ યત્ ।
બ્રહ્મહત્યાસમં જ્ઞેયં પાતકં નાત્ર સંશયઃ ॥ ૩૦॥

અધીત્ય યો દ્વિજો વેદં બ્રહ્મજ્ઞાનં શિવાત્મકમ્ ।
યદિ ત્યજતિ યો મૂઢઃ સુરાપાનસ્ય તત્સમમ્ ॥ ૩૧॥

યત્કિઞ્ચિદ્ધિ વ્રતં ગૃહ્ય નિયમં યજનં તથા ।
સન્ત્યાગઃ પઞ્ચયજ્ઞાનાં સુરાપાનસ્ય તત્સમમ્ ॥ ૩૨॥

પિતૃમાતૃપરિત્યાગઃ કૂટસાક્ષ્યં દ્વિજાનૃતમ્ ।
આમિષં શિવભક્તાનામભક્ષ્યસ્ય ચ ભક્ષણમ્ ॥ ૩૩॥

વને નિરપરાધાનાં પ્રાણિનાં ચાપઘાતનમ્ ।
દ્વિજાર્થં પ્રક્ષિપેત્સાધુર્ન ધર્માર્થં નિયોજયેત્ ॥ ૩૪॥

ગવાં માર્ગે વને ગ્રામે યૈશ્ચૈવાગ્નિઃ પ્રદીયતે ।
ઇતિ પાપાનિ ઘોરાણિ બ્રહ્મહત્યાસમાનિ ચ ॥ ૩૫॥

દીનસર્વસ્વહરણં નરસ્ત્રીગજવાજિનામ્ ।
ગોભૂરજતવસ્ત્રાણામૌષધીનાં રસસ્ય ચ ॥ ૩૬॥

ચન્દનાગરુકર્પૂરકસ્તૂરીપટ્ટવાસસામ્ ।
વિક્રયસ્ત્વવિપત્તૌ યઃ કૃતો જ્ઞાનાદ્ દ્વિજાતિભિઃ ॥ ૩૭॥

હસ્તન્યાસાપહરણં રુક્મસ્તેયસમં સ્મૃતમ્ ।
કન્યાનાં વરયોગ્યાનામદાનં સદૃશે વરે ॥ ૩૮॥

પુત્રમિત્રકલત્રેષુ ગમનં ભગિનીષુ ચ ।
કુમારીસાહસં ઘોરમદ્યપસ્ત્રીનિષેવણમ્ ॥ ૩૯॥

સવર્ણાયાશ્ચ ગમનં ગુરુભાર્યાસમં સ્મૃતમ્ ।
મહાપાપાનિ ચોક્તાનિ શ◌ૃણુ ત્વમુપપાતકમ્ ॥ ૪૦॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં મહાપાતકવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૫.૫॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૬. ષષ્ઠોઽધ્યાયઃ । પાપભેદવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
દ્વિજદ્રવ્યાપહરણમપિ દાયવ્યતિક્રમઃ ।
અતિમાનોઽતિકોપશ્ચ દામ્ભિકત્વં કૃતઘ્નતા ॥ ૧॥

અત્યન્તવિષયાસક્તિઃ કાર્પણ્યં સાધુમત્સરમ્ ।
પરદારાભિગમનં સાધુકન્યાસુ દૂષણમ્ ॥ ૨॥

પરિવિત્તિઃ પરિવેત્તા યયા ચ પરિવિદ્યતે ।
તયોર્દાનં ચ કન્યાયાસ્તયોરેવ ચ યાજનમ્ ॥ ૩॥

શિવાશ્રમતરૂણાં ચ પુષ્પારામવિનાશનમ્ ।
યઃ પીડામાશ્રમસ્થાનામાચરેદલ્પિકામપિ ॥ ૪॥

સભૃત્યપરિવારસ્ય પશુધાન્યધનસ્ય ચ ।
કુપ્યધાન્યપશુસ્તેયમપાં વ્યાપાવનં તથા ॥ ૫॥

યજ્ઞારામતડાગાનાં દારાપત્યસ્ય વિક્રયમ્ ।
તીર્થયાત્રોપવાસાનાં વ્રતોપનયકર્મિણામ્ ॥ ૬॥

સ્ત્રીધનાન્યુપજીવન્તિ સ્ત્રીભિરત્યન્તનિર્જિતાઃ ।
અરક્ષણં ચ નારીણાં માયયા સ્ત્રીનિષેવણમ્ ॥ ૭॥

કાલાગતાપ્રદાનં ચ ધાન્યવૃદ્ધ્યુપસેવનમ્ ।
નિન્દિતાચ્ચ ધનાદાનં પણ્યાનાં કૂટજીવનમ્ ॥ ૮॥

વિષમારણમન્ત્રાણાં સતતં વૃષવાહનમ્ ।
ઉચ્ચાટનાભિચારં ચ ધાન્યાદાનં ભિષક્ક્રિયા ॥ ૯॥

જિહ્વાકામોપભોગાર્થં યસ્યારમ્ભઃ સુકર્મસુ ।
મૂલેનાધ્યાપકો નિત્યં વેદજ્ઞાનાદિકં ચ યત્ ॥ ૧૦॥

બ્રાહ્મ્યાદિવ્રતસન્ત્યાગશ્ચાન્યાચારનિષેવણમ્ ।
અસચ્છાસ્ત્રાધિગમનં શુષ્કતર્કાવલમ્બનમ્ ॥ ૧૧॥

દેવાગ્નિગુરુસાધૂનાં નિન્દા યા બ્રાહ્મણસ્ય ચ ।
પ્રત્યક્ષં વા પરોક્ષં વા રાજ્ઞાં મણ્ડલિનામપિ ॥ ૧૨॥

ઉત્સન્નપિતૃદેવેજ્યાઃ સ્વકર્મત્યાગિનશ્ચ યે ।
દુઃશીલા નાસ્તિકાઃ પાપાઃ સદા વાસત્યવાદિનઃ ॥ ૧૩॥

પર્વકાલે દિવા વાપ્સુ વિયોનૌ પશુયોનિષુ ।
રજસ્વલાયા યોનૌ ચ મૈથુનં યઃ સમાચરેત્ ॥ ૧૪॥

સ્ત્રીપુત્રમિત્રસમ્પ્રાપ્તે આશાચ્છેદકરાશ્ચ યે ।
જનસ્યાપ્રિયવક્તારઃ ક્રૂરાઃ સમયભેદિનઃ ॥ ૧૫॥

ભેત્તા તડાગકૂપાનાં વિક્રતારો રસસ્ય ચ ।
એકપઙ્ક્તિસ્થિતાનાં ચ પાકભેદં કરોતિ યઃ ॥ ૧૬॥

ઇત્યેતૈઃ સ્ત્રીનરાઃ પાપૈરુપપાતકિનઃ સ્મૃતાઃ ।
યુક્તા એભિસ્તથાન્યેઽપિ શ‍ૃણુ તાંસ્તુ બ્રવીમિ તે ॥ ૧૭॥

યે ગોબ્રાહ્મણકન્યાનાં સ્વામિમિત્રતપસ્વિનામ્ ।
વિનાશયન્તિ કાર્યાણિ તે નરા નારકાઃ સ્મૃતાઃ ॥ ૧૮॥

પરસ્ત્રિયાભિતપ્યન્તે યે પરદ્રવ્યસૂચકાઃ ।
પરદ્રવ્યહરા નિત્યં તૌલમિથ્યાનુસારકાઃ ॥ ૧૯॥

દ્વિજદુઃખકરા યે ચ પ્રહારં ચોદ્ધરન્તિ યે ।
સેવન્તે તુ દ્વિજાઃ શૂદ્રાં સુરાં બધ્નન્તિ કામતઃ ॥ ૨૦॥

યે પાપનિરતાઃ ક્રૂરાઃ યેઽપિ હિંસાપ્રિયા નરાઃ ।
વૃત્ત્યર્થં યેઽપિ કુર્વન્તિ દાનયજ્ઞાદિકાઃ ક્રિયાઃ ॥ ૨૧॥

ગોષ્ઠાગ્નિજલરથ્યાસુ તરુચ્છાયાનગેષુ ચ ।
ત્યજન્તિ યે પુરીષાદ્યાનારામાયતનેષુ ચ ॥ ૨૨॥

લજ્જાશ્રમપ્રાસાદેષુ મદ્યપાનરતાશ્ચ યે ।
કૃતકેલિભુજઙ્ગાશ્ચ રન્ધ્રાન્વેષણતત્પરાઃ ॥ ૨૩॥

વંશેષ્ટકાશિલાકાષ્ઠૈઃ શ‍ૃઙ્ગૈઃ શઙ્કુભિરેવ ચ ।
યે માર્ગમનુરુન્ધન્તિ પરસીમાં હરન્તિ યે ॥ ૨૪॥

કૂટશાસનકર્તારઃ કૂટકર્મક્રિયારતાઃ ।
કૂટપાકાન્નવસ્ત્રાણાં કૂટસંવ્યવહારિણઃ ॥ ૨૫॥

ધનુષઃ શસ્ત્રશલ્યાનાં કર્તા યઃ ક્રયવિક્રયી ।
નિર્દયોઽતીવ ભૃત્યેષુ પશૂનાં દમનશ્ચ યઃ ॥ ૨૬॥

મિથ્યા પ્રવદતો વાચ આકર્ણયતિ યઃ શનૈઃ ।

સ્વામિમિત્રગુરુદ્રોહી માયાવી ચપલઃ શઠઃ ॥ ૨૭॥

યે ભાર્યાપુત્રમિત્રાણિ બાલવૃદ્ધકૃશાતુરાન્ ।
ભૃત્યાનતિથિબન્ધૂંશ્ચ ત્યક્ત્વાશ્નન્તિ બુભુક્ષિતાન્ ॥ ૨૮॥

યઃ સ્વયં મિષ્ટમશ્નાતિ વિપ્રેભ્યો ન પ્રયચ્છતિ ।
વૃથાપાકઃ સ વિજ્ઞેયો બ્રહ્મવાદિષુ ગર્હિતઃ ॥ ૨૯॥

નિયમાન્ સ્વયમાદાય યે ત્યજન્ત્યજિતેન્દ્રિયાઃ ।
પ્રવ્રજ્યાવાસિતા યે ચ હરસ્યાસ્યપ્રભેદકાઃ ॥ ૩૦॥

યે તાડયન્તિ ગાં ક્રૂરા દમયન્તે મુહુર્મુહુઃ ।
દુર્બલાન્યે ન પુષ્ણન્તિ સતતં યે ત્યજન્તિ ચ ॥ ૩૧॥

પીડયન્ત્યતિભારેણાસહન્તં વાહયન્તિ ચ ।
યોજયન્ત્યકૃતાહારાન્ન વિમુઞ્ચન્તિ સંયતાન્ ॥ ૩૨॥

યે ભારક્ષતરોગાર્તાન્ ગોવૃષાંશ્ચ ક્ષુધાતુરાન્ ।
ન પાલયન્તિ યત્નેન ગોઘ્નાસ્તે નારકાઃ સ્મૃતાઃ ॥ ૩૩॥

વૃષાણાં વૃષણાન્યે ચ પાપિષ્ઠા ગાલયન્તિ ચ ।
વાહયન્તિ ચ ગાં વન્ધ્યાં મહાનારકિનો નરાઃ ॥ ૩૪॥

આશયા સમનુપ્રાપ્તાન્ ક્ષુત્તૃષ્ણાશ્રમકર્શિતાન્ ।
અતિથીંશ્ચ તથાનાથાન્ સ્વતન્ત્રાન્ ગૃહમાગતાન્ ॥ ૩૫॥

અન્નાભિલાષાન્ દીનાન્વા બાલવૃદ્ધકૃશાતુરાન્ ।
નાનુકમ્પન્તિ યે મૂઢાસ્તે યાન્તિ નરકાર્ણવમ્ ॥ ૩૬॥

ગૃહેષ્વર્થા નિવર્તન્તે શ્મશાનાદપિ બાન્ધવાઃ ।
સુકૃતં દુષ્કૃતં ચૈવ ગચ્છન્તમનુગચ્છતિ ॥ ૩૭॥

અજાવિકો માહિષિકઃ સામુદ્રો વૃષલીપતિઃ ।
શૂદ્રવત્ક્ષત્રવૃત્તિશ્ચ નારકી સ્યાદ્ દ્વિજાધમઃ ॥ ૩૮॥

શિલ્પિનઃ કારવો વૈદ્યા હેમકારા નૃપધ્વજાઃ ।
ભૃતકાઃ કૂટસંયુક્તાઃ સર્વે તે નારકાઃ સ્મૃતાઃ ॥ ૩૯॥

યશ્ચોચિતમતિક્રમ્ય સ્વેચ્છયૈવાહરેત્કરમ્ ।
નરકે પચ્યતે સોઽપિ યોઽપિ દણ્ડરુચિર્નરઃ ॥ ૪૦॥

ઉત્કોચકૈ રુચિક્રીતૈસ્તસ્કરૈશ્ચ પ્રપીડ્યતે ।
યસ્ય રાજ્ઞઃ પ્રજા રાષ્ટ્રે પચ્યતે નરકેષુ સઃ ॥ ૪૧॥

યે દ્વિજાઃ પરિગૃહ્ણન્તિ નૃપસ્યાન્યાયવર્તિનઃ ।
તે પ્રયાન્તિ તુ ઘોરેષુ નરકેષુ ન સંશયઃ ॥ ૪૨॥

અન્યાયાત્સમુપાદાય દ્વિજેભ્યો યઃ પ્રયચ્છતિ ।
પ્રજાભ્યઃ પચ્યતે સોઽપિ નરકેષુ નૃપો યથા ॥ ૪૩॥

પારદારિકચૌરાણાં ચણ્ડાનાં વિદ્યતે ત્વઘમ્ ।
પરદારરતસ્યાપિ રાજ્ઞો ભવતિ નિત્યશઃ ॥ ૪૪॥

અચૌરં ચૌરવત્પશ્યેચ્ચૌરં વાચૌરરૂપિણમ્ ।
અવિચાર્ય નૃપસ્તસ્માદ્ ઘાતયન્નરકં વ્રજેત્ ॥ ૪૫॥

ઘૃતતૈલાન્નપાનાનિ મધુમાંસસુરાસવમ્ ।
ગુડેક્ષુશાકદુગ્ધાનિ દધિમૂલફલાનિ ચ ॥ ૪૬॥

તૃણં કાષ્ઠં પત્રપુષ્પમૌષધં ચાત્મભોજનમ્ ।
ઉપાનત્છત્રશકટમાસનં ચ કમણ્ડલુમ્ ॥ ૪૭॥

તામ્રસીસત્રપુઃ શસ્ત્રં શઙ્ખાદ્યં ચ જલોદ્ભવમ્ ।
વાદ્યં ચ વૈણવં ચાન્યદ્ગૃહોપસ્કરણાનિ ચ ॥ ૪૮॥

ઔર્ણકાર્પાસકૌશેયપટ્ટસૂત્રોદ્ભવાનિ ચ ।
સ્થૂલસૂક્ષ્માણિ વસ્ત્રાણિ યે લોભાદ્ધિ હરન્તિ ચ ॥ ૪૯॥

એવમાદીનિ ચાન્યાનિ દ્રવ્યાણિ વિવિધાનિ ચ ।
નરકેષુ ધ્રુવં યાન્તિ ચાપહૃત્યાલ્પકાનિ ચ ॥ ૫૦॥

તદ્વા યદ્વા પરદ્રવ્યમપિ સર્ષપમાત્રકમ્ ।
અપહૃત્ય નરા યાન્તિ નરકં નાત્ર સંશયઃ ॥ ૫૧॥

એવમાદ્યૈર્નરઃ પાપૈરુત્ક્રાન્તિસમનન્તરમ્ ।
શરીરયાતનાર્થાય સર્વાકારમવાપ્નુયાત્ ॥ ૫૨॥

યમલોકં વ્રજન્ત્યેતે શરીરેણ યમાજ્ઞયા ।
યમદૂતૈર્મહાઘોરૈર્નીયમાનાઃ સુદુઃખિતાઃ ॥ ૫૩॥

દેવતિર્યઙ્મનુષ્યાણામધર્મનિરતાત્મનામ્ ।
ધર્મરાજઃ સ્મૃતઃ શાસ્તા સુઘોરૈર્વિવિધૈર્વધૈઃ ॥ ૫૪॥

નિયમાચારયુક્તાનાં પ્રમાદાત્સ્ખલિતાત્મનામ્ ।
પ્રાયશ્ચિત્તૈર્ગુરુઃ શાસ્તા ન બુધૈરિષ્યતે યમઃ ॥ ૫૫॥

પારદારિકચૌરાણામન્યાયવ્યવહારિણામ્ ।
નૃપતિઃ શાસકઃ પ્રોક્તઃ પ્રચ્છન્નાનાં સ ધર્મ્મરાટ્ ॥ ૫૬॥

તસ્માત્ કૃતસ્ય પાપસ્ય પ્રાયશ્ચિત્તં સમાચરેત્ ।
નાભુક્તસ્યાન્યથા નાશઃ કલ્પકોટિશતૈરપિ ॥ ૫૭॥

યઃ કરોતિ સ્વયં કર્મ કારયેચ્ચાનુમોદયેત્ ।
કાયેન મનસા વાચા તસ્ય પાપગતિઃ ફલમ્ ॥ ૫૮॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં પાપભેદવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૫.૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૭. સપ્તમોઽધ્યાયઃ । નરકલોકમાર્ગયમદૂતસ્વરૂપવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
અથ પાપૈર્નરા યાન્તિ યમલોકં ચતુર્વિધૈઃ ।
સન્ત્રાસજનનં ઘોરં વિવશાઃ સર્વદેહિનઃ ॥ ૧॥

ગર્ભસ્થૈર્જાયમાનૈશ્ચ બાલૈસ્તરુણમધ્યમૈઃ ।
સ્ત્રીપુન્નપુંસકૈર્જીવૈર્જ્ઞાતવ્યં સર્વજન્તુષુ ॥ ૨॥

શુભાશુભફલં ચાત્ર દેહિનાં સંવિચાર્યતે ।
ચિત્રગુપ્તાદિભિઃ સર્વૈઃ વસિષ્ઠપ્રમુખૈસ્તથા ॥ ૩॥

ન કેચિત્પ્રાણિનઃ સન્તિ યે ન યાન્તિ યમક્ષયમ્ ।
અવશ્યં હિ કૃતં કર્મ ભોક્તવ્યં તદ્વિચાર્યતામ્ ॥ ૪॥

તત્ર યે શુભકર્માણઃ સૌમ્યચિત્તા દયાન્વિતાઃ ।
તે નરા યાન્તિ સૌમ્યેન પૂર્વં યમનિકેતનમ્ ॥ ૫॥

યે પુનઃ પાપકર્માણઃ પાપા દાનવિવર્જિતાઃ ।
તે ઘોરેણ પથા યાન્તિ દક્ષિણેન યમાલયમ્ ॥ ૬॥

ષડશીતિસહસ્રાણિ યોજનાનામતીત્ય તત્ ।
વૈવસ્વતપુરં જ્ઞેયં નાનારૂપમવસ્થિતમ્ ॥ ૭॥

સમીપસ્થમિવાભાતિ નરાણાં પુણ્યકર્મણામ્ ।
પાપિનામતિદૂરસ્થં યથા રૌદ્રેણ ગચ્છતામ્ ॥ ૮॥

તીક્ષ્ણકણ્ટકયુક્તેન શર્કરાવિચિતેન ચ ।
ક્ષુરધારાનિભૈસ્તીક્ષ્ણૈઃ પાષાણૈ રચિતેન ચ ॥ ૯॥

ક્વચિત્પઙ્કેન મહતા જલૌકાભિશ્ચ સઙ્કુલૈઃ ।
લોહસૂચીનિભૈર્દર્ભૈઃ સમ્પન્નેન પથા ક્વચિત્ ॥ ૧૦॥

તટપ્રાયાતિવિષમૈઃ પર્વતૈર્વૃક્ષસઙ્કુલૈઃ ।
પ્રતપ્તાઙ્ગારયુક્તેન યાન્તિ માર્ગેણ દુઃખિતાઃ ॥ ૧૧॥

ક્વચિદ્વિષમગર્તૈશ્ચ ક્વચિલ્લોષ્ઠૈઃ સુદુષ્કરૈઃ ।
સુતપ્તબાલુકાભિશ્ચ તથા તીક્ષ્ણૈશ્ચ શઙ્કુભિઃ ॥ ૧૨॥

અનેકશાખાવિતતૈર્વ્યાપ્તં વંશવનૈઃ ક્વચિત્ ।
કષ્ટેન તમસા માર્ગેણાનાલમ્બેન કુત્રચિત્ ॥ ૧૩॥

અયઃ શૃઙ્ગાટકૈસ્તીક્ષ્ણૈઃ ક્વચિદ્દાવાગ્નિના પુનઃ ।
ક્વચિત્તપ્તશિલાભિશ્ચ ક્વચિદ્વ્યાપ્તં હિમેન ચ ॥ ૧૪॥

ક્વચિદ્વાલુકયા વ્યાપ્તમાકણ્ઠાન્તઃ પ્રવેશયા ।
ક્વચિદ્દુષ્ટામ્બુના વ્યાપ્તં ક્વચિચ્ચ કરિષાગ્નિના ॥ ૧૫॥

ક્વચિત્ સિંહૈર્વૃકૈર્વ્યાઘ્રૈર્મશકૈશ્ચ સુદારુણૈઃ ।
ક્વચિન્મહાજલૌકાભિઃ ક્વચિચ્ચાજગરૈસ્તથા ॥ ૧૬॥

મક્ષિકાભિશ્ચ રૌદ્રાભિઃ ક્વચિત્ સર્પૈર્વિષોલ્બણૈઃ ।
મત્તમાતઙ્ગયૂથૈશ્ચ બલોન્મત્તૈઃ પ્રમાથિભિઃ ॥ ૧૭॥

પન્થાનમુલ્લિખદ્ભિશ્ચ સૂકરૈસ્તીક્ષ્ણદંષ્ટ્રિભિઃ ।
તીક્ષ્ણશૃઙ્ગૈશ્ચ મહિષૈઃ સર્વભૂતૈશ્ચ શ્વાપદૈઃ ॥ ૧૮॥

ડાકિનીભિશ્ચ રૌદ્રાભિર્વિકરાલૈશ્ચ રાક્ષસૈઃ ।
વ્યાધિભિશ્ચ મહાઘોરૈઃ પીડ્યમાના વ્રજન્તિ હિ ॥ ૧૯॥

મહાધૂલિવિમિશ્રેણ મહાચણ્ડેન વાયુના ।
મહાપાષાણવર્ષેણ હન્યમાના નિરાશ્રયાઃ ॥ ૨૦॥

ક્વચિદ્વિદ્યુત્પ્રપાતેન દહ્યમાના વ્રજન્તિ ચ ।
મહતા બાણવર્ષેણ વિધ્યમાનાશ્ચ સર્વતઃ ॥ ૨૧॥

પતદ્ભિર્વજ્રપાતૈશ્ચ ઉલ્કાપાતૈશ્ચ દારુણૈઃ ।
પ્રદીપ્તાઙ્ગારવર્ષેણ દહ્યમાનાશ્ચ સન્તિ હિ ॥ ૨૨॥

મહતા પાંસુવર્ષેણ પૂર્યમાણા રુદન્તિ ચ ।
મહામેઘરવૈર્ઘોરૈસ્ત્રસ્યન્તે ચ મુહુર્મુહુઃ ॥ ૨૩॥

નિશિતાયુધવર્ષેણ ભિદ્યમાનાશ્ચ સર્વતઃ ।
મહાક્ષારામ્બુધારાભિઃ સિચ્યમાના વ્રજન્તિ ચ ॥ ૨૪॥

મહીશીતેન મરુતા રૂક્ષેણ પરુષેણ ચ ।
સમન્તાદ્ બાધ્યમાનાશ્ચ શુષ્યન્તે સઙ્કુચન્તિ ચ ॥ ૨૫॥

ઇત્થં માર્ગેણ રૌદ્રેણ પાથેયરહિતેન ચ ।
નિરાલમ્બેન દુર્ગેણ નિર્જલેન સમન્તતઃ ॥ ૨૬॥

વિષમેણૈવ મહતા નિર્જનાપાશ્રયેણ ચ ।
તમોરૂપેણ કષ્ટેન સર્વદુષ્ટાશ્રયેણ ચ ॥ ૨૭॥

નીયન્તે દેહિનઃ સર્વે યે મૂઢાઃ પાપકર્મિણઃ ।
યમદૂતૈર્મહાઘોરૈસ્તદાજ્ઞાકારિભિર્બલાત્ ॥ ૨૮॥

એકાકિનઃ પરાધીના મિત્રબન્ધુવિવર્જિતાઃ ।
શોચન્તઃ સ્વાનિ કર્માણિ રુદન્તશ્ચ મુહુર્મુહુઃ ॥ ૨૯॥

પ્રેતા ભૂત્વા વિવસ્ત્રાશ્ચ શુષ્કકણ્ઠૌષ્ઠતાલુકાઃ ।
અસૌમ્યા ભયભીતાશ્ચ દહ્યમાનાઃ ક્ષુધાન્વિતાઃ ॥ ૩૦॥

બદ્ધાઃ શ્ૃઙ્ખલયા કેચિદુત્તા નપાદકા નરાઃ ।
કૃષ્યન્તે કૃષ્યમાણાશ્ચ યમદૂતૈર્બલોત્કટૈઃ ॥ ૩૧॥

ઉરસાધોમુખાશ્ચાન્યે ઘૃષ્યમાણાઃ સુદુઃખિતાઃ ।
કેશપાશનિબન્ધેન સઙ્કૃષ્યન્તે ચ રજ્જુના ॥ ૩૨॥

લલાટે ચાઙ્કુશેનાન્યે ભિન્ના દુષ્યન્તિ દેહિનઃ ।
ઉત્તાનાઃ કણ્ટકપથા ક્વચિદઙ્ગારવર્ત્મના ॥ ૩૩॥

પશ્ચાદ્ બાહુનિબદ્ધાશ્ચ જઠરેણ પ્રપીડિતાઃ ।

પૂરિતાઃ શ‌ૃઙ્ખલાભિશ્ચ હસ્તયોશ્ચ સુકીલિતાઃ ॥ ૩૪॥

ગ્રીવાપાશેન કૃષ્યન્તે પ્રયાન્ત્યન્યે સુદુઃખિતાઃ ।
જિહ્વાઙ્કુશપ્રવેશેન રજ્જ્વાકૃષ્યન્ત એવ તે ॥ ૩૫॥

નાસાભેદેન રજ્જ્વા ચ ત્વાકૃષ્યન્તે તથાપરે ।
ભિન્નાઃ કપોલયો રજ્જ્વા કૃષ્યન્તેઽન્યે તથૌષ્ઠયોઃ ॥ ૩૬॥

છિન્નાગ્રપાદહસ્તાશ્ચ છિન્નકર્ણોષ્ઠનાસિકાઃ ।
સઞ્છિન્નશિશ્નવૃષણાઃ છિન્નભિન્નાઙ્ગસન્ધયઃ ॥ ૩૭॥

આભિદ્યમાનાઃ કુન્તૈશ્ચ ભિદ્યમાનાશ્ચ સાયકૈઃ ।
ઇતશ્ચેતશ્ચ ધાવન્તઃ ક્રન્દમાના નિરાશ્રયાઃ ॥ ૩૮॥

મુદ્ગરૈર્લોહદણ્ડૈશ્ચ હન્યમાના મુહુર્મુહુઃ ।
કણ્ટકૈર્વિવિધૈર્ઘોરૈર્જ્વલનાર્કસમપ્રભૈઃ ॥ ૩૯॥

ભિન્દિપાલૈર્વિભિદ્યન્તે સ્રવતઃ પૂયશોણિતમ્ ।
શકૃતા કૃમિદિગ્ધાશ્ચ નીયન્તે વિવશા નરાઃ ॥ ૪૦॥

યાચમાનાશ્ચ સલિલમન્નં વાપિ બુભુક્ષિતાઃ ।
છાયાં પ્રાર્થયમાનાશ્ચ શીતાર્તાશ્ચાનલં પુનઃ ॥ ૪૧॥

દાનહીનાઃ પ્રયાન્ત્યેવં પ્રાર્થયન્તઃ સુખં નરાઃ ।
ગૃહીતદાનપાથેયાઃ સુખં યાન્તિ યમાલયમ્ ॥ ૪૨॥

એવં ન્યાયેન કષ્ટેન પ્રાપ્તાઃ પ્રેતપુરં યદા ।
પ્રજ્ઞાપિતાસ્તતો દૂતૈર્નિવેશ્યન્તે યમાગ્રતઃ ॥ ૪૩॥

તત્ર યે શુભકર્માણસ્તાંસ્તુ સમ્માનયેદ્યમઃ ।
સ્વાગતાસનદાનેન પાદ્યાર્ઘ્યેણ પ્રિયેણ ચ ॥ ૪૪॥

ધન્યા યૂયં મહાત્માનો નિગમોદિતકારિણઃ ।
યૈશ્ચ દિવ્યસુખાર્થાય ભવદ્ભિઃ સુકૃતં કૃતમ્ ॥ ૪૫॥

દિવ્યં વિમાનમારુહ્ય દિવ્યસ્ત્રીભોગભૂષિતમ્ ।
સ્વર્ગં ગચ્છધ્વમમલં સર્વકામસમન્વિતમ્ ॥ ૪૬॥

તત્ર ભુક્ત્વા મહાભોગાનન્તે પુણ્યસ્ય સઙ્ક્ષયાત્ ।
યત્કિઞ્ચિદલ્પમશુભં પુનસ્તદિહ ભોક્ષ્યથ ॥ ૪૭॥

ધર્માત્માનો નરા યે ચ મિત્રભૂતા ઇવાત્મનઃ ।
સૌમ્યં મુખં પ્રપશ્યન્તિ ધર્મરાજનમેવ ચ ॥ ૪૮॥

યે પુનઃ ક્રૂરકર્માણસ્તે પશ્યન્તિ ભયાનકમ્ ।
દંષ્ટ્રાકરાલવદનં ભૃકુટીકુટિલેક્ષણમ્ ॥ ૪૯॥

ઊર્ધ્વકેશં મહાશ્મશ્રુમૂર્ધ્વપ્રસ્ફુરિતાધરમ્ ।
અષ્ટાદશભુજં ક્રુદ્ધં નીલાઞ્જનચયોપમમ્ ॥ ૫૦॥

સર્વાયુધોદ્ધૃતકરં સર્વદણ્ડેન તર્જયન્ ।
મહામહિષમારૂઢં દીપ્તાગ્નિસમલોચનમ્ ॥ ૫૧॥

રક્તમાલ્યામ્બરધરં મહામેરુમિવોચ્છ્રિતમ્ ।
પ્રલયામ્બુદનિર્ઘોષં પિબન્નિવ મહોદધિમ્ ॥ ૫૨॥

ગ્રસન્તમિવ શૈલેન્દ્રમુદ્ગિરન્તમિવાનલમ્ ।
મૃત્યુશ્ચૈવ સમીપસ્થઃ કાલાનલસમપ્રભઃ ॥ ૫૩॥

કાલશ્ચાઞ્જનસઙ્કાશઃ કૃતાન્તશ્ચ ભયાનકઃ ।
મારી ચોગ્રમહામારી કાલરાત્રિશ્ચ દારુણા ॥ ૫૪॥

વિવિધા વ્યાધયઃ કુષ્ઠા નાનારૂપા ભયાવહાઃ ।
શક્તિશૂલાઙ્કુશધરાઃ પાશચક્રાસિપાણયઃ ॥ ૫૫॥

વજ્રતુણ્ડધરા રૌદ્રાઃ ક્ષુરતૂણધનુર્દ્ધરાઃ ।
નાનાયુધધરાઃ સર્વે મહાવીરા ભયઙ્કરાઃ ॥ ૫૬॥

અસઙ્ખ્યાતા મહાવીરાઃ કાલાઞ્જનસમપ્રભાઃ ।
સર્વાયુધોદ્યતકરા યમદૂતા ભયાનકાઃ ॥ ૫૭॥

અનેન પરિચારેણ વૃતં તં ઘોરદર્શનમ્ ।
યમં પશ્યન્તિ પાપિષ્ઠાશ્ચિત્રગુપ્તં ચ ભીષણમ્ ॥ ૫૮॥

નિર્ભર્ત્સયતિ ચાત્યન્તં યમસ્તાન્પાપકર્મણઃ ।
ચિત્રગુપ્તશ્ચ ભગવાન્ ધર્મવાક્યૈઃ પ્રબોધયેત્ ॥ ૫૯॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં નરકલોકમાર્ગયમદૂતસ્વરૂપવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૫.૭॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૮. અષ્ટમોઽધ્યાયઃ । નરકલોકવર્ણનમ્ ।

ચિત્રગુપ્ત ઉવાચ ।
ભો ભો દુષ્કૃતકર્માણઃ પરદ્રવ્યાપહારકાઃ ।
ગર્વિતા રૂપવીર્યેણ પરદારાવમર્દકાઃ ॥ ૧॥

યત્ સ્વયં ક્રિયતે કર્મ તદિદં ભુજ્યતે પુનઃ ।
તત્કિમાત્મોપઘાતાર્થં ભવદ્ભિર્દુષ્કૃતં કૃતમ્ ॥ ૨॥

ઇદાનીં કિં પ્રલપ્યધ્વં પીડ્યમાનાઃ સ્વકર્મભિઃ ।
ભુજ્યન્તાં સ્વાનિ કર્માણિ નાસ્તિ દોષો હિ કસ્યચિત્ ॥ ૩॥

સનત્કુમાર ઉવાચ ।
એવં તે પૃથિવીપાલાઃ સમ્પ્રાપ્તાસ્તત્સમીપતઃ ।
સ્વકીયૈઃ કર્મભિર્ઘોરૈર્દુષ્કર્મબલદર્પિણઃ ॥ ૪॥

તાનપિ ક્રોધસંયુક્તશ્ચિત્રગુપ્તો મહાપ્રભુઃ ।
સંશિક્ષયતિ ધર્મજ્ઞો યમરાજાનુશિક્ષયા ॥ ૫॥

ચિત્રગુપ્ત ઉવાચ ।
ભો ભો નૃપા દુરાચારાઃ પ્રજાવિધ્વંસકારિણઃ ।
અલ્પકાલસ્ય રાજ્યસ્ય કૃતે કિં દુષ્કૃતં કૃતમ્ ॥ ૬॥

રાજ્યભોગેન મોહેન બલાદન્યાયતઃ પ્રજાઃ ।
યદ્દણ્ડિતાઃ ફલં તસ્ય ભુજ્યતામધુના નૃપાઃ ॥ ૭॥

ક્વ તદ્રાજ્યં કલત્રં ચ યદર્થમશુભં કૃતમ્ ।
તત્સર્વં સમ્પરિત્યજ્ય યૂયમેકાકિનઃ સ્થિતાઃ ॥ ૮॥

પશ્યામિ તદ્બલં નષ્ટં યેન વિધ્વંસિતાઃ પ્રજાઃ ।
યમદૂતૈર્યોજ્યમાના અધુના કીદૃશં ભવેત્ ॥ ૯॥

સનત્કુમાર ઉવાચ ।
એવં બહુવિધૈર્વાક્યૈરુપલબ્ધા યમેન તે ।
સ્વાનિ કર્માણિ શોચન્તિ તૂષ્ણીં તિષ્ઠન્તિ પાર્થિવાઃ ॥ ૧૦॥

ઇતિ કર્મ સમુદ્દિશ્ય નૃપાણાં ધર્મરાડ્ યમઃ ।
તત્પાપપઙ્કશુદ્ધ્યર્થમિદં દૂતાન્ બ્રવીતિ ચ ॥ ૧૧॥

યમરાજ ઉવાચ ।
ભો ભોશ્ચણ્ડ મહાચણ્ડ ગૃહીત્વા નૃપતીન્બલાત્ ।
નિયમેન વિશુધ્ધ્વં ક્રમેણ નરકાગ્નિષુ ॥ ૧૨॥

સનત્કુમાર ઉવાચ ।
તતઃ શીઘ્રં સમાદાય નૃપાન્ સઙ્ગૃહ્ય પાદયોઃ ।
ભ્રામયિત્વા તુ વેગેન નિક્ષિપ્યોર્ધ્વં પ્રગૃહ્ય ચ ॥ ૧૩॥

સર્વપ્રાયેણ મહતાતીવ તપ્તે શિલાતલે ।
આસ્ફાલયન્તિ તરસા વજ્રેણેવ મહાદ્રુમાન્ ॥ ૧૪॥

તતઃ સ રક્તં શ્રોત્રેણ સ્રવતે જર્જરીકૃતઃ ।
નિઃસંજ્ઞઃ સ તદા દેહી નિશ્ચેષ્ટઃ સમ્પ્રજાયતે ॥ ૧૫॥

તતઃ સ વાયુના સ્પૃષ્ટઃ સ તૈરુજ્જીવિતઃ પુનઃ ।
તતઃ પાપવિશુદ્ધ્યર્થં ક્ષિપન્તિ નરકાર્ણવે ॥ ૧૬॥

અષ્ટાવિંશતિસઙ્ખ્યાભિઃ ક્ષિત્યધઃ સપ્તકોટયઃ ।
સપ્તમસ્ય તલસ્યાન્તે ઘોરે તમસિ સંસ્થિતઃ ॥ ૧૭॥

ઘોરાખ્યા પ્રથમા કોટિઃ સુઘોરા તદધઃ સ્થિતા ।
અતિઘોરા મહાઘોરા ઘોરરૂપા ચ પઞ્ચમી ॥ ૧૮॥

ષષ્ઠી તલાતલાખ્યા ચ સપ્તમી ચ ભયાનકા ।
અષ્ટમી કાલરાત્રિશ્ચ નવમી ચ ભયોત્કટા ॥ ૧૯॥

દશમી તદધશ્ચણ્ડા મહાચણ્ડા તતોઽપ્યધઃ ।
ચણ્ડકોલાહલા ચાન્યા પ્રચણ્ડા ચણ્ડનાયિકા ॥ ૨૦॥

પદ્મા પદ્માવતી ભીતા ભીમા ભીષણનાયિકા ।
કરાલા વિકરાલા ચ વજ્રા વિંશતિમા સ્મૃતા ॥ ૨૧॥

ત્રિકોણા પઞ્ચકોણા ચ સુદીર્ઘા ચાખિલાર્તિદા ।
સમા ભીમબલાભોગ્રા દીપ્તપ્રાયેતિ ચાષ્ટમી ॥ ૨૨॥

ઇતિ તે નામતઃ પ્રોક્તા ઘોરા નરકકોટયઃ ।
અષ્ટાવિંશતિરેવૈતાઃ પાપાનાં યાતનાત્મિકાઃ ॥ ૨૩॥

તાસાં ક્રમેણ વિજ્ઞેયાઃ પઞ્ચ પઞ્ચૈવ નાયકાઃ ।
પ્રત્યેકં સર્વકોટીનાં નામતઃ સન્નિબોધત ॥ ૨૪॥

રૌરવઃ પ્રથમસ્તેષાં રુદન્તે યત્ર દેહિનઃ ।
મહારૌરવપીડાભિર્મહાન્તોઽપિ રુદન્તિ ચ ॥ ૨૫॥

તતઃ શીતં તથા ચોષ્ણં પઞ્ચાદ્યા નાયકાઃ સ્મૃતાઃ ।
સુઘોરઃ સુમહાતીક્ષ્ણસ્તથા સઞ્જીવનઃ સ્મૃતઃ ॥ ૨૬॥

મહાતમો વિલોમશ્ચ વિલોપશ્ચાપિ કણ્ટકઃ ।
તીવ્રવેગઃ કરાલશ્ચ વિકરાલઃ પ્રકમ્પનઃ ॥ ૨૭॥

મહાવક્રશ્ચ કાલશ્ચ કાલસૂત્રઃ પ્રગર્જનઃ ।
સૂચીમુખઃ સુનેતિશ્ચ ખાદકઃ સુપ્રપીડનઃ ॥ ૨૮॥

કુમ્ભીપાકસુપાકૌ ચ ક્રકચશ્ચાતિદારુણઃ ।
અઙ્ગારરાશિભવનં મેદોઽસૃક્પ્રહિતસ્તતઃ ॥ ૨૯॥

તીક્ષ્ણતુણ્ડશ્ચ શકુનિર્મહાસંવર્તકઃ ક્રતુઃ ।
તપ્તજન્તુઃ પઙ્કુલેપઃ પ્રતિમાંસસ્ત્રપૂદ્ભવઃ ॥ ૩૦॥

ઉચ્છ્વાસઃ સુનિરુચ્છ્વાસો સુદીર્ઘઃ કૂટશાલ્મલિઃ ।
દુરિષ્ટઃ સુમહાવાદઃ પ્રવાહઃ સુપ્રતાપનઃ ॥ ૩૧॥

તતો મેઘો વૃષઃ શાલ્મઃ સિંહવ્યાઘ્રગજાનનાઃ ।
શ્વસૂકરાજમહિષઘૂકકોકવૃકાનનાઃ ॥ ૩૨॥

ગ્રાહકુમ્ભીનનક્રાખ્યાઃ સર્પકૂર્માખ્યવાયસાઃ ।
ગૃધ્રોલૂકહલૌકાખ્યાઃ શાર્દૂલક્રથકર્કટાઃ ॥ ૩૩॥

મણ્ડૂકઃ પૂતિવક્ત્રાશ્ચ રક્તાક્ષઃ પૂતિમૃત્તિકાઃ ।
કણધૂમ્રસ્તથાગ્નિશ્ચ કૃમિગન્ધિવપુસ્તથા ॥ ૩૪॥

અગ્નીધ્રશ્ચાપ્રતિષ્ઠશ્ચ રુધિરાભઃ શ્વભોજનઃ ।
લાલાભક્ષાન્ત્રભક્ષૌ ચ સર્વભક્ષઃ સુદારુણઃ ॥ ૩૫॥

કણ્ટકઃ સુવિશાલશ્ચ વિકટઃ કટપૂતનઃ ।
અમ્બરીષઃ કટાહશ્ચ કષ્ટા વૈતરણી નદી ॥ ૩૬॥

સુતપ્તલોહશયન એકપાદઃ પ્રપૂરણઃ ।
અસિતાલવનં ઘોરમસ્થિભઙ્ગઃ સુપૂરણઃ ॥ ૩૭॥

વિલાતસોઽસુયન્ત્રોપિ કૂટપાશઃ પ્રમર્દનઃ ।
મહાચૂરર્ણોઽસુચૂર્ણોઽપિ તપ્તલોહમયં તથા ॥ ૩૮॥

પર્વતઃ ક્ષુરધારા ચ તથા યમલપર્વતઃ ।
મૂત્રવિષ્ઠાશ્રુકૂપશ્ચ ક્ષારકૂપશ્ચ શીતલઃ ॥ ૩૯॥

મુસલોલૂખલં યન્ત્રં શિલાશકટલાઙ્ગલમ્ ।
તાલપત્રાસિગહનં મહાશકટમણ્ડપમ્ ॥ ૪૦॥

સમ્મોહમસ્થિભઙ્ગશ્ચ તપ્તશ્ચલમયોગુડમ્ ।
બહુદુઃખં મહાક્લેશઃ કશ્મલં સમલં મલાત્ ॥ ૪૧॥

હાલાહલો વિરૂપશ્ચ સ્વરૂપશ્ચ યમાનુગઃ ।
એકપાદસ્ત્રિપાદશ્ચ તીવ્રશ્ચાચીવરં તમઃ ॥ ૪૨॥

અષ્ટાવિંશતિરિત્યેતે ક્રમશઃ પઞ્ચપઞ્ચકમ્ ।
કોટીનામાનુપૂર્વ્યેણ પઞ્ચ પઞ્ચૈવ નાયકાઃ ॥ ૪૩॥

રૌરવાય પ્રબોધ્યન્તે નરકાણાં શતં સ્મૃતમ્ ।
ચત્વારિંશચ્ચ તત્પ્રોક્તં મહાનરકમણ્ડલમ્ ॥ ૪૪॥

ઇતિ તે વ્યાસ સમ્પ્રોક્તા નરકસ્ય સ્થિતિર્મયા ।
પ્રસઙ્ખ્યાનાચ્ચ વૈરાગ્યં શૃણુ પાપગતિં ચ તામ્ ॥ ૪૫॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં નરકલોકવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૫.૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૯. નવમોઽધ્યાયઃ । નરકગતિવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
એષુ પાપાઃ પ્રપચ્યન્તે શોષ્યન્તે નરકાગ્નિષુ ।
યાતનાભિર્વિચિત્રાભિરાસ્વકર્મક્ષયાદ્ ભૃશમ્ ॥ ૧॥

સ્વમલપ્રક્ષયાદ્યદ્વદગ્નૌ ધાસ્યન્તિ ધાતવઃ ।
તત્ર પાપક્ષયાત્પાપા નરાઃ કર્માનુરૂપતઃ ॥ ૨॥

સુગાઢં હસ્તયોર્બદ્ધ્વા તતઃ શૃઙ્ખલયા નરાઃ ।
મહાવૃક્ષાગ્રશાખાસુ લમ્બ્યન્તે યમકિઙ્કરૈઃ ॥ ૩॥

તતસ્તે સર્વયત્નેન ક્ષિપ્તા દોલન્તિ કિઙ્કરૈઃ ।
દોમ્યન્તશ્ચાતિવેગેન વિસંજ્ઞા યાન્તિ યોજનમ્ ॥ ૪॥

અન્તરિક્ષસ્થિતાનાં ચ લોહભારશતં પુનઃ ।
પાદયોર્બધ્યતે તેષાં યમદૂતૈર્મહાબલૈઃ ॥ ૫॥

તેન ભારેણ મહતા પ્રભૃશં તાડિતા નરાઃ ।
ધ્યાયન્તિ સ્વાનિ કર્માણિ તૂષ્ણીં તિષ્ઠન્તિ નિશ્ચલાઃ ॥ ૬॥

તતોઽઙ્કુશૈરગ્નિવર્ણૈર્લોહદણ્ડૈશ્ચ દારુણૈઃ ।
હન્યન્તે કિઙ્કરૈર્ઘોરૈઃ સમન્તાત્પાપકર્મિણઃ ॥ ૭॥

તતઃ ક્ષારેણ દીપ્તેન વહ્નેરપિ વિશેષતઃ ।
સમન્તતઃ પ્રલિપ્યન્તે તીવ્રેણ તુ પુનઃ પુનઃ ॥ ૮॥

દ્રુતેનાત્યન્તલિપ્તેન કૃત્તાઙ્ગા જર્જરીકૃતાઃ ।
પુનર્વિદાર્ય ચાઙ્ગાનિ શિરસઃ પ્રભૃતિ ક્રમાત્ ॥ ૯॥

વૃન્તાકવત્પ્રપચ્યન્તે તપ્તલોહકટાહકૈઃ ।
વિષ્ઠાપૂર્ણે તથા કૂપે કૃમીણાં નિચયે પુનઃ ॥ ૧૦॥

મેદોઽસૃક્પૂયપૂર્ણાયાં વાપ્યાં ક્ષિપ્યન્તિ તે પુનઃ ।
ભક્ષ્યન્તે કૃમિભિસ્તીક્ષ્ણૈર્લોહતુણ્ડૈશ્ચ વાયસૈઃ ॥ ૧૧॥

શ્વભિર્દંશૈર્વૃકૈર્વ્યાઘ્રૈ રૌદ્રૈશ્ચ વિકૃતાનનૈઃ ।
પચ્યન્તે મત્સ્યવચ્ચાપિ પ્રદીપ્તાઙ્ગારરાશિષુ ॥ ૧૨॥

ભિન્નાઃ શૂલૈઃ સુતીક્ષ્ણૈશ્ચ નરાઃ પાપેન કર્મણા ।
તૈલયન્ત્રેષુ ચાક્રમ્ય ઘોરૈઃ કર્મભિરાત્મનઃ ॥ ૧૩॥

તિલા ઇવ પ્રપીડ્યન્તે ચક્રાખ્યે જનપિણ્ડકાઃ ।
ભ્રજ્યન્તે ચાતપે તપ્તલોહભાણ્ડેષ્વનેકધા ॥ ૧૪॥

તૈલપૂર્ણકટાહેષુ સુતપ્તેષુ પુનઃપુનઃ ।
બહુધા પચ્યતે જિહ્વા પ્રપીડ્યોરસિ પાદયોઃ ॥ ૧૫॥

યાતનાશ્ચ મહત્યોઽત્ર શરીરસ્યાતિ સર્વતઃ ।
નિઃશેષનરકેષ્વેવં ક્રમન્તિ ક્રમશો નરાઃ ॥ ૧૬॥

નરકેષુ ચ સર્વેષુ વિચિત્રા યમયાતનાઃ ।
યામ્યૈશ્ચ દીયતે વ્યાસ સર્વાઙ્ગેષુ સુકષ્ટદાઃ ॥ ૧૭॥

જ્વલદઙ્ગારમાદાય મુખમાપૂર્ય તાડ્યતે ।
તતઃ ક્ષારેણ દીપ્તેન તામ્રેણ ચ પુનઃપુનઃ ॥ ૧૮॥

ધૃતેનાત્યન્તતપ્તેન તદા તૈલેન તન્મુખમ્ ।
ઇતસ્તતઃ પીડયિત્વા ભૃશમાપૂર્ય હન્યતે ॥ ૧૯॥

વિષ્ઠાભિઃ કૃમિભિશ્ચાપિ પૂર્યમાણાઃ ક્વચિત્ ક્વચિત્ ।
પરિષ્વજન્તિ ચાત્યુગ્રાં પ્રદીપ્તાં લોહશાલ્મલીમ્ ॥ ૨૦॥

હન્યન્તે પૃષ્ઠદેશે ચ પુનર્દીપ્તૈર્મહાઘનૈઃ ।
દન્તુરેણાદિકુણ્ઠેન ક્રકચેન બલીસયા ॥ ૨૧॥

શિરઃપ્રભૃતિ પીડ્યન્તે ઘોરૈઃ કર્મભિરાત્મજૈઃ ।
ખાદ્યન્તે ચ સ્વમાંસાનિ પીયતે શોણિતં સ્વકમ્ ॥ ૨૨॥

અન્નં પાનં ન દત્તં યૈઃ સર્વદા સ્વાત્મપોષકૈઃ ।
ઇક્ષુવત્તે પ્રપીડ્યન્તે જર્જરીકૃત્ય મુદ્ગરૈઃ ॥ ૨૩॥

અસિતાલવને ઘોરે છિદ્યન્તે ખણ્ડશસ્તતઃ ।
સૂચીભિર્ભિન્નસર્વાઙ્ગાઃ તપ્તશૂલાગ્રરોપિતાઃ ॥ ૨૪॥

સઞ્ચાલ્યમાના બહુશઃ ક્લિશ્યન્તે ન મ્રિયન્તિ ચ ।
તથા ચ તચ્છરીરાણિ સુખદુઃખસહાનિ ચ ॥ ૨૫॥

દેહાદુત્પાટ્ય માંસાનિ ભિદ્યન્તે સ્વૈશ્ચ મુદ્ગરૈઃ ।
દન્તુરાકૃતિભિર્ઘોરૈર્યમદૂતૈર્બલોત્કટૈઃ ॥ ૨૬॥

નિરુચ્છ્વાસે નિરુચ્છ્વાસાસ્તિષ્ઠન્તિ નરકે ચિરમ્ ।
ઉત્તાડ્યન્તે તથોચ્છ્વાસે વાલુકાસદને નરાઃ ॥ ૨૭॥

રૌરવે રોદમાનાશ્ચ પીડ્યન્તે વિવિધૈર્વધૈઃ ।
મહારૌરવપીડાભિર્મહાન્તોઽપિ રુદન્તિ ચ ॥ ૨૮॥

પત્સુ વક્ત્રે ગુદે મુણ્ડે નેત્રયોશ્ચૈવ મસ્તકે ।
નિહન્યન્તે ઘનૈસ્તીક્ષ્ણૈઃ સુતપ્તૈર્લોહશઙ્કુભિઃ ॥ ૨૯॥

સુતપ્તવાલુકાયાં તુ પ્રયોજ્યન્તે મુહુર્મુહુઃ ।
જન્તુપઙ્કે ભૃશં તપ્તે ક્ષિપ્તાઃ ક્રન્દન્તિ વિસ્વરમ્ ॥ ૩૦॥

કુમ્ભીપાકેષુ પચ્યન્તે તપ્તતૈલેષુ વૈ મુને ।

પાપિનઃ ક્રૂરકર્માણોઽસહ્યેષુ સર્વથા પુનઃ ॥ ૩૧॥

લાલાભક્ષેષુ પાપાસ્તે પાત્યન્તે દુઃખદેષુ વૈ ।
નાનાસ્થાનેષુ ચ તથા નરકેષુ પુનઃપુનઃ ॥ ૩૨॥

સૂચીમુખે મહાક્લેશે નરકે પાત્યતે નરઃ ।
પાપી પુણ્યવિહીનશ્ચ તાડ્યતે યમકિઙ્કરૈઃ ॥ ૩૩॥

લોહકુમ્ભે વિનિઃક્ષિપ્તાઃ શ્વસન્તશ્ચ શનૈઃ શનૈઃ ।
મહાગ્નિના પ્રપચ્યન્તે સ્વપાપૈરેવ માનવાઃ ॥ ૩૪॥

દૃઢં રજ્જ્વાદિભિર્બદ્ધ્વા પ્રપીડ્યન્તે શિલાસુ ચ ।
ક્ષિપ્યન્તે ચાન્ધકૂપેષુ દશ્યન્તે ભ્રમરૈર્ભૃશમ્ ॥ ૩૫॥

કૃમિભિર્ભિન્નસર્વાઙ્ગાઃ શતશો જર્જરીકૃતાઃ ।
સુતીક્ષ્ણક્ષારકૂપેષુ ક્ષિપ્યન્તે તદનન્તરમ્ ॥ ૩૬॥

મહાજ્વાલેઽત્ર નરકે પાપાઃ ક્રન્દન્તિ દુઃખિતાઃ ।
ઇતશ્ચેતશ્ચ ધાવન્તિ દહ્યમાનાસ્તદર્ચિષા ॥ ૩૭॥

પૃષ્ઠે ચાનીય તુણ્ડાભ્યાં વિન્યસ્તસ્કન્ધયોજિતે ।
તયોર્મધ્યેન વાકૃષ્ય બાહુપૃષ્ઠેન ગાઢતઃ ॥ ૩૮॥

બદ્ધાઃ પરસ્પરં સર્વે સુભૃશં પાશરજ્જુભિઃ ।
બદ્ધપિણ્ડાસ્તુ દૃશ્યન્તે મહાજ્વાલે તુ યાતનાઃ ॥ ૩૯॥

રજ્જુભિર્વેષ્ટિતાશ્ચૈવ પ્રલિપ્તાઃ કર્દમેન ચ ।
કરીષતુષવહ્નૌ ચ પચ્યન્તે ન મ્રિયન્તિ ચ ॥ ૪૦॥

સુતીક્ષ્ણચરિતાસ્તે હિ કર્કશાસુ શિલાસુ ચ ।
આસ્ફાલ્ય શતશઃ પાપાઃ પચ્યન્તે તૃણવત્તતઃ ॥ ૪૧॥

શરીરાભ્યન્તરગતૈઃ પ્રભૂતૈઃ કૃમિભિર્નરાઃ ।
ભક્ષ્યન્તે તીક્ષ્ણવદનૈરાત્મદેહક્ષયાદ્ ભૃશમ્ ॥ ૪૨॥

કૃમીણાં નિચયે ક્ષિપ્તાઃ પૂયમાંસાસ્થિરાશિષુ ।
તિષ્ઠન્ત્યુદ્વિગ્નહૃદયાઃ પર્વતાભ્યાં નિપીડિતાઃ ॥ ૪૩॥

તપ્તેન વજ્રલેપેન શરીરમનુલિપ્યતે ।
અધોમુખોર્ધ્વપાદશ્ચ તાતપ્યન્તે સ્મ વહ્નિના ॥ ૪૪॥

વદનાન્તઃપ્રવિન્યસ્તાં સુપ્રતપ્તામયોગદામ્ ।
તે ખાદન્તિ પરાધીનાસ્તૈસ્તાડ્યન્તે ચ મુદ્ગરૈઃ ॥ ૪૫॥

ઇત્થં વ્યાસ કુકર્માણો નરકેષુ પચન્તિ હિ ।
વર્ણયામિ વિવર્ણત્વં તેષાં તત્ત્વાય કર્મિણામ્ ॥ ૪૬॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં સામાન્યતો નરકગતિવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૫.૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૧૦. દશમોઽધ્યાયઃ । નરકગતિભોગવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
મિથ્યાગમં પ્રવૃત્તસ્તુ દ્વિજિહ્વાખ્યં ચ ગચ્છતિ ।
જિહ્વાર્ધકોશવિસ્તીર્ણહલૈસ્તીક્ષ્ણૈઃ પ્રપીડ્યતે ॥ ૧॥

નિર્ભર્ત્સયતિ યઃ ક્રૂરો માતરં પિતરં ગુરુમ્ ।
વિષ્ઠાભિઃ કૃમિમિશ્રાભિર્મુખમાપૂર્ય હન્યતે ॥ ૨॥

યે શિવાયતનારામવાપીકૂપતડાગકાન્ ।
વિદ્રવન્તિ દ્વિજસ્થાનં નરાસ્તત્ર રમન્તિ ચ ॥ ૩॥

કામાયોદ્વર્તનાભ્યઙ્ગ સ્નાનપાનામ્બુભોજનમ્ ।
ક્રીડનં મૈથુનં દ્યૂતમાચરન્તિ મદોદ્ધતાઃ ॥ ૪॥

પેચિરે વિવિધૈર્ઘોરૈરિક્ષુયન્ત્રાદિપીડનૈઃ ।
નિરયાગ્નિષુ પચ્યન્તે યાવદાભૂતસમ્પ્લવમ્ ॥ ૫॥

તેન તેનૈવ રૂપેણ તાડ્યન્તે પારદારિકાઃ ।
ગાઢમાલિઙ્ગ્ય તે નારીં સુતપ્તાં લોહનિર્મિતામ્ ॥ ૬॥

પૂર્વાકારાશ્ચ પુરુષાઃ પ્રજ્વલન્તિ સમન્તતઃ ।
દુશ્ચારિણીં સ્ત્રિયં ગાઢમાલિઙ્ગન્તિ રુદન્તિ ચ ॥ ૭॥

યે શૃણ્વન્તિ સતાં નિન્દાં તેષાં કર્ણપ્રપૂરણમ્ ।
અગ્નિવર્ણૈરયઃકીલૈસ્તપ્તૈસ્તામ્રાદિનિર્મિતૈઃ ॥ ૮॥

ત્રપુસીસારકૂટાદ્ભિઃ ક્ષીરેણ ચ પુનઃપુનઃ ।

સુતપ્તતીક્ષ્ણતૈલેન વજ્રલેપેન વા પુનઃ ॥ ૯॥

ક્રમાદાપૂર્ય કર્ણાંસ્તુ નરકેષુ ચ યાતનાઃ ।
અનુક્રમેણ સર્વેષુ ભવન્ત્યેતાઃ સમન્તતઃ ॥ ૧૦॥

સર્વેન્દ્રિયાણામપ્યેવં ક્રમાત્પાપેન યાતનાઃ ।
ભવન્તિ ઘોરાઃ પ્રત્યેકં શરીરેણ કૃતેન ચ ॥ ૧૧॥

સ્પર્શદોષેણ યે મૂઢાઃ સ્પૃશન્તિ ચ પરસ્ત્રિયમ્ ।
તેષાં કરોઽગ્નિવર્ણાભિઃ પાંસુભિઃ પૂર્યતે ભૃશમ્ ॥ ૧૨॥

તેષાં ક્ષારાદિભિઃ સર્વૈઃ શરીરમનુલિપ્યતે ।
યાતનાશ્ચ મહાકષ્ટાઃ સર્વેષુ નરકેષુ ચ ॥ ૧૩॥

કુર્વન્તિ પિત્રોર્ભ્રૂકુટિં કરનેત્રાણિ યે નરાઃ ।
વક્ત્રાણિ તેષાં સાન્તાનિ કીર્યન્તે શઙ્કુભિર્દૃઢમ્ ॥ ૧૪॥

યૈરિન્દ્રિયૈર્નરા યે ચ વિકુર્વન્તિ પરસ્ત્રિયમ્ ।
ઇન્દ્રિયાણિ ચ તેષાં વૈ વિકુર્વન્તિ તથૈવ ચ ॥ ૧૫॥

પરદારાંશ્ચ પશ્યન્તિ લુબ્ધાઃ સ્તબ્ધેન ચક્ષુષા ।
સૂચીભિશ્ચાગ્નિવર્ણાભિસ્તેષાં નેત્રપ્રપૂરણમ્ ॥ ૧૬॥

ક્ષારાદ્યૈશ્ચ ક્રમાત્સર્વા ઇહૈવ યમયાતનાઃ ।
ભવન્તિ મુનિશાર્દૂલ સત્યં સત્યં ન સંશયઃ ॥ ૧૭॥

દેવાગ્નિગુરુવિપ્રેભ્યશ્ચાનિવેદ્ય પ્રભુઞ્જતે ।
લોહકીલશતૈસ્તપ્તૈસ્તજ્જિહ્વાસ્યં ચ પૂર્યતે ॥ ૧૮॥

યે દેવારામપુષ્પાણિ લોભાત્સઙ્ગૃહ્ય પાણિના ।
જિઘ્રન્તિ ચ નરા ભૂયઃ શિરસા ધારયન્તિ ચ ॥ ૧૯॥

આપૂર્યતે શિરસ્તેષાં તપ્તૈર્લોહસ્ય શઙ્કુભિઃ ।
નાસિકા ચાતિબહુલૈસ્તતઃ ક્ષારાદિભિર્ભૃશમ્ ॥ ૨૦॥

યે નિન્દન્તિ મહાત્માનં વાચકં ધર્મદેશિકમ્ ।
દેવાગ્નિગુરુભક્તાંશ્ચ ધર્મશાસ્ત્રં ચ શાશ્વતમ્ ॥ ૨૧॥

તેષામુરસિ કણ્ઠે ચ જિહ્વાયાં દન્તસન્ધિષુ ।
તાલુન્યોષ્ઠે નાસિકાયાં મૂર્ધ્નિ સર્વાઙ્ગસન્ધિષુ ॥ ૨૨॥

અગ્નિવર્ણાસ્તુ તપ્તાશ્ચ ત્રિશાખા લોહશઙ્કવઃ ।
આખિદ્યન્તે ચ બહુશઃ સ્થાનેષ્વેતેષુ મુદ્ગરૈઃ ॥ ૨૩॥

તતઃ ક્ષારેણ દીપ્તેન પૂર્યતે હિ સમન્તતઃ ।
યાતનાશ્ચ મહત્યો વૈ શરીરસ્યાતિ સર્વતઃ ॥ ૨૪॥

અશેષનરકેષ્વેવ ક્રમન્તિ ક્રમશઃ પુનઃ ।
યે ગૃહ્ણન્તિ પરદ્રવ્યં પદ્ભ્યાં વિપ્રં સ્પૃશન્તિ ચ ॥ ૨૫॥

શિવોપકરણં ગાં ચ જ્ઞાનાદિલિખિતં ચ યત્ ।
હસ્તપાદાદિભિસ્તેષામાપૂર્યન્તે સમન્તતઃ ॥ ૨૬॥

નરકેષુ ચ સર્વેષુ વિચિત્રા બહુયાતનાઃ ।
ભવન્તિ બહુશઃ કષ્ટાઃ પાણિપાદસમુદ્ભવાઃ ॥ ૨૭॥

શિવાયતનપર્યન્તે દેવારામેષુ કુત્રચિત્ ।
સમુત્સૃજન્તિ યે પાપાઃ પુરીષં મૂત્રમેવ ચ ॥ ૨૮॥

તેષાં શિશ્નં સવૃષણં ચૂર્ણ્યતે લોહમુદ્ગરૈઃ ।
સૂચીભિરગ્નિવર્ણાભિસ્તથા ત્વાપૂર્યતે પુનઃ ॥ ૨૯॥

તતઃ ક્ષારેણ મહતા તીવ્રેણ ચ પુનઃ પુનઃ ।
દ્રુતેન પૂર્યતે ગાઢં ગુદે શિશ્ને ચ દેહિનઃ ॥ ૩૦॥

મનઃ સર્વેન્દ્રિયાણાં ચ યસ્માદ્દુઃખં પ્રજાયતે ।
ધને સત્યપિ યે દાનં ન પ્રયચ્છન્તિ તૃષ્ણયા ॥ ૩૧॥

અતિથિં ચાવમન્યન્તે કાલે પ્રાપ્તે ગૃહાશ્રમે ।
તસ્માત્તે દુષ્કૃતં પ્રાપ્ય ગચ્છન્તિ નિરયેઽશુચૌ ॥ ૩૨॥

યેઽન્નં દત્ત્વા હિ ભુઞ્જન્તિ ન શ્વભ્યઃ સહ વાયસૈઃ ।
તેષાં ચ વિવૃતં વક્ત્રં કીલકદ્વયતાડિતમ્ ॥ ૩૩॥

કૃમિભિઃ પ્રાણિભિશ્ચોગ્રૈર્લોહતુણ્ડૈશ્ચ વાયસૈઃ ।
ઉપદ્રવૈર્બહુવિધૈરુગ્રૈરન્તઃ પ્રપીડ્યતે ॥ ૩૪॥

શ્યામશ્ચ શબલશ્ચૈવ યમમાર્ગાનુરોધકૌ ।
યૌ સ્તસ્તાભ્યાં પ્રયચ્છામિ તૌ ગૃહ્ણીતામિમં બલિમ્ ॥ ૩૫॥

યે વા વરુણવાયવ્યા યામ્યા નૈરૃત્યવાયસાઃ ।
વાયસાઃ પુણ્યકર્માણસ્તે પ્રગૃહ્ણન્તુ મે બલિમ્ ॥ ૩૬॥

શિવામભ્યર્ચ્ય યત્નેન હુત્વાગ્નૌ વિધિપૂર્વકમ્ ।
શૈવૈર્મન્ત્રૈર્બલિં યે ચ દદન્તે ન ચ તે યમમ્ ॥ ૩૭॥

પશ્યન્તિ ત્રિદિવં યાન્તિ તસ્માદ્દદ્યાદ્દિનેદિને ।
મણ્ડલં ચતુરસ્રં તુ કૃત્વા ગન્ધાદિવાસિતમ્ ॥ ૩૮॥

ધન્વન્તર્યર્થમીશાન્યાં પ્રાચ્યામિન્દ્રાય નિઃક્ષિપેત્ ।
યામ્યાં યમાય વારુણ્યાં સુદક્ષોમાય દક્ષિણે ॥ ૩૯॥

પિતૃભ્યસ્તુ વિનિઃક્ષિપ્ય પ્રાચ્યામર્યમણં તતઃ ।
ધાતુશ્ચૈવ વિધાતુશ્ચ દ્વારદેશે વિનિઃક્ષિપેત્ ॥ ૪૦॥

શ્વભ્યશ્ચ શ્વપતિભ્યશ્ચ વયોભ્યો વિક્ષિપેદ્ભુવિ ।
દેવૈઃ પિતૃમનુષ્યૈશ્ચ પ્રેતૈર્ભૂતૈઃ સગુહ્યકૈઃ ॥ ૪૧॥

વયોભિઃ કૃમિકીટૈશ્ચ ગૃહસ્થશ્ચોપજીવ્યતે ।
સ્વાહાકારઃ સ્વધાકારો વષટ્કારસ્તૃતીયકઃ ॥ ૪૨॥

હન્તકારસ્તથૈવાન્યો ધેન્વાઃ સ્તનચતુષ્ટયમ્ ।
સ્વાહાકારં સ્તનં દેવાઃ સ્વધાં ચ પિતરસ્તથા ॥ ૪૩॥

વષટ્કારં તથૈવાન્યે દેવા ભૂતેશ્વરાસ્તથા ।
હન્તકારં મનુષ્યાશ્ચ પિબન્તિ સતતં સ્તનમ્ ॥ ૪૪॥

યસ્ત્વેતાં માનવો ધેનું શ્રદ્ધયા હ્યનુપૂર્વિકામ્ ।
કરોતિ સતતં કાલે સાગ્નિત્વાયોપકલ્પ્યતે ॥ ૪૫॥

યસ્તાં જહાતિ વાસ્વસ્થસ્તામિસ્રે સ તુ મજ્જતિ ।
તસ્માદ્દત્ત્વા બલિં તેભ્યો દ્વારસ્થશ્ચિન્તયેત્ક્ષણમ્ ॥ ૪૬॥

ક્ષુધાર્તમતિથિં સમ્યગેકગ્રામનિવાસિનમ્ ।
ભોજયેત્તં શુભાન્નેન યથાશક્ત્યાત્મભોજનાત્ ॥ ૪૭॥

અતિથિર્યસ્ય ભગ્નાશો ગૃહાત્પ્રતિનિવર્તતે ।
સ તસ્મૈ દુષ્કૃતં દત્ત્વા પુણ્યમાદાય ગચ્છતિ ॥ ૪૮॥

તતોઽન્નં પ્રિયમેવાશ્નન્નરઃ શૃઙ્ખલવાન્ પુનઃ ।
જિહ્વાવેગેન વિદ્ધોઽત્ર ચિરં કાલં સ તિષ્ઠતિ ॥ ૪૯॥

યતસ્તમ્માંસમુદ્ધૃત્ય તિલમાત્રપ્રમાણતઃ ।

ખાદિતું દીયતે તેષાં ભિત્ત્વા ચૈવ તુ શોણિતમ્ ॥ ૫૦॥

નિઃશેષતઃ કશાભિસ્તુ પીડ્યતે ક્રમશઃ પુનઃ ।
બુભુક્ષયાતિકષ્ટં હિ તથાચાતિપિપાસયા ॥ ૫૧॥

એવમાદ્યા મહાઘોરાઃ યાતનાઃ પાપકર્મણામ્ ।
અન્તે યત્પ્રતિપન્નં હિ તત્સઙ્ક્ષેપેણ સંશ૱ૃણુ ॥ ૫૨॥

યઃ કરોતિ મહાપાપં ધર્મં ચરતિ વૈ લઘુ ।
ધર્મં ગુરુતરં વાપિ તથાવસ્થે તયોઃ શ૱ૃણુ ॥ ૫૩॥

સુકૃતસ્ય ફલં નોક્તં ગુરુપાપપ્રભાવતઃ ।
ન મિનોતિ સુખં તત્ર ભોગૈર્બહુભિરન્વિતઃ ॥ ૫૪॥

તથોદ્વિગ્નોઽતિસન્તપ્તો ન ભક્ષ્યૈર્મન્યતે સુખમ્ ।
અભાવાદગ્રતોઽન્યસ્ય પ્રતિકલ્યં દિને દિને ॥ ૫૫॥

પુમાન્યો ગુરુધર્માપિ સોપવાસો યથા ગૃહી ।
વિત્તવાન્ન વિજાનાતિ પીડાં નિયમસંસ્થિતઃ ॥ ૫૬॥

તાનિ પાપાનિ ઘોરાણિ સન્તિ યૈશ્ચ નરો ભુવિ ।
શતધા ભેદમાપ્નોતિ ગિરિર્વજ્રહતો યથા ॥ ૫૭॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં નરકગતિભોગવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૫.૧૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૧૧. એકાદશોઽધ્યાયઃ । અન્નદાનમાહાત્મ્યવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
કૃતપાપા નરા યાન્તિ દુઃખેન મહતાન્વિતાઃ ।
યમમાર્ગે સુખં યૈશ્ચ તાન્ધર્માન્વદ મે પ્રભો ॥ ૧॥

સનત્કુમાર ઉવાચ ।
અવશ્યં હિ કૃતં કર્મ ભોક્તવ્યમવિચારતઃ ।
શુભાશુભમથો વક્ષ્યે તાન્ધર્માન્ સુખદાયકાન્ ॥ ૨॥

અત્ર યે શુભકર્માણઃ સૌમ્યચિત્તા દયાન્વિતાઃ ।

સુખેન તે નરા યાન્તિ યમમાર્ગં ભયાવહમ્ ॥ ૩॥

યઃ પ્રદદ્યાદ્ દ્વિજેન્દ્રાણામુપાનત્કાષ્ઠપાદુકે ।
સ નરોઽશ્વેન મહતા સુખં યાતિ યમાલયમ્ ॥ ૪॥

છત્રદાનેન ગચ્છન્તિ યથા છત્રેણ દેહિનઃ ।
શિબિકાયાઃ પ્રદાનેન તદ્રથેન સુખં વ્રજેત્ ॥ ૫॥

શય્યાસનપ્રદાનેન સુખં યાતિ સુવિશ્રમમ્ ।
આરામચ્છાયાકર્તારો માર્ગે વા વૃક્ષરોપકાઃ ।
વ્રજન્તિ યમલોકં ચ આતપેઽતિ ગતક્લમાઃ ॥ ૬॥

યાન્તિ પુષ્પકયાનેન પુષ્પારામકરા નરાઃ ।
દેવાયતનકર્તારઃ ક્રીડન્તિ ચ ગૃહોદરે ॥ ૭॥

કર્તારશ્ચ તથા યે ચ યતીનામાશ્રમસ્ય ચ ।
અનાથમણ્ડપાનાં તુ ક્રીડન્તિ ચ ગૃહોદરે ॥ ૮॥

દેવાગ્નિગુરુવિપ્રાણાં માતાપિત્રોશ્ચ પૂજકાઃ ।
પૂજ્યમાના નરા યાન્તિ કામુકેન યથાસુખમ્ ॥ ૯॥

દ્યોતયન્તો દિશઃ સર્વા યાન્તિ દીપપ્રદાયિનઃ ।
પ્રતિશ્રયપ્રદાનેન સુખં યાન્તિ નિરામયાઃ ॥ ૧૦॥

વિશ્રામ્યમાણા ગચ્છન્તિ ગુરુશુશ્રૂષકા નરાઃ ।
આતોદ્યવિપ્રદાતારઃ સુખં યાન્તિ સ્વકે ગૃહે ॥ ૧૧॥

સર્વકામસમૃદ્ધેન યથા ગચ્છન્તિ ગોપ્રદાઃ ।
અત્ર દત્તાન્નપાનાનિ તાન્યાપ્નોતિ નરઃ પથિ ॥ ૧૨॥

પાદશૌચપ્રદાનેન સજલેન પથા વ્રજેત્ ।
પાદાભ્યઙ્ગં ચ યઃ કુર્યાદશ્વપૃષ્ઠેન ગચ્છતિ ॥ ૧૩॥

પાદશૌચં તથાભ્યઙ્ગં દીપમન્નં પ્રતિશ્રયમ્ ।
યો દદાતિ સદા વ્યાસ નોપસર્પતિ તં યમઃ ॥ ૧૪॥

હેમરત્નપ્રદાનેન યાતિ દુર્ગાણિ નિસ્તરન્ ।
રૌપ્યાનડુત્પ્રદાનેન યમલોકં સુખેન સઃ ॥ ૧૫॥

ઇત્યેવમાદિભિર્દાનૈઃ સુખં યાન્તિ યમાલયમ્ ।
સ્વર્ગે તુ વિવિધાન્ભોગાન્ પ્રાપ્નુવન્તિ સદા નરાઃ ॥ ૧૬॥

સર્વેષામેવ દાનાનામન્નદાનં પરં સ્મૃતમ્ ।
સદ્યઃ પ્રીતિકરં હૃદ્યં બલબુદ્ધિવિવર્ધનમ્ ॥ ૧૭॥

નાન્નદાનસમં દાનં વિદ્યતે મુનિસત્તમ ।
અન્નાદ્ભવન્તિ ભૂતાનિ તદભાવે મ્રિયન્તિ ચ ॥ ૧૮॥

રક્તં માંસં વસા શુક્રં ક્રમાદન્નાત્પ્રવર્ધતે ।
શુક્રાદ્ભવન્તિ ભૂતાનિ તસ્માદન્નમયં જગત્ ॥ ૧૯॥

હેમરત્નાશ્વનાગેન્દ્રૈર્નારીસ્રક્ચ્યન્દનાદિભિઃ ।
સમસ્તૈરપિ સમ્પ્રાપ્તૈર્ન રમન્તિ બુભુક્ષિતાઃ ॥ ૨૦॥

ગર્ભસ્થા જાયમાનાશ્ચ બાલવૃદ્ધાશ્ચ મધ્યમાઃ ।
આહારમભિકાઙ્ક્ષન્તિ દેવદાનવરાક્ષસાઃ ॥ ૨૧॥

ક્ષુધા નિઃશેષરોગાણાં વ્યાધિઃ શ્રેષ્ઠતમઃ સ્મૃતઃ ।
સ ચાન્નૌષધિલેપેન નશ્યતીહ ન સંશયઃ ॥ ૨૨॥

નાસ્તિ ક્ષુધાસમં દુઃખં નાસ્તિ રોગઃ ક્ષુધાસમઃ ।
નાસ્ત્યરોગસમં સૌખ્યં નાસ્તિ ક્રોધસમો રિપુઃ ॥ ૨૩॥

અન્ત એવ મહત્પુણ્યમન્નદાને પ્રકીર્તિતમ્ ।
તથા ક્ષુધાગ્નિના તપ્તા મ્રિયન્તે સર્વદેહિનઃ ॥ ૨૪॥

અન્નદઃ પ્રાણદઃ પ્રોક્તઃ પ્રાણદશ્ચાપિ સર્વદઃ ।
તસ્માદન્નપ્રદાનેન સર્વદાનફલં લભેત્ ॥ ૨૫॥

યસ્યાન્નપાનપુષ્ટાઙ્ગઃ કુરુતે પુણ્યસઞ્ચયમ્ ।
અન્નપ્રદાતુસ્તસ્યાર્ધં કર્તુશ્ચાર્ધં ન સંશયઃ ॥ ૨૬॥

ત્રૈલોક્યે યાનિ રત્નાનિ ભોગસ્ત્રીવાહનાનિ ચ ।
અન્નદાનપ્રદઃ સર્વમિહામુત્ર ચ તલ્લભેત્ ॥ ૨૭॥

ધર્માર્થકામમોક્ષાણાં દેહઃ પરમસાધનમ્ ।
તસ્માદન્નેન પાનેન પાલયેદ્દેહમાત્મનઃ ॥ ૨૮॥

અન્નમેવ પ્રશંસન્તિ સર્વમન્ને પ્રતિષ્ઠિતમ્ ।
અન્નેન સદૃશં દાનં ન ભૂતં ન ભવિષ્યતિ ॥ ૨૯॥

અન્નેન ધાર્યતે સર્વં વિશ્વં જગદિદં મુને ।

અન્નમૂર્જસ્કરં લોકે પ્રાણા હ્યન્ને પ્રતિષ્ઠિતાઃ ॥ ૩૦॥

દાતવ્યં ભિક્ષવે ચાન્નં બ્રાહ્મણાય મહાત્મને ।
કુટુમ્બં પીડયિત્વાપિ હ્યાત્મનો ભૂતિમિચ્છતા ॥ ૩૧॥

વિદદાતિ નિધિશ્રેષ્ઠં યો દદ્યાદન્નમર્થિને ।
બ્રાહ્મણાયાર્તરૂપાય પારલૌકિકમાત્મનઃ ॥ ૩૨॥

અર્ચયેદ્ભૂતિમન્વિચ્છન્કાલે દ્વિજમુપસ્થિતમ્ ।
શ્રાન્તમધ્વનિ વૃત્ત્યર્થં ગૃહસ્થો ગૃહમાગતમ્ ॥ ૩૩॥

અન્નદઃ પૂજયેદ્ વ્યાસ સુશીલસ્તુ વિમત્સરઃ ।
ક્રોધમુત્પતિતં હિત્વા દિવિ ચેહ મહત્સુખમ્ ॥ ૩૪॥

નાભિનિન્દેદધિગતં ન પ્રણુદ્યાત્કથઞ્ચન ।
અપિ શ્વપાકે શુનિ વા નાન્નદાનં પ્રણશ્યતિ ॥ ૩૫॥

શ્રાન્તાયાદૃષ્ટપૂર્વાય હ્યન્નમધ્વનિ વર્તતે ।
યો દદ્યાદપરિક્લિષ્ટઃ સ સમૃદ્ધિમવાપ્નુયાત ॥ ૩૬॥

પિતૄન્ દેવાંસ્તથા વિપ્રાનતિથીંશ્ચ મહામુને ।
યો નરઃ પ્રીણયત્યન્નૈઃ તસ્ય પુણ્યફલં મહત્ ॥ ૩૭॥

અન્નં પાનં ચ શૂદ્રેઽપિ બ્રાહ્મણે ચ વિશિષ્યતે ।
ન પૃચ્છેદ્ગોત્રચરણં સ્વાધ્યાયં દેશમેવ ચ ॥ ૩૮॥

ભિક્ષિતો બ્રાહ્મણેનેહ દદ્યાદન્નં ચ યઃ પુમાન્ ।
સ યાતિ પરમં સ્વર્ગં યાવદાભૂતસમ્પ્લવમ્ ॥ ૩૯॥

અન્નદસ્ય ચ વૃક્ષાશ્ચ સર્વકામફલાન્વિતાઃ ।
ભવન્તીહ યથા વિપ્રા હર્ષયુક્તાસ્ત્રિવિષ્ટપે ॥ ૪૦॥

અન્નદાનેન યે લોકાઃ સ્વર્ગે વિરચિતા મુને ।
અન્નદાતુર્મહાદિવ્યાસ્તાન્ શ‍ૃણુષ્વ મહામુને ॥ ૪૧॥

ભવનાનિ પ્રકાશન્તે દિવિ તેષાં મહાત્મનામ્ ।
નાનાસંસ્થાનરૂપાણિ નાનાકામાન્વિતાનિ ચ ॥ ૪૨॥

સર્વકામફલાશ્ચાપિ વૃક્ષા ભવનસંસ્થિતાઃ ।
હેમવાપ્યઃ શુભાઃ કૂપા દીર્ઘિકાશ્ચૈવ સર્વશઃ ॥ ૪૩॥

ઘોષયન્તિ ચ પાનાનિ શુભાન્યથ સહસ્રશઃ ।
ભક્ષ્યભોજ્યમયાઃ શૈલા વાસાંસ્યાભરણાનિ ચ ॥ ૪૪॥

ક્ષીરં સ્રવન્ત્યઃ સરિતસ્તથૈવાજ્યસ્ય પર્વતાઃ ।
પ્રાસાદાઃ પાણ્ડુરાભાસાઃ શય્યાશ્ચ કનકોજ્જ્વલાઃ ॥ ૪૫॥

તાનન્નદાશ્ચ ગચ્છન્તિ તસ્માદન્નપ્રદો ભવેત્ ।
યદીચ્છેદાત્મનો ભવ્યમિહ લોકે પરત્ર ચ ॥ ૪૬॥

એતે લોકાઃ પુણ્યકૃતામન્નદાનાં મહાપ્રભાઃ ।
તસ્માદન્નં વિશેષેણ દાતવ્યં માનવૈર્ધ્રુવમ્ ॥ ૪૭॥

અન્નં પ્રજાપતિઃ સાક્ષાદન્નં વિષ્ણુઃ સ્વયં હરઃ ।
તસ્માદન્નસમં દાનં ન ભૂતં ન ભવિષ્યતિ ॥ ૪૮॥

કૃત્વાપિ સુમહત્પાપં યઃ પશ્ચાદન્નદો ભવેત્ ।
વિમુક્તઃ સર્વપાપેભ્યઃ સ્વર્ગલોકં સ ગચ્છતિ ॥ ૪૯॥

અન્નપાનાશ્વગોવસ્ત્રશય્યાચ્છત્રાસનાનિ ચ ।
પ્રેતલોકે પ્રશસ્તાનિ દાનાન્યષ્ટૌ વિશેષતઃ ॥ ૫૦॥

એવં દાનવિશેષેણ ધર્મરાજપુરં નરઃ ।
યસ્માદ્યાતિ વિમાનેન તસ્માદ્દાનં સમાચરેત્ ॥ ૫૧॥

એતદાખ્યાનમનઘમન્નદાનપ્રભાવતઃ ।
યઃ પઠેત્પાઠયેદન્યાન્સ સમૃદ્ધઃ પ્રજાયતે ॥ ૫૨॥

શ઼ૃણુયાચ્છ્રાવયેચ્છ્રાદ્ધે બ્રાહ્મણાન્યો મહામુને ।
અક્ષય્યમન્નદાનં ચ પિતૄણામુપતિષ્ઠતિ ॥ ૫૩॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં અન્નદાનમાહાત્મ્યવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૫.૧૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૧૨. દ્વાદશોઽધ્યાયઃ । તપોમાહાત્મ્યવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
પાનીયદાનં પરમં દાનાનામુત્તમં સદા ।

સર્વેષાં જીવપુઞ્જાનાં તર્પણં જીવનં સ્મૃતમ્ ॥ ૧॥

પ્રપાદાનમતઃ કુર્યાત્ સુસ્નેહાદનિવારિતમ્ ।
જલાશ્રયવિનિર્માણં મહાનન્દકરં ભવેત્ ॥ ૨॥

ઇહ લોકે પરે વાપિ સત્યં સત્યં ન સંશયઃ ।
તસ્માદ્વાપીશ્ચ કૂપાંશ્ચ તડાગાન્ કારયેન્નરઃ ॥ ૩॥

અર્ધં પાપસ્ય હરતિ પુરુષસ્ય વિકર્મણઃ ।
કૂપઃ પ્રવૃત્તપાનીયઃ સુપ્રવૃત્તસ્ય નિત્યશઃ ॥ ૪॥

સર્વં તારયતે વંશં યસ્ય ખાતે જલાશયે ।
ગાવઃ પિબન્તિ વિપ્રાશ્ચ સાધવશ્ચ નરાઃ સદા ॥ ૫॥

નિદાઘકાલે પાનીયં યસ્ય તિષ્ઠત્યવારિતમ્ ।
સુદુર્ગં વિષમં કૃચ્છ્રં ન કદાચિદવાપ્યતે ॥ ૬॥

તડાગાનાં ચ વક્ષ્યામિ કૃતાનાં યે ગુણાઃ સ્મૃતા ।
ત્રિષુ લોકેષુ સર્વત્ર પૂજિતો યસ્તડાગવાન્ ॥ ૭॥

અથવા મિત્રસદને મૈત્રં મિત્રાર્તિવર્જિતમ્ ।
કીર્તિસઞ્જનનં શ્રેષ્ઠં તડાગાનાં નિવેશનમ્ ॥ ૮॥

ધર્મસ્યાર્થસ્ય કામસ્ય ફલમાહુર્મનીષિણઃ ।
તડાગઃ સુકૃતો યેન તસ્ય પુણ્યમનન્તકમ્ ॥ ૯॥

ચતુર્વિધાનાં ભૂતાનાં તડાગઃ પરમાશ્રયઃ ।
તડાગાદીનિ સર્વાણિ દિશન્તિ શ્રિયમુત્તમામ્ ॥ ૧૦॥

દેવા મનુષ્યા ગન્ધર્વાઃ પિતરો નાગરાક્ષસાઃ ।
સ્થાવરાણિ ચ ભૂતાનિ સંશ્રયન્તિ જલાશયમ્ ॥ ૧૧॥

પ્રાવૃડૃતૌ તડાગે તુ સલિલં યસ્ય તિષ્ઠતિ ।
અગ્નિહોત્રફલં તસ્ય ભવતીત્યાહ ચાત્મભૂઃ ॥ ૧૨॥

શરત્કાલે તુ સલિલં તડાગે યસ્ય તિષ્ઠતિ ।
ગોસહસ્રફલં તસ્ય ભવેન્નૈવાત્ર સંશયઃ ॥ ૧૩॥

હેમન્તે શિશિરે ચૈવ સલિલં યસ્ય તિષ્ઠતિ ।
સ વૈ બહુસુવર્ણસ્ય યજ્ઞસ્ય લભતે ફલમ્ ॥ ૧૪॥

વસન્તે ચ તથા ગ્રીષ્મે સલિલં યસ્ય તિષ્ઠતિ ।
અતિરાત્રાશ્વમેધાનાં ફલમાહુર્મનીષિણઃ ॥ ૧૫॥

મુને વ્યાસાથ વૃક્ષાણાં રોપણે ચ ગુણાન્ શ ृણુ ।
પ્રોક્તં જલાશયફલં જીવપ્રીણનમુત્તમમ્ ॥ ૧૬॥

અતીતાનાગતાન્ સર્વાન્ પિતૃવંશાંસ્તુ તારયેત્ ।
કાન્તારે વૃક્ષરોપી યસ્તસ્માદ્ વૃક્ષાંસ્તુ રોપયેત્ ॥ ૧૭॥

તત્ર પુત્રા ભવન્ત્યેતે પાદપા નાત્ર સંશયઃ ।
પરં લોકં ગતઃ સોઽપિ લોકાનાપ્નોતિ ચાક્ષયાન્ ॥ ૧૮॥

પુષ્પૈઃ સુરગણાન્ સર્વાન્ ફલૈશ્ચાપિ તથા પિતૄન્ ।
છાયયા ચાતિથીન્ સર્વાન્ પૂજયન્તિ મહીરુહાઃ ॥ ૧૯॥

કિન્નરોરગરક્ષાંસિ દેવગન્ધર્વમાનવાઃ ।
તથૈવર્ષિગણાશ્ચૈવ સંશ્રયન્તિ મહીરુહાન્ ॥ ૨૦॥

પુષ્પિતાઃ ફલવન્તશ્ચ તર્પયન્તીહ માનવાન્ ।
ઇહ લોકે પરે ચૈવ પુત્રાસ્તે ધર્મતઃ સ્મૃતાઃ ॥ ૨૧॥

તડાગકૃદ્ વૃક્ષરોપી ચેષ્ટયજ્ઞશ્ચ યો દ્વિજઃ ।
એતે સ્વર્ગાન્ન હીયન્તે યે ચાન્યે સત્યવાદિનઃ ॥ ૨૨॥

સત્યમેવ પરં બ્રહ્મ સત્યમેવ પરં તપઃ ।
સત્યમેવ પરો યજ્ઞઃ સત્યમેવ પરં શ્રુતમ્ ॥ ૨૩॥

સત્યં સુપ્તેષુ જાગર્તિ સત્યં ચ પરમં પદમ્ ।
સત્યેનૈવ ધૃતા પૃથ્વી સત્યે સર્વં પ્રતિષ્ઠિતમ્ ॥ ૨૪॥

તપો યજ્ઞશ્ચ પુણ્યં ચ દેવર્ષિપિતૃપૂજને ।
આપો વિદ્યા ચ તે સર્વે સર્વં સત્યે પ્રતિષ્ઠિતમ્ ॥ ૨૫॥

સત્યં યજ્ઞસ્તપો દાનં મન્ત્રા દેવી સરસ્વતી ।
બ્રહ્મચર્યં તથા સત્યમોઙ્કારઃ સત્યમેવ ચ ॥ ૨૬॥

સત્યેન વાયુરભ્યેતિ સત્યેન તપતે રવિઃ ।
સત્યેનાગ્નિર્નિર્દહતિ સ્વર્ગઃ સત્યેન તિષ્ઠતિ ॥ ૨૭॥

પાલનં સર્વવેદાનાં સર્વતીર્થાવગાહનમ્ ।
સત્યેન વહતે લોકે સર્વમાપ્નોત્યસંશયમ્ ॥ ૨૮॥

અશ્વમેધસહસ્રં ચ સત્યં ચ તુલયા ધૃતમ્ ।
લક્ષાણિ ક્રતવશ્ચૈવ સત્યમેવ વિશિષ્યતે ॥ ૨૯॥

સત્યેન દેવાઃ પિતરો માનવોરગરાક્ષસાઃ ।
પ્રીયન્તે સત્યતઃ સર્વે લોકાશ્ચ સચરાચરાઃ ॥ ૩૦॥

સત્યમાહુઃ પરં ધર્મં સત્યમાહુઃ પરં પદમ્ ।
સત્યમાહુઃ પરં બ્રહ્મ તસ્માત્સત્યં સદા વદેત્ ॥ ૩૧॥

મુનયઃ સત્યનિરતાસ્તપસ્તપ્ત્વા સુદુશ્ચરમ્ ।
સત્યધર્મરતાઃ સિદ્ધાઃ તતઃ સ્વર્ગં ચ તે ગતાઃ ॥ ૩૨॥

અપ્સરોગણસંવિષ્ટૈર્વિમાનૈઃ પરિમાતૃભિઃ ।
વક્તવ્યં ચ સદા સત્યં ન સત્યાદ્વિદ્યતે પરમ્ ॥ ૩૩॥

અગાધે વિપુલે સિદ્ધે સત્યતીર્થે શુચિહ્રદે ।
સ્નાતવ્યં મનસા યુક્તં સ્થાનં તત્પરમં સ્મૃતમ્ ॥ ૩૪॥

આત્માર્થે વા પરાર્થે વા પુત્રાર્થે વાપિ માનવાઃ ।
અનૃતં યે ન ભાષન્તે તે નરાઃ સ્વર્ગગામિનઃ ॥ ૩૫॥

વેદા યજ્ઞાસ્તથા મન્ત્રાઃ સન્તિ વિપ્રેષુ નિત્યશઃ ।
નૌ ભાન્ત્યપિ હ્યસત્યેષુ તસ્માત્સત્યં સમાચરેત્ ॥ ૩૬॥

વ્યાસ ઉવાચ ।
તપસો મે ફલં બ્રૂહિ પુનરેવ વિશેષતઃ ।
સર્વેષાં ચૈવ વર્ણાનાં બ્રાહ્મણાનાં તપોધન ॥ ૩૭॥

સનત્કુમાર ઉવાચ ।
પ્રવક્ષ્યામિ તપોઽધ્યાયં સર્વકામાર્થસાધકમ્ ।
સુદુશ્ચરં દ્વિજાતીનાં તન્મે નિગદતઃ શ‍ૃણુ ॥ ૩૮॥

તપો હિ પરમં પ્રોક્તં તપસા વિદ્યતે ફલમ્ ।
તપોરતા હિ યે નિત્યં મોદન્તે સહ દૈવતૈઃ ॥ ૩૯॥

તપસા પ્રાપ્યતે સ્વર્ગસ્તપસા પ્રાપ્યતે યશઃ ।
તપસા પ્રાપ્યતે કામસ્તપઃ સર્વાર્થસાધનમ્ ॥ ૪૦॥

તપસા મોક્ષમાપ્નોતિ તપસા વિન્દતે મહત્ ।

જ્ઞાનવિજ્ઞાનસમ્પત્તિઃ સૌભાગ્યં રૂપમેવ ચ ॥ ૪૧॥

નાનાવિધાનિ વસ્તૂનિ તપસા લભતે નરઃ ।
તપસા લભતે સર્વં મનસા યદ્યદિચ્છતિ ॥ ૪૨॥

નાતમતપસો યાન્તિ બ્રહ્મલોકં કદાચન ।
નાતમતપસાં પ્રાપ્યઃ શઙ્કરઃ પરમેશ્વરઃ ॥ ૪૩॥

યત્કાર્યં કિઞ્ચિદાસ્થાય પુરુષસ્તપતે તપઃ ।
તત્સર્વં સમવાપ્નોતિ પરત્રેહ ચ માનવઃ ॥ ૪૪॥

સુરાપઃ પરદારી ચ બ્રહ્મહા ગુરુતલ્પગઃ ।
તપસા તરતે સર્વં સર્વતશ્ચ વિમુચ્યતિ ॥ ૪૫॥

અપિ સર્વેશ્વરઃ સ્થાણુર્વિષ્ણુશ્ચૈવ સનાતનઃ ।
બ્રહ્મા હુતાશનઃ શક્રો યે ચાન્યે તપસાન્વિતાઃ ॥ ૪૬॥

અષ્ટાશીતિસહસ્રાણિ મુનીનામૂર્ધ્વરેતસામ્ ।
તપસા દિવિ મોદન્તે સમેતા દૈવતૈઃ સહ ॥ ૪૭॥

તપસા લભ્યતે રાજ્યં સ ચ શક્રઃ સુરેશ્વરઃ ।
તપસાપાલયત્સર્વમહન્યહનિ વૃત્રહા ॥ ૪૮॥

સૂર્યાચન્દ્રમસૌ દેવૌ સર્વલોકહિતે રતૌ ।
તપસૈવ પ્રકાશન્તે નક્ષત્રાણિ ગ્રહાસ્તથા ॥ ૪૯॥

ન ચાસ્તિ તત્સુખં લોકે યદ્વિના તપસા કિલ ।
તપસૈવ સુખં સર્વમિતિ વેદવિદો વિદુઃ ॥ ૫૦॥

જ્ઞાનં વિજ્ઞાનમારોગ્યં રૂપવત્ત્વં તથૈવ ચ ।
સૌભાગ્યં ચૈવ તપસા પ્રાપ્યતે સર્વદા સુખમ્ ॥ ૫૧॥

તપસા સૃજ્યતે વિશ્વં બ્રહ્મા વિશ્વં વિના શ્રમમ્ ।
પાતિ વિષ્ણુર્હરોઽપ્યત્તિ ધત્તે શેષોઽખિલાં મહીમ્ ॥ ૫૨॥

વિશ્વામિત્રો ગાધિસુતસ્તપસૈવ મહામુને ।
ક્ષત્રિયોઽથાભવદ્વિપ્રઃ પ્રસિદ્ધં ત્રિભવે ત્વિદમ્ ॥ ૫૩॥

ઇત્યુક્તં તે મહાપ્રાજ્ઞ તપોમાહાત્મ્યમુત્તમમ્ ।
શૃણ્વધ્યયનમાહાત્મ્યં તપસોઽધિકમુત્તમમ્ ॥ ૫૪॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં તપોમાહાત્મ્યવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૫.૧૨॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૧૩. ત્રયોદશોઽધ્યાયઃ । પુરાણમાહાત્મ્યવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
તપસ્તપતિ યોઽરણ્યે વન્યમૂલફલાશનઃ ।
યોઽધીતે ઋચમેકાં હિ ફલં સ્યાત્તત્સમં મુને ॥ ૧॥

શ્રુતેરધ્યયનાત્પુણ્યં યદાપ્નોતિ દ્વિજોત્તમઃ ।
તદધ્યાપનતશ્ચાપિ દ્વિગુણં ફલમશ્નુતે ॥ ૨॥

જગદ્યથા નિરાલોકં જાયતેઽશશિભાસ્કરમ્ ।
વિના તથા પુરાણં હ્યધ્યેયમસ્માન્મુને સદા ॥ ૩॥

તપ્યમાનં સદાજ્ઞાનાન્નિરયે યોઽપિ શાસ્ત્રતઃ ।
સમ્બોધયતિ લોકં તં તસ્માત્ પૂજ્યઃ પુરાણગઃ ॥ ૪॥

સર્વેષાં ચૈવ પાત્રાણાં મધ્યે શ્રેષ્ઠઃ પુરાણવિત્ ।
પતનાત્ ત્રાયતે યસ્માત્ તસ્માત્પાત્રમુદાહૃતમ્ ॥ ૫॥

મર્ત્યબુદ્ધિર્ન કર્તવ્યા પુરાણજ્ઞે કદાચન ।
પુરાણજ્ઞઃ સર્વવેત્તા બ્રહ્મા વિષ્ણુર્હરો ગુરુઃ ॥ ૬॥

ધનં ધાન્યં હિરણ્યં ચ વાસાંસિ વિવિધાનિ ચ ।
દેયં પુરાણવિજ્ઞાય પરત્રેહ ચ શર્મણે ॥ ૭॥

યો દદાતિ મહાપ્રીત્યા પુરાણજ્ઞાય સજ્જનઃ ।
પાત્રાય શુભવસ્તૂનિ સ યાતિ પરમાં ગતિમ્ ॥ ૮॥

મહીં ગાં વા સ્યન્દનાંશ્ચ ગજાનશ્વાંશ્ચ શોભનાન્ ।
યઃ પ્રયચ્છતિ પાત્રાય તસ્ય પુણ્યફલં શ઼ૃણુ ॥ ૯॥

અક્ષયાન્સર્વકામાંશ્ચ પરત્રેહ ચ જન્મનિ ।
અશ્વમેધમખસ્યાપિ સ ફલં લભતે પુમાન્ ॥ ૧૦॥

મહીં દદાતિ યસ્તસ્મૈ કૃષ્ટાં ફલવતીં શુભામ્ ।

સ તારયતિ વૈ વંશ્યાન્દશ પૂર્વાન્ દશાપરાન્ ॥ ૧૧॥

ઇહ ભુક્ત્વાખિલાન્ કામાનન્તે દિવ્યશરીરવાન્ ।
વિમાનેન ચ દિવ્યેન શિવલોકં સ ગચ્છતિ ॥ ૧૨॥

ન યજ્ઞૈસ્તુષ્ટિમાયાન્તિ દેવાઃ પ્રોક્ષણકૈરપિ ।
બલિભિઃ પુષ્પપૂજાભિર્યથા પુસ્તકવાચનૈઃ ॥ ૧૩॥

શમ્ભોરાયતને યસ્તુ કારયેદ્ધર્મપુસ્તકમ્ ।
વિષ્ણોરર્કસ્ય કસ્યાપિ શ‍ૃણુ તસ્યાપિ તત્ફલમ્ ॥ ૧૪॥

રાજસૂયાશ્વમેધાનાં ફલમાપ્નોતિ માનવઃ ।
સૂર્યલોકં ચ ભિત્ત્વાશુ બ્રહ્મલોકં સ ગચ્છતિ ॥ ૧૫॥

સ્થિત્વા કલ્પશતાન્યત્ર રાજા ભવતિ ભૂતલે ।
ભુઙ્ક્તે નિષ્કણ્ટકં ભોગાન્નાત્ર કાર્યા વિચારણા ॥ ૧૬॥

અશ્વમેધસહસ્રસ્ય યત્ફલં સમુદાહૃતમ્ ।
તત્ફલં સમાવાપ્નોતિ દેવાગ્રે યો જપં ચરેત્ ॥ ૧૭॥

ઇતિહાસપુરાણાભ્યાં શમ્ભોરાયતને શુભે ।
નાન્યત્પ્રીતિકરં શમ્ભોસ્તથાન્યેષાં દિવૌકસામ્ ॥ ૧૮॥

તસ્માત્સર્વપ્રયત્નેન કાર્યં પુસ્તકવાચનમ્ ।
તથાસ્ય શ્રવણં પ્રેમ્ણા સર્વકામફલપ્રદમ્ ॥ ૧૯॥

પુરાણશ્રવણાત્ શમ્ભોર્નિષ્પાપો જાયતે નરઃ ।
ભુક્ત્વા ભોગાન્ સુવિપુલાન્ શિવલોકમવાપ્નુયાત્ ॥ ૨૦॥

રાજસૂયેન યત્પુણ્યમગ્નિષ્ટોમશતેન ચ ।
તત્પુણ્યં લભતે શમ્ભોઃ કથાશ્રવણમાત્રતઃ ॥ ૨૧॥

સર્વતીર્થાવગાહેન ગવાં કોટિપ્રદાનતઃ ।
તત્ ફલં લભતે શમ્ભોઃ કથાશ્રવણતો મુને ॥ ૨૨॥

યે શ‍ૃણ્વન્તિ કથાં શમ્ભોઃ સદા ભુવનપાવનીમ્ ।
તે મનુષ્યા ન મન્તવ્યા રુદ્રા એવ ન સંશયઃ ॥ ૨૩॥

શ‍ૃણ્વતાં શિવસત્કીર્તિં સતાં કીર્તયતાં ચ તામ્ ।
પાદામ્બુજરજાંસ્યેવ તીર્થાનિ મુનયો વિદુઃ ॥ ૨૪॥

ગન્તું નિઃશ્રેયસં સ્થાનં યેઽભિવાઞ્છન્તિ દેહિનઃ ।
કથાં પૌરાણિકીં શૈવીં ભક્ત્યા શૃણ્વન્તુ તે સદા ॥ ૨૫॥

કથાં પૌરાણિકીં શ્રોતું યદ્યશક્તઃ સદા ભવેત્ ।
નિયતાત્મા પ્રતિદિનં શૃણુયાદ્વા મુહૂર્તકમ્ ॥ ૨૬॥

યદિ પ્રતિદિનં શ્રોતુમશક્તો માનવો ભવેત્ ।
પુણ્યમાસાદિષુ મુને શૃણુયાચ્છાઙ્કરીં કથામ્ ॥ ૨૭॥

શૈવીં કથાં હિ શૃણ્વાનઃ પુરુષો હિ મુનીશ્વર ।
સ નિસ્તરતિ સંસારં દગ્ધ્વા કર્મમહાટવીમ્ ॥ ૨૮॥

કથાં શૈવીં મુહૂર્તં વા તદર્ધં વા ક્ષણં ચ વા ।
યે શૃણ્વન્તિ નરા ભક્ત્યા ન તેષાં દુર્ગતિર્ભવેત્ ॥ ૨૯॥

યત્પુણ્યં સર્વદાનેષુ સર્વયજ્ઞેષુ વા મુને ।
શમ્ભોઃ પુરાણશ્રવણાત્તત્ફલં નિશ્ચલં ભવેત્ ॥ ૩૦॥

વિશેષતઃ કલૌ વ્યાસ પુરાણશ્રવણાદૃતે ।
પરો ધર્મો ન પુંસાં હિ મુક્તિધ્યાનપરઃ સ્મૃતઃ ॥ ૩૧॥

પુરાણશ્રવણં શમ્ભોર્નામસઙ્કીર્તનં તથા ।
કલ્પદ્રુમફલં રમ્યં મનુષ્યાણાં ન સંશયઃ ॥ ૩૨॥

કલૌ દુર્મેધસાં પુંસાં ધર્માચારોજ્ઝિતાત્મનામ્ ।
હિતાય વિદધે શમ્ભુઃ પુરાણાખ્યં સુધારસમ્ ॥ ૩૩॥

એકોઽજરામરઃ સ્યાદ્વૈ પિબન્નેવામૃતં પુમાન્ ।
શમ્ભોઃ કથામૃતાપાનાત્ કુલમેવાજરામરમ્ ॥ ૩૪॥

યા ગતિઃ પુણ્યશીલાનાં યજ્વિનાં ચ તપસ્વિનામ્ ।
સા ગતિઃ સહસા તાત પુરાણશ્રવણાત્ખલુ ॥ ૩૫॥

જ્ઞાનાવાપ્તિર્યદા ન સ્યાદ્યોગશાસ્ત્રાણિ યત્નતઃ ।
અધ્યેતવ્યાનિ પૌરાણં શાસ્ત્રં શ્રોતવ્યમેવ ચ ॥ ૩૬॥

પાપં સઙ્ક્ષીયતે નિત્યં ધર્મશ્ચૈવ વિવર્ધતે ।
પુરાણશ્રવણાજ્જ્ઞાની ન સંસારં પ્રપદ્યતે ॥ ૩૭॥

અતએવ પુરાણાનિ શ્રોતવ્યાનિ પ્રયત્નતઃ ।
ધર્માર્થકામલાભાય મોક્ષમાર્ગાપ્તયે તથા ॥ ૩૮॥

યજ્ઞૈર્દાનૈસ્તપોભિસ્તુ યત્ફલં તીર્થસેવયા ।
તત્ફલં સમવાપ્નોતિ પુરાણશ્રવણાન્નરઃ ॥ ૩૯॥

ન ભવેયુઃ પુરાણાનિ ધર્મમાર્ગેક્ષણાનિ તુ ।
યદ્યત્ર યદ્ વ્રતી સ્થાતા કોઽત્ર પારત્રિકીં કથામ્ ॥ ૪૦॥

ષડ્વિંશતિ પુરાણાનાં મધ્યેઽપ્યેકં શ ृણોતિ યઃ ।
પઠેદ્વા ભક્તિયુક્તસ્તુ સ મુક્તો નાત્ર સંશયઃ ॥ ૪૧॥

અન્યો ન દૃષ્ટઃ સુખદો હિ માર્ગઃ
પુરાણમાર્ગો હિ સદા વરિષ્ઠઃ ।
શાસ્ત્રં વિના સર્વમિદં ન ભાતિ
સૂર્યેણ હીના ઇવ જીવલોકાઃ ॥ ૪૨॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં પુરાણમાહાત્મ્યવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૫.૧૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૧૪. ચતુર્દશોઽધ્યાયઃ । સામાન્યદાનવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
શસ્તાનિ ઘોરદાનાનિ મહાદાનાનિ નિત્યશઃ ।
પાત્રેભ્યસ્તુ પ્રદેયાનિ આત્માનં તારયન્તિ ચ ॥ ૧॥

હિરણ્યદાનં ગોદાનં ભૂમિદાનં દ્વિજોત્તમ ।
ગૃહ્ણન્તો વૈ પવિત્રાણિ તારયન્તિ સ્વમેવ તમ્ ॥ ૨॥

સુવર્ણદાનં ગોદાનં પૃથિવીદાનમેવ ચ ।
એતાનિ શ્રેષ્ઠદાનાનિ કૃત્વા પાપૈઃ પ્રમુચ્યતે ॥ ૩॥

તુલાદાનાનિ શસ્તાનિ ગાવઃ પૃથ્વી સરસ્વતી ।
દ્વે તુ તુલ્યબલે શસ્તે હ્યધિકા ચ સરસ્વતી ॥ ૪॥

નિત્ય હ્યનુડુહો ગાવચ્છત્રં વસ્ત્રમુપાનહૌ ।
દેયાનિ યાચમાનેભ્યઃ પાનમન્નં તથૈવ ચ ॥ ૫॥

સઙ્કલ્પવિહિતો યોઽર્થો બ્રાહ્મણેભ્યઃ પ્રદીયતે ।
અર્થિભ્યોઽપીડિતેભ્યશ્ચ મનસ્વી તેન જાયતે ॥ ૬॥

કનકં ચ તિલા નાગાઃ કન્યા દાસી ગૃહં રથઃ ।
મણયઃ કપિલા ગાવો મહાદાનાનિ વૈ દશ ॥ ૭॥

ગૃહીત્વૈતાનિ સર્વાણિ બ્રાહ્મણો જ્ઞાનવિત્સદા ।
વદાન્યાંસ્તારયેત્સદ્યો હ્યાત્માનં ચ ન સંશયઃ ॥ ૮॥

સુવર્ણં યે પ્રયચ્છન્તિ નરાઃ શુદ્ધેન ચેતસા ।
દેવતાસ્તં પ્રયચ્છન્તિ સમન્તાદિતિ મે શ્રુતમ્ ॥ ૯॥

અગ્નિર્હિ દેવતાઃ સર્વાઃ સુવર્ણં ચ હુતાશનઃ ।
તસ્માત્ સુવર્ણં દત્ત્વા ચ દત્તાઃ સ્યુઃ સર્વદેવતાઃ ॥ ૧૦॥

પૃથ્વીદાનં મહાશ્રેષ્ઠં સર્વકામફલપ્રદમ્ ।
સૌવર્ણં ચ વિશેષેણ યત્કૃતં પૃથુના પુરા ॥ ૧૧॥

દીયમાનાં પ્રપશ્યન્તિ પૃથ્વીં રુક્મસમન્વિતામ્ ।
સર્વપાપવિનિર્મુક્તાસ્તે યાન્તિ પરમાં ગતિમ્ ॥ ૧૨॥

અથાન્યચ્ચ પ્રવક્ષ્યામિ દાનં સર્વોત્તમં મુને ।
કાન્તારં યન્ન પશ્યન્તિ યમસ્ય બહુદુઃખદમ્ ॥ ૧૩॥

કુર્યાત્ કાન્તારદાનં હિ વિધિના શુદ્ધમાનસઃ ।
ન્યાયાર્જિતેન દ્રવ્યેણ વિત્તશાઠ્યવિવર્જિતઃ ॥ ૧૪॥

તિલપ્રસ્થમયીં કૃત્વા ધેનું સર્વગુણાન્વિતામ્ ।
ધેનુવત્સં સુવર્ણં ચ સુદિવ્યં સર્વલક્ષણમ્ ॥ ૧૫॥

પદ્મમષ્ટદલં કૃત્વા કુઙ્કુમાક્તાક્ષતૈઃ શુભૈઃ ।
પૂજયેત્તત્ર રુદ્રાદીન્સર્વાન્દેવાન્સુભક્તિતઃ ॥ ૧૬॥

એવં સમ્પૂજ્ય તાં દદ્યાદ્ બ્રાહ્મણાય સ્વશક્તિતઃ ।
સરત્નાં સહિરણ્યાં ચ સર્વાભરણભૂષિતામ્ ॥ ૧૭॥

તતો નક્તં સમશ્નીયાદ્દીપાન્ દદ્યાત્તુ વિસ્તરાત્ ।
કાર્તિક્યામિતિ કર્તવ્યં પૂર્ણિમાયાં પ્રયત્નતઃ ॥ ૧૮॥

એવં યઃ કુરુતે સમ્યગ્વિધાનેન સ્વશક્તિતઃ ।
યમમાર્ગભયં ઘોરં નરકં ચ ન પશ્યતિ ॥ ૧૯॥

કૃત્વા પાપાન્યશેષાણિ સબન્ધુઃ સસુહૃજ્જનઃ ।
દિવિ સઙ્ક્રીડતે વ્યાસ યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૨૦॥

વિધિતો ગોશ્ચ દાનં વૈ સર્વોત્તમમિહ સ્મૃતમ્ ।
ન તેન સદૃશં વ્યાસ પરં દાનં પ્રકીર્તિતમ્ ॥ ૨૧॥

પ્રયચ્છતે યઃ કપિલાં સવત્સાં સ્વર્ણશૃઙ્ગિકામ્ ।
કાંસ્યપાત્રાં રૌપ્યખુરાં સર્વલક્ષણલક્ષિતામ્ ॥ ૨૨॥

તૈસ્તૈર્ગુણૈઃ કામદુઘા ભૂત્વા સા ગૌરુપૈતિ તમ્ ।
પ્રદાતારં નરં વ્યાસ પરત્રેહ ચ જન્મનિ ॥ ૨૩॥

યદ્યદિષ્ટતમં લોકે તદસ્તિ દયિતં ગૃહે ।
તત્તદ્ ગુણવતે દેયં તદેવાક્ષયમિચ્છતા ॥ ૨૪॥

તુલાપુરુષદાનં હિ દાનાનાં દાનમુત્તમમ્ ।
તુલાસંરોહણં કાર્યં યદીચ્છેચ્છ્રેય આત્મનઃ ॥ ૨૫॥

યત્કૃત્વા મુચ્યતે પાપૈર્વધબન્ધકૃતોદ્ભવૈઃ ।
તુલાદાનં મહત્પુણ્યં સર્વપાપક્ષયઙ્કરમ્ ॥ ૨૬॥

કૃત્વા પાપાન્યશેષાણિ તુલાદાનં કરોતિ યઃ ।
સર્વૈસ્તુ પાતકૈર્મુક્તઃ સ દિવં યાત્યસંશયમ્ ॥ ૨૭॥

પાપં કૃતં યદ્દિવસે નિશાયાં
દ્વિસન્ધ્યયોર્મધ્યદિને નિશાન્તે ।
કાલત્રયે કાયમનોવચોભિઃ
તુલાપુમાન્વૈ તદપાકરોતિ ॥ ૨૮॥

બાલેન વૃદ્ધેન મયા હિ યૂના
વિજાનતા જ્ઞાનપરેણ પાપમ્ ।
તત્સર્વમેવાશુ કૃતં મદીયં
તુલાપુમાન્ વૈ હરતુ સ્મરારિઃ ॥ ૨૯॥

પાત્રે પ્રયુક્તં દ્રવિણં મયાદ્ય
પ્રમાણપૂર્ણં નિહિતં તુલાયામ્ ।
તેનૈવ સાર્ધં તુ મમાવશેષં
કૃતાકૃતં યત્સુકૃતં સમેતુ ॥ ૩૦॥

સનત્કુમાર ઉવાચ ।
એવમુચ્ચાર્ય તં દદ્યાત્ દ્વિજેભ્યઃ સર્વદા હિતઃ ।
નૈકસ્યાપિ પ્રદાતવ્યં ન નિસ્તારસ્તતો ભવેત્ ॥ ૩૧॥

દદાત્યેવં તુ યો વ્યાસ તુલાપુરુષમુત્તમમ્ ।
હત્વા પાપં દિવ્યં તિષ્ઠેદ્યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૩૨॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં સામાન્યદાનવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૫.૧૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૧૫. પઞ્ચદશોઽધ્યાયઃ । પાતાલલોકવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
યેનૈકેન હિ દત્તેન સર્વેષાં પ્રાપ્યતે ફલમ્ ।
દાનાનાં તન્મમાખ્યાહિ માનુષાણાં હિતાર્થતઃ ॥ ૧॥

સનત્કુમાર ઉવાચ ।
શ ृણુ કાલે પ્રદત્તાદ્ધિ ફલં વિન્દન્તિ માનવાઃ ।
એકસ્માદપિ સર્વેષાં દાનાનાં તદ્વદામિ તે ॥ ૨॥

દાનાનામુત્તમં દાનં બ્રહ્માણ્ડં ખલુ માનવૈઃ ।
દાતવ્યં મુક્તિકામૈસ્તુ સંસારોત્તારણાય વૈ ॥ ૩॥

બ્રહ્માણ્ડે સકલે દત્તે યત્ફલં લભતે નરઃ ।
તદેકભાવાદાપ્નોતિ સપ્તલોકાધિપો ભવેત્ ॥ ૪॥

યાવચ્ચન્દ્રદિવાકરૌ નભસિ વા યાવત્ સ્થિરા મેદિની
તાવત્સોઽપિ નરઃ સ્વબાન્ધવયુતઃ સ્વર્ગૌકસામોકસિ ।
સર્વેષ્વેવ મનોનુગેષુ કકુભિર્બ્રહ્માણ્ડદઃ ક્રીડતે
પશ્ચાદ્યાતિ પદં સુદુર્લભતરં દેવૈર્મુદે માધવમ્ ॥ ૫॥

વ્યાસ ઉવાચ ।
ભગવન્ બ્રૂહિ બ્રહ્માણ્ડં યત્પ્રમાણં યદાત્મકમ્ ।
યદાધારં યથાભૂતં યેન મે પ્રત્યયો ભવેત્ ॥ ૬॥

સનત્કુમાર ઉવાચ ।
મુને શ઼ૃણુ પ્રવક્ષ્યામિ યદુત્સેધં તુ વિસ્તરમ્ ।
બ્રહ્માણ્ડં તત્તુ સઙ્ક્ષેપાચ્છ્રુત્વા પાપાત્પ્રમુચ્યતે ॥ ૭॥

યત્તત્કારણમવ્યક્તં વ્યક્તં શિવમનામયમ્ ।
તસ્માત્સઞ્જાયતે બ્રહ્મા દ્વિધાભૂતાદ્ધિ કાલતઃ ॥ ૮॥

બ્રહ્માણ્ડં સૃજતિ બ્રહ્મા ચતુર્દશભવાત્મકમ્ ।
તદ્વચ્મિ ક્રમતસ્તાત સમાસાચ્છૃણુ યત્નતઃ ॥ ૯॥

પાતાલાનિ તુ સપ્તૈવ ભુવનાનિ તથોર્ધ્વતઃ ।
ઉચ્છ્રાયો દ્વિગુણસ્તસ્ય જલમધ્યે સ્થિતસ્ય ચ ॥ ૧૦॥

તસ્યાધારઃ સ્થિતો નાગઃ સ ચ વિષ્ણુઃ પ્રકીર્તિતઃ ।
બ્રહ્મણો વચસાં હેતોર્બિભર્તિ સકલં ત્વિદમ્ ॥ ૧૧॥

શેષસ્યાસ્ય ગુણાન્ વક્તું ન શક્તા દેવદાનવાઃ ।
યોઽનન્તઃ પઠ્યતે સિદ્ધૈર્દેવર્ષિગણપૂજિતઃ ॥ ૧૨॥

શિરઃ સહસ્રયુક્તઃ સ સર્વા વિદ્યોતયન્દિશઃ ।
ફણામણિસહસ્રેણ સ્વસ્તિકામલભૂષણઃ ॥ ૧૩॥

મદાઘૂર્ણિતનેત્રોઽસૌ સાગ્નિઃ શ્વેત ઇવાચલઃ ।
સ્રગ્વી કિરીટી હ્યાભાતિ યઃ સદૈવૈકકુણ્ડલઃ ॥ ૧૪॥

સાભ્રગઙ્ગાપ્રવાહેણ શ્વેતશૈલોપશોભિતઃ ।
નીલવાસા મદોદ્રિક્તઃ કૈલાસાદ્રિરિવાપરઃ ॥ ૧૫॥

લાઙ્ગલાસક્તહસ્તાગ્રો બિભ્રન્મુસલમુત્તમમ્ ।
યોઽર્ચ્યતે નાગકન્યાભિઃ સ્વર્ણવર્ણાભિરાદરાત્ ॥ ૧૬॥

સઙ્કર્ષણાત્મકો રુદ્રો વિષાનલશિખોજ્જ્વલઃ ।
કલ્પાન્તે નિષ્ક્રમન્તે યદ્વક્ત્રેભ્યોઽગ્નિશિખા મુહુઃ ।
દગ્ધ્વા જગત્ત્રયં શાન્તા ભવન્તીત્યનુશુશ્રુમઃ ॥ ૧૭॥

આસ્તે પાતાલમૂલસ્થઃ સશેષઃ ક્ષિતિમણ્ડલમ્ ।
બિભ્રત્સ્વપૃષ્ઠે ભૂતેશઃ શેષોઽશેષગુણાર્ચિતઃ ॥ ૧૮॥

તસ્ય વીર્યપ્રભાવશ્ચ સાકાઙ્ક્ષૈસ્ત્રિદશૈરપિ ।

ન હિ વર્ણયિતું શક્યઃ સ્વરૂપં જ્ઞાતુમેવ વા ॥ ૧૯॥

આસ્તે કુસુમમાલેવ ફણામણિશિખારુણા ।
યસ્યૈષા સકલા પૃથ્વી કસ્તદ્વીર્યં વદિષ્યતિ ॥ ૨૦॥

યદા વિજૃમ્ભતેઽનન્તો મદાઘૂર્ણિતલોચનઃ ।
તદા ચલતિ ભૂરેષા સાદ્રિતોયાધિકાનના ॥ ૨૧॥

દશસાહસ્રમેકૈકં પાતાલં મુનિસત્તમ ।
અતલં વિતલં ચૈવ સુતલં ચ રસાતલમ્ ॥ ૨૨॥

તલં તલાતલં ચાગ્ર્યં પાતાલં સપ્તમં મતમ્ ।
ભૂમેરધઃ સપ્તલોકા ઇમે જ્ઞેયા વિચક્ષણૈઃ ॥ ૨૩॥

ઉચ્છ્રાયો દ્વિગુણશ્ચૈષાં સર્વેષાં રત્નભૂમયઃ ।
રત્નવન્તોઽથ પ્રાસાદા ભૂમયો હેમસમ્ભવાઃ ॥ ૨૪॥

તેષુ દાનવદૈતેયા નાગાનાં જાતયસ્તથા ।
નિવસન્તિ મહાનાગા રાક્ષસા દૈત્યસમ્ભવાઃ ॥ ૨૫॥

પ્રાહ સ્વર્ગસદોમધ્યે પાતાલાનીતિ નારદઃ ।
સ્વર્લોકાદતિ રમ્યાણિ તેભ્યોઽસાવાગતો દિવિ ॥ ૨૬॥

નાનાભૂષણભૂષાશ્ચ મણયો યત્ર સુપ્રભાઃ ।
આહ્લાદકારિણઃ શુભ્રાઃ પાતાલં કેન તત્સમમ્ ॥ ૨૭॥

પાતાલે કસ્ય ન પ્રીતિરિતશ્ચેતશ્ચ શોભિતે ।
દૈત્યદાનવકન્યાભિર્વિમુક્તસ્યાભિજાયતે ॥ ૨૮॥

દિવાર્કરશ્મયો યત્ર ન ભવન્તિ વિધોર્નિશિ ।
ન શીતમાતપો યત્ર મણિતેજોઽત્ર કેવલમ્ ॥ ૨૯॥

ભક્ષ્યભોજ્યાન્નપાનાનિ ભુજ્યન્તે મુદિતૈર્ભૃશમ્ ।
યત્ર ન જ્ઞાયતે કાલો ગતોઽપિ મુનિસત્તમ ॥ ૩૦॥

પુંસ્કોકિલરુતં યત્ર પદ્માનિ કમલાકરાઃ ।
નદ્યઃ સરાંસિ રમ્યાણિ મનોજ્ઞાન્યમ્બરાણિ ચ ॥ ૩૧॥

ભૂષણાન્યતિશુભ્રાણિ ગન્ધાઢ્યં ચાનુલેપનમ્ ।
વીણાવેણુમૃદઙ્ગાનાં સ્વના ગેયાનિ ચ દ્વિજ ॥ ૩૨॥

દૈત્યોરગૈશ્ચ ભુજ્યન્તે પાતાલે વૈ સુખાનિ ચ ।
તપસા સમવાપ્નોતિ દાનવૈઃ સિદ્ધમાનવૈઃ ॥ ૩૩॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં બ્રહ્માણ્ડકથને પાતાલલોકવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૫.૧૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૧૬. ષોડશોઽધ્યાયઃ । નરકોદ્ધારવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
તેષાં મૂર્ધોપરિષ્ટાદ્વૈ નરકાંસ્તાન્ શ્રુણુષ્વ ચ ।
મત્તો મુનિવરશ્રેષ્ઠ પચ્યન્તે યત્ર પાપિનઃ ॥ ૧॥

રૌરવઃ શૂકરો રોધસ્તાલો વિવસનસ્તથા ।
મહાજ્વાલસ્તપ્તકુમ્ભો લવણોઽપિ વિલોહિતઃ ॥ ૨॥

વૈતરણી પૂયવહા કૃમિશઃ કૃમિભોજનઃ ।
અસિપત્રવનં ઘોરં લાલાભક્ષશ્ચ દારુણઃ ॥ ૩॥

તથા પૂયવહઃ પ્રાયો વન્હિજ્વાલો હ્યધઃશિરાઃ ।
સન્દંશઃ કાલસૂત્રશ્ચ તમશ્ચાવીચિરોધનઃ ॥ ૪॥

શ્વભોજનોઽથ રુષ્ટશ્ચ મહારૌરવશાલ્મલી ।
ઇત્યાદ્યા બહવસ્તત્ર નરકા દુઃખદાયકાઃ ॥ ૫॥

પચ્યન્તે તેષુ પુરુષાઃ પાપકર્મરતાસ્તુ યે ।
ક્રમાદ્વક્ષ્યે તુ તાન્ વ્યાસ સાવધાનતયા શ઼ૃણુ ॥ ૬॥

કૂટસાક્ષ્યં તુ યો વક્તિ વિના વિપ્રાન્ સુરાંશ્ચ ગાઃ ।
સદાનૃતં વદેદ્યસ્તુ સ નરો યાતિ રૌરવમ્ ॥ ૭॥

ભ્રૂણહા સ્વર્ણહર્તા ચ ગોરોધી વિશ્વઘાતકઃ ।
સુરાપો બ્રહ્મહન્તા ચ પરદ્રવ્યાપહારકઃ ॥ ૮॥

યસ્તત્સઙ્ગી સ વૈ યાતિ મૃતો વ્યાસ ગુરોર્વધાત્ ।
તપ્તકુમ્ભે સ્વસુર્માતુર્ગોશ્ચૈવ દુહિતુસ્તથા ॥ ૯॥

સાધ્વ્યા વિક્રયકૃચ્ચાથ વાર્દ્ધકી કેશવિક્રયી ।
તપ્તલોહેષુ પચ્યન્તે યશ્ચ ભક્તં પરિત્યજેત્ ॥ ૧૦॥

અવમન્તા ગુરૂણાં યઃ પશ્ચાદ્ભોક્તા નરાધમઃ ।
દેવદૂષયિતા ચૈવ દેવવિક્રયિકશ્ચ યઃ ॥ ૧૧॥

અગમ્યગામી યશ્ચાન્તે યાતિ સપ્તબલં દ્વિજ ।
ચૌરો ગોઘ્નો હિ પતિતો મર્યાદાદૂષકસ્તથા ॥ ૧૨॥

દેવદ્વિજપિતૃદ્વેષ્ટા રત્નદૂષયિતા ચ યઃ ।
સ યાતિ કૃમિભક્ષં વૈ કૃમીનત્તિ દુરિષ્ટિકૃત્ ॥ ૧૩॥

પિતૃદેવસુરાન્ યસ્તુ પર્યશ્નાતિ નરાધમઃ ।
લાલાભક્ષં સ યાત્યજ્ઞો યઃ શાસ્ત્રકૂટકૃન્નરઃ ॥ ૧૪॥

યશ્ચાન્ત્યજેન સંસેવ્યો હ્યસદ્ગ્રાહી તુ યો દ્વિજઃ ।
અયાજ્યયાજકશ્ચૈવ તથૈવાભક્ષ્યભક્ષકઃ ॥ ૧૫॥

રુધિરૌઘે પતન્ત્યેતે સોમવિક્રયિણશ્ચ યે ।
મધુહા ગ્રામહા યાતિ ક્રૂરાં વૈતરણીં નદીમ્ ॥ ૧૬॥

નવયૌવનમત્તાશ્ચ મર્યાદાભેદિનશ્ચ યે ।
તે કૃમ્યં યાન્ત્યશૌચાશ્ચ કુલટાજીવિનશ્ચ યે ॥ ૧૭॥

અસિપત્રવનં યાતિ વૃક્ષચ્છેદી વૃથૈવ યઃ ।
ક્ષુરભ્રકા મૃગવ્યાધા વહ્નિજ્વાલે પતન્તિ તે ॥ ૧૮॥

ભ્રષ્ટાચારો હિ યો વિપ્રઃ ક્ષત્રિયો વૈશ્ય એવ ચ ।
યાત્યન્તે દ્વિજ તત્રૈવ યઃ શ્વપાકેષુ વહ્નિદઃ ॥ ૧૯॥

વ્રતસ્ય લોપકા યે ચ સ્વાશ્રમાદ્વિચ્યુતાશ્ચ યે ।
સન્દંશયાતનામધ્યે પતન્તિ ભૃશદારુણે ॥ ૫.૧૬.૨૦॥

વીર્યં સ્વપ્નેષુ સ્કન્દેયુર્યે નરા બ્રહ્મચારિણઃ ।
પુત્રા નાધ્યાપિતા યૈશ્ચ તે પતન્તિ શ્વભોજને ॥ ૨૧॥

એતે ચાન્યે ચ નરકાઃ શતશોઽથ સહસ્રશઃ ।
યેષુ દુષ્કૃતકર્માણઃ પચ્યન્તે યાતનાગતાઃ ॥ ૨૨॥

તથૈવ પાપાન્યેતાનિ તથાન્યાનિ સહસ્રશઃ ।
ભુજ્યન્તે યાનિ પુરુષૈર્નરકાન્તરગોચરૈઃ ॥ ૨૩॥

વર્ણાશ્રમવિરુદ્ધં ચ કર્મ કુર્વન્તિ યે નરાઃ ।
કર્મણા મનસા વાચા નિરયે તુ પતન્તિ તે ॥ ૨૪॥

અધઃશિરોભિર્દૃશ્યન્તે નારકા દિવિ દૈવતૈઃ ।
દેવાનધોમુખાન્ સર્વાનધઃ પશ્યન્તિ નારકાઃ ॥ ૨૫॥

સ્થાવરાઃ કૃમયોઽબ્જાશ્ચ પક્ષિણઃ પશવો નરાઃ ।
ધાર્મિકાસ્ત્રિદશાસ્તદ્વન્મોક્ષિણશ્ચ યથાક્રમમ્ ॥ ૨૬॥

યાવન્તો જન્તવઃ સ્વર્ગે તાવન્તો નરકૌકસઃ ।
પાપકૃદ્યાતિ નરકં પ્રાયશ્ચિત્તપરાઙ્મુખઃ ॥ ૨૭॥

ગુરૂણિ ગુરુભિશ્ચૈવ લઘૂનિ લઘુભિસ્તથા ।
પ્રાયશ્ચિત્તાનિ કાલેય મનુઃ સ્વાયમ્ભુવોઽબ્રવીત્ ॥ ૨૮॥

યાનિ તેષામશેષાણાં કર્માણ્યુક્તાનિ તેષુ વૈ ।
પ્રાયશ્ચિત્તમશેષેણ હરાનુસ્મરણં પરમ્ ॥ ૨૯॥

પ્રાયશ્ચિત્તં તુ તસ્યૈકં યસ્ય પુંસઃ પ્રજાયતે ।
કૃતે પાપેઽનુતાપોઽપિ શિવસંસ્મરણં પરમ્ ॥ ૩૦॥

માહેશ્વરમવાપ્નોતિ મધ્યાહ્નાદિષુ સંસ્મરન્ ।
પ્રાતર્નિશિ ચ સન્ધ્યાયાં ક્ષીણપાપો ભવેન્નરઃ ॥ ૩૧॥

મુક્તિં પ્રયાતિ સ્વર્ગં વા સમસ્તક્લેશસઙ્ક્ષયમ્ ।
શિવસ્ય સ્મરણાદેવ તસ્ય શમ્ભોરુમાપતેઃ ॥ ૩૨॥

પાપન્તરાયો વિપ્રેન્દ્ર જપહોમાર્ચનાદિ ચ ।
ભવત્યેવ ન કુત્રાપિ ત્રૈલોક્યે મુનિસત્તમ ॥ ૩૩॥

મહેશ્વરે મતિર્યસ્ય જપહોમાર્ચનાદિષુ ।
યત્પુણ્યં તત્કૃતં તેન દેવેન્દ્રત્વાદિકં ફલમ્ ॥ ૩૪॥

પુમાન્ન નરકં યાતિ યઃ સ્મરેદ્ ભક્તિતો મુને ।
અહર્નિશં શિવં તસ્માત્ સ ક્ષીણાશેષપાતકઃ ॥ ૩૫॥

નરકસ્વર્ગસંજ્ઞે વૈ પાપપુણ્યે દ્વિજોત્તમ ।
યયોસ્ત્વેકં તુ દુઃખાયાન્યત્સુખાયોદ્ભવાય ચ ॥ ૩૬॥

તદેવ પ્રીતયે ભૂત્વા પુનર્દુઃખાય જાયતે ।

તત્સ્માદ્દુઃખાત્મકં નાસ્તિ ન ચ કિઞ્ચિત્સુખાત્મકમ્ ॥ ૩૭॥

મનસઃ પરિણામોઽયં સુખદુઃખોપલક્ષણઃ ।
જ્ઞાનમેવ પરં બ્રહ્મ જ્ઞાનં તત્ત્વાય કલ્પતે ॥ ૩૮॥

જ્ઞાનાત્મકમિદં વિશ્વં સકલં સચરાચરમ્ ।
પરવિજ્ઞાનતઃ કિઞ્ચિત્ વિદ્યતે ન પરં મુને ॥ ૩૯॥

એવમેતન્મયાખ્યાતં સર્વં નરકમણ્ડલમ્ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ સામ્પ્રતં મણ્ડલં ભુવઃ ॥ ૪૦॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં બ્રહ્માણ્ડવર્ણને નરકોદ્ધારવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૫.૧૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૧૭. સપ્તદશોઽધ્યાયઃ । જમ્બૂદ્વીપવર્ષવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
પારાશર્ય સુસઙ્ક્ષેપાચ્છૃણુ ત્વં વદતો મમ ।
મણ્ડલં ચ ભુવઃ સમ્યક્ સપ્તદ્વીપાદિસંયુતમ્ ॥ ૧॥

જમ્બૂઃ પ્લક્ષઃ શાલ્મલિશ્ચ કુશઃ ક્રૌઞ્ચશ્ચ શાકકઃ ।
પુષ્કરઃ સપ્તમઃ સર્વે સમુદ્રૈઃ સપ્તભિર્વૃતાઃ ॥ ૨॥

લવણેક્ષુરસૌ સર્પિર્દધિદુગ્ધજલાશયાઃ ।
જમ્બુદ્વીપઃ સમસ્તાનામેતેષાં મધ્યતઃ સ્થિતઃ ॥ ૩॥

તસ્યાપિ મેરુઃ કાલેય મધ્યે કનકપર્વતઃ ।
પ્રવિષ્ટઃ ષોડશાધસ્તાદ્યોજનૈસ્તસ્ય ચોચ્છ્રયઃ ॥ ૪॥

ચતુરશીતિમાનૈસ્તૈર્દ્વાત્રિંશન્મૂર્ધ્નિ વિસ્તૃતઃ ।
ભૂમિપૃષ્ઠસ્થશૈલોઽયં વિસ્તરસ્તસ્ય સર્વતઃ ॥ ૫॥

મૂલે ષોડશસાહસ્ત્ર કર્ણિકાકારસંસ્થિતઃ ।
હિમવાન્ હેમકૂટશ્ચ નિષધશ્ચાસ્ય દક્ષિણે ॥ ૬॥

નીલઃ શ્વેતશ્ચ શ◌ૃઙ્ગી ચ ઉત્તરે વર્ષપર્વતાઃ ।
દશસાહસ્રિકા હ્યેતે રત્નવન્તોઽરુણપ્રભાઃ ॥ ૭॥

સહસ્રયોજનોત્સેધાસ્તાવદ્વિસ્તારિણશ્ચ તે ।
ભારતં પ્રથમં વર્ષં તતઃ કિમ્પુરુષં સ્મૃતમ્ ॥ ૮॥

હરિવર્ષં તતોઽન્યદ્વૈ મેરોર્દક્ષિણતો મુને ।
રમ્યકં ચોત્તરે પાર્શ્વે તસ્યાંશે તુ હિરણ્મયમ્ ॥ ૯॥

ઉત્તરે કુરવશ્ચૈવ યથા વૈ ભારતં તથા ।
નવસાહસ્રમેકૈકમેતેષાં મુનિસત્તમ ॥ ૧૦॥

ઇલાવૃતં તુ તન્મધ્યે તન્મધ્યે મેરુરુચ્છ્રિતઃ ।
મેરોશ્ચતુર્દિશં તત્ર નવસાહસ્રમુચ્છ્રિતમ્ ॥ ૧૧॥

ઇલાવૃતમૃષિશ્રેષ્ઠ ચત્વારશ્ચાત્ર પર્વતાઃ ।
વિષ્કમ્ભા રચિતા મેરોર્યોજિતાઃ પુનરુચ્છ્રિતાઃ ॥ ૧૨॥

પૂર્વે હિ મન્દરો નામ દક્ષિણે ગન્ધમાદનઃ ।
વિપુલઃ પશ્ચિમે ભાગે સુપાર્શ્વશ્ચોત્તરે સ્થિતઃ ॥ ૧૩॥

કદમ્બો જમ્બુવૃક્ષશ્ચ પિપ્પલો વટ એવ ચ ।
એકાદશશતાયામાઃ પાદપા ગિરિકેતવઃ ॥ ૧૪॥

જમ્બૂદ્વીપસ્ય નામ્નો વૈ હેતું શ ृણુ મહામુને ।
વિરાજન્તે મહાવૃક્ષાસ્તત્સ્વભાવં વદામિ તે ॥ ૧૫॥

મહાગજપ્રમાણાનિ જમ્બ્વાસ્તસ્યાઃ ફલાનિ ચ ।
પતન્તિ ભૂભૃતઃ પૃષ્ઠે શીર્યમાણાનિ સર્વતઃ ॥ ૧૬॥

રસેન તેષાં વિખ્યાતા તત્ર જમ્બૂનદીતિ વૈ ।
પરિતો વર્તતે તત્ર પીયતે તન્નિવાસિભિઃ ॥ ૧૭॥

ન સ્વેદો ન ચ દૌર્ગન્ધ્યં ન જરા ચેન્દ્રિયગ્રહઃ ।
તસ્યાસ્તટે સ્થિતાનાં તુ જનાનાં તત્ર જાયતે ॥ ૧૮॥

તીરમૃત્સ્નાં ચ સમ્પ્રાપ્ય સુખવાયુવિશોષિતામ્ ।
જામ્બૂનદાખ્યં ભવતિ સુવર્ણં સિદ્ધભૂષણમ્ ॥ ૧૯॥

ભદ્રાશ્વં પૂર્વતો મેરોઃ કેતુમાલં ચ પશ્ચિમે ।
વર્ષે દ્વે તુ મુનિશ્રેષ્ઠ તયોર્મધ્ય ઇલાવૃતમ્ ॥ ૨૦॥

વનં ચૈત્રરથં પૂર્વે દક્ષિણે ગન્ધમાદનઃ ।
વિભ્રાજં પશ્ચિમે તદ્વદુત્તરે નન્દનં સ્મૃતમ્ ॥ ૨૧॥

અરુણોદં મહાભદ્રં શીતોદં માનસં સ્મૃતમ્ ।
સરાંસ્યેતાનિ ચત્વારિ દેવભોગ્યાનિ સર્વશઃ ॥ ૨૨॥

શીતાઞ્જનઃ કુરુઙ્ગશ્ચ કુરરો માલ્યવાંસ્તથા ।
એકૈકપ્રમુખા મેરોઃ પૂર્વતઃ કેસરાચલાઃ ॥ ૨૩॥

ત્રિકૂટઃ શિશિરશ્ચૈવ પતઙ્ગો રુચકસ્તથા ।
નિષધઃ કપિલાદ્યાશ્ચ દક્ષિણે કેસરાચલાઃ ॥ ૨૪॥

સિનીવાસઃ કુસુમ્ભશ્ચ કપિલો નારદસ્તથા ।
નાગાદયશ્ચ ગિરયઃ પશ્ચિમે કેસરાચલાઃ ॥ ૨૫॥

શઙ્ખચૂડોઽથ ઋષભો હંસો નામ મહીધરઃ ।
કાલઞ્જરાદ્યાશ્ચ તથા ઉત્તરે કેસરાચલાઃ ॥ ૨૬॥

મેરોરુપરિ મધ્યે હિ શાતકૌમ્ભં વિધેઃ પુરમ્ ।
ચતુર્દશસહસ્રાણિ યોજનાનિ ચ સઙ્ખ્યયા ॥ ૨૭॥

અષ્ટાનાં લોકપાલાનાં પરિતસ્તદનુક્રમાત્ ।
યથાદિશં યથારૂપં પુરોઽષ્ટાવુપકલ્પિતાઃ ॥ ૨૮॥

તસ્યાં ચ બ્રહ્મણઃ પુર્યાં પ્લાવયિત્વેન્દુમણ્ડલમ્ ।
વિષ્ણુપાદવિનિષ્ક્રાન્તા ગઙ્ગા પતતિ વૈ નદી ॥ ૨૯॥

સીતા ચાલકનન્દા ચ ચક્ષુર્ભદ્રા ચ વૈ ક્રમાત્ ।
સા તત્ર પતિતા દિક્ષુ ચતુર્ધા પ્રત્યપદ્યત ॥ ૩૦॥

સીતા પૂર્વેણ શૈલં હિ નન્દા ચૈવ તુ દક્ષિણે ।
સા ચક્ષુઃ પશ્ચિમે ચૈવ ભદ્રા ચોત્તરતો વ્રજેત્ ॥ ૩૧॥

ગિરીનતીત્ય સકલાંશ્ચતુર્દિક્ષુ મહામ્બુધિમ્ ।
સા યયૌ પ્રયતા ભૂતા ગઙ્ગા ત્રિપથગામિની ॥ ૩૨॥

સુનીલનિષધૌ યૌ તૌ માલ્યવદ્ગન્ધમાદનૌ ।
તેષાં મધ્યગતો મેરુઃ કર્ણિકાકારસંસ્થિતઃ ॥ ૩૩॥

ભારતઃ કેતુમાલશ્ચ ભદ્રાશ્વઃ કુરવસ્તથા ।
પત્રાણિ લોકપદ્મસ્ય મર્યાદાલોકપર્વતાઃ ॥ ૩૪॥

જઠરં દેવકૂટશ્ચ આયામે દક્ષિણોત્તરે ।

ગન્ધમાદનકૈલાસૌ પૂર્વપશ્ચિમતો ગતૌ ॥ ૩૫॥

પૂર્વપશ્ચિમતો મેરોર્નિષધો નીલપર્વતઃ ।
દક્ષિણોત્તરમાયાતૌ કર્ણિકાન્તર્વ્યવસ્થિતૌ ॥ ૩૬॥

જઠરાદ્યાઃ સ્થિતા મેરોર્યેષાં દ્વૌ દ્વૌ વ્યવસ્થિતૌ ।
કેસરાઃ પર્વતા એતે શ્વેતાદ્યાઃ સુમનોરમાઃ ॥ ૩૭॥

શૈલાનામન્તરે દ્રોણ્યઃ સિદ્ધચારણસેવિતાઃ ।
સુરમ્યાણિ તથા તાસુ કાનનાનિ પુરાણિ ચ ॥ ૩૮॥

સર્વેષાં ચૈવ દેવાનાં યક્ષગન્ધર્વરક્ષસામ્ ।
ક્રીડન્તિ દેવદૈતેયાઃ શૈલપ્રાયેષ્વહર્નિશમ્ ॥ ૩૯॥

ધર્મિણામાલયા હ્યેતે ભૌમાઃ સ્વર્ગાઃ પ્રકીર્તિતાઃ ।
ન તેષુ પાપકર્તારો યાન્તિ પશ્યન્તિ કુત્રચિત્ ॥ ૪૦॥

યાનિ કિમ્પુરુષાદીનિ વર્ષાણ્યષ્ટૌ મહામુને ।
ન તેષુ શોકો નાપત્ત્યો નોદ્વેગઃ ક્ષુદ્ભયાદિકમ્ ॥ ૪૧॥

સ્વસ્થાઃ પ્રજા નિરાતઙ્કાઃ સર્વદુઃખવિવર્જિતાઃ ।
દશદ્વાદશવર્ષાણાં સહસ્રાણિ સ્થિરાયુષઃ ॥ ૪૨॥

કૃતત્રેતાદિકાશ્ચૈવ ભૌમાન્યમ્ભાંસિ સર્વતઃ ।
ન તેષુ વર્ષતે દેવસ્તેષુ સ્થાનેષુ કલ્પના ॥ ૪૩॥

સપ્તસ્વેતેષુ નદ્યશ્ચ સુજાતાઃ સ્વર્ણવાલુકાઃ ।
શતશઃ સન્તિ ક્ષુદ્રાશ્ચ તાસુ ક્રીડેચ્છુભો જનઃ ॥ ૪૪॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં બ્રહ્માણ્ડકથને જમ્બૂદ્વીપવર્ષવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૫.૧૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૧૮. અષ્ટાદશોઽધ્યાયઃ । સપ્તદ્વીપવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
વક્ષ્યેઽહં ભારતં વર્ષં હિમાદ્રેશ્ચૈવ દક્ષિણે ।

ઉત્તરે તુ સમુદ્રસ્ય ભારતી યત્ર સંસૃતિઃ ॥ ૧॥

નવયોજનસાહસ્રો વિસ્તારોઽસ્ય મહામુને ।
સ્વર્ગાપવર્ગયોઃ કર્મભૂમિરેષા સ્મૃતા બુધૈઃ ॥ ૨॥

અતઃ સમ્પ્રાપ્યતે પુમ્ભિઃ સ્વર્ગો નરક એવ ચ ।
ભારતસ્યાપિ વર્ષસ્ય નવ ભેદાન્ બ્રવીમિ તે ॥ ૩॥

ઇન્દ્રદ્યુમ્નઃ કસેરુશ્ચ તામ્રવર્ણો ગભસ્તિમાન્ ।
નાગદ્વીપસ્તથા સૌમ્યો ગન્ધર્વસ્ત્વથ વારુણઃ ॥ ૪॥

અયં તુ નવમસ્તેષાં દ્વીપઃ સાગરસમ્ભૃતઃ ।
યોજનાનાં સહસ્રં તુ દ્વીપોઽયં દક્ષિણોત્તરઃ ॥ ૫॥

પૂર્વે કિરાતા યસ્ય સ્યુર્દક્ષિણે યવનાઃ સ્થિતાઃ ।
પશ્ચિમે ચ તથા જ્ઞેયા ઉત્તરે હિ તપસ્વિનઃ ॥ ૬॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યા મધ્યે શૂદ્રાશ્ચ ભૂયશઃ ।
ઇજ્યાયુદ્ધપણાસેવા વર્તયન્તો વ્યવસ્થિતાઃ ॥ ૭॥

મહેન્દ્રો મલયઃ સહ્યઃ સુદામા ચર્ક્ષપર્વતઃ ।
વિન્ધ્યશ્ચ પારિયાત્રશ્ચ સપ્તાત્ર કુલપર્વતાઃ ॥ ૮॥

વેદસ્મૃતિપુરાણાદ્યાઃ પારિયાત્રોદ્ભવા મુને ।
સર્વપાપહરા જ્ઞેયા દર્શનાત્સ્પર્શનાદપિ ॥ ૯॥

નર્મદા સુરસાદ્યાશ્ચ સપ્તાન્યાશ્ચ સહસ્રશઃ ।
વિન્ધ્યોદ્ભવા મહાનદ્યઃ સર્વપાપહરાઃ શુભાઃ ॥ ૧૦॥

ગોદાવરીભીમરથીતાપીપ્રમુખનિમ્નગાઃ ।
ગિરેર્વિનિર્ગતા ઋક્ષાત્સદ્યઃ પાપભયાપહાઃ ॥ ૧૧॥

સહ્યપાદોદ્ભવા નદ્યઃ કૃષ્ણાવેણ્યાદિકાસ્તથા ।
કૃતમાલાતામ્રપર્ણીપ્રમુખા મલયોદ્ભવાઃ ॥ ૧૨॥

ત્રિયામા ચર્ષિકુલ્યાદ્યા મહેન્દ્રપ્રભવાઃ સ્મૃતાઃ ।
ઋષિકુલ્યા કુમાર્યાદ્યાઃ શુક્તિમત્પાદસમ્ભવાઃ ॥ ૧૩॥

નાનાજનપદાસ્તેષુ મણ્ડલેષુ વસન્તિ વૈ ।
આસાં પિબન્તિ પાનીયં સરઃસુ વિવિધેષુ ચ ॥ ૧૪॥

ચત્વારિ ભારતે વર્ષે યુગાન્યાસન્ મહામુને ।
કૃતાદીનિ ન ચાન્યેષુ દ્વીપેષુ પ્રભવન્તિ હિ ॥ ૧૫॥

દાનાનિ ચાત્ર દીયન્તે સુકૃતૈશ્ચાત્ર યાજ્ઞિકૈઃ ।
તપસ્તપન્તિ યતયઃ પરલોકાર્થમાદરાત્ ॥ ૧૬॥

યતો હિ કર્મભૂરેષા જમ્બૂદ્વીપે મહામુને ।
અત્રાપિ ભારતં શ્રેષ્ઠમતોઽન્યા ભોગભૂમયઃ ॥ ૧૭॥

કદાચિલ્લભતે મર્ત્યઃ સહસ્રૈર્મુનિસત્તમ ।
અત્ર જન્મસહસ્રાણાં માનુષ્યં પુણ્યસઞ્ચયૈઃ ॥ ૧૮॥

સ્વર્ગાપવર્ગાસ્પદમાર્ગભૂતે
ધન્યાસ્તુ તે ભારતભૂમિભાગે ।
ગાયન્તિ દેવાઃ કિલ ગીતકાનિ
ભવન્તિ ભૂયઃ પુરુષાઃ સુરાસ્તે ॥ ૧૯॥

વિહૃત્ય શમ્ભોઃ પરમાત્મરૂપે ।
ફલાનિ સર્વાણિ તુ કર્મજાનિ
યાસ્યામ્યહં તત્તનુતાં હિ તસ્ય ॥ ૨૦॥

આપ્સ્યન્તિ ધન્યાઃ ખલુ તે મનુષ્યાઃ
સુખૈર્યુતાઃ કર્મણિ સન્નિવિષ્ટાઃ ।
જનુર્હિ યેષાં ખલુ ભારતેઽસ્તિ
તે સ્વર્ગમોક્ષોભયલાભવન્તઃ ॥ ૨૧॥

લક્ષયોજનવિસ્તારઃ સમસ્તપરિમણ્ડલઃ ।
જમ્બૂદ્વીપો મયા ખ્યાતઃ ક્ષારોદધિસુસંવૃતઃ ॥ ૨૨॥

સંવેષ્ટ્ય ક્ષારમુદધિં શતસાહસ્રસમ્મિતમ્ ।
તતો હિ દ્વિગુણો બ્રહ્મન્ પ્લક્ષદ્વીપઃ પ્રકીર્તિતઃ ॥ ૨૩॥

ગોમન્તશ્ચૈવ ચન્દ્રશ્ચ નારદો દર્દુરસ્તથા ।
સોમકઃ સુમનાઃ શૈલો વૈભ્રાજશ્ચૈવ સત્તમઃ ॥ ૨૪॥

વર્ષાચલેષુ રમ્યેષુ સહિતાઃ સતતં પ્રજાઃ ।
વસન્તિ દેવગન્ધર્વા વર્ષેષ્વેતેષુ નિત્યશઃ ॥ ૨૫॥

નાધયો વ્યાધયો વાપિ જનાનાં તત્ર કુત્રચિત્ ।

દશ વર્ષસહસ્રાણિ તત્ર જીવન્તિ માનવાઃ ॥ ૨૬॥

અનુતપ્તા શિખી ચૈવ પાપઘ્ની ત્રિદિવા કૃપા ।
અમૃતા સુકૃતા ચૈવ સપ્તૈવાત્ર ચ નિમ્નગાઃ ॥ ૨૭॥

ક્ષુદ્રનદ્યસ્તથા શૈલાસ્તત્ર સન્તિ સહસ્રશઃ ।
તાઃ પિબન્તિ સુસંહૃષ્ટા નદીર્જનપદાસ્તુ તે ॥ ૨૮॥

ન તત્રાપિ યુગાવસ્થા યથા સ્થાનેષુ સપ્તસુ ।
ત્રેતાયુગસમઃ કાલઃ સર્વદૈવ મહામુને ॥ ૨૯॥

વિપ્રક્ષત્રિયવૈશ્યાસ્તે શૂદ્રાશ્ચ મુનિસત્તમ ।
કલ્પવૃક્ષસમાનસ્તુ તન્મધ્યે સુમહાતરુઃ ॥ ૩૦॥

પ્લક્ષસ્તન્નામસંજ્ઞો વૈ પ્લક્ષદ્વીપો દ્વિજોત્તમ ।
ઇજ્યતે તત્ર ભગવાન્ શઙ્કરો લોકશઙ્કરઃ ॥ ૩૧॥

હરિશ્ચ ભગવાન્ બ્રહ્મા યન્ત્રૈર્મન્ત્રૈશ્ચ વૈદિકૈઃ ।
સઙ્ક્ષેપેણ તથા ભૂયઃ શાલ્મલિં ત્વં નિશામય ॥ ૩૨॥

સપ્તવર્ષાણિ તત્રૈવ તેષાં નામાનિ મે શ‌ૃણુ ।
શ્વેતોઽથ હરિતશ્ચૈવ જીમૂતો રોહિતસ્તથા ॥ ૩૩॥

વૈકલો માનસશ્ચૈવ સુપ્રભઃ સપ્તમો મુને ।
શાલ્મલેન તુ વૃક્ષેણ દ્વીપઃ શાલ્મલિસંજ્ઞકઃ ॥ ૩૪॥

દ્વિગુણેન સમુદ્રેણ સતતં સંવૃતઃ સ્થિતઃ ।
વર્ષાભિવ્યઞ્જકા નદ્યસ્તાસાં નામાનિ મે શ‌ૃણુ ॥ ૩૫॥

શુક્લા રક્તા હિરણ્યા ચ ચન્દ્રા શુભ્રા વિમોચના ।
નિવૃત્તિઃ સપ્તમી તાસાં પુણ્યતોયાઃ સુશીતલાઃ ॥ ૩૬॥

સપ્તૈવ તાનિ વર્ષાણિ ચતુર્વર્ણૈર્યુતાનિ ચ ।
ભગવન્તં સદા શમ્ભું યજન્તે વિવિધૈર્મખૈઃ ॥ ૩૭॥

દેવાનાં તત્ર સાન્નિધ્યમતીવ સુમનોરમે ।
એષ દ્વીપઃ સમુદ્રેણ સુરોદેન સમાવૃતઃ ॥ ૩૮॥

દ્વિગુણેન કુશદ્વીપઃ સમન્તાદ્ બાહ્યતઃ સ્થિતઃ ।
વસન્તિ તત્ર દૈતેયા મનુજૈઃ સહ દાનવાઃ ॥ ૩૯॥

તથૈવ દેવગન્ધર્વા યક્ષાઃ કિમ્પુરુષાદયઃ ।
વર્ણાસ્તત્રૈવ ચત્વારો નિજાનુષ્ઠાનતત્પરાઃ ॥ ૪૦॥

તત્રૈવ ચ કુશદ્વીપે બ્રહ્માણં ચ જનાર્દનમ્ ।
યજન્તિ ચ તથેશાનં સર્વકામફલપ્રદમ્ ॥ ૪૧॥

કુશેશયો હરિશ્ચૈવ દ્યુતિમાન્ પુષ્પવાંસ્તથા ।
મણિદ્રુમો હેમશૈલઃ સપ્તમો મન્દરાચલઃ ॥ ૪૨॥

નદ્યશ્ચ સપ્ત તાસાં તુ નામાનિ શૃણુ તત્ત્વતઃ ।
ધૂતપાપા શિવા ચૈવ પવિત્રા સમ્મિતિસ્તથા ॥ ૪૩॥

વિદ્યા દમ્ભા મહી ચાન્યા સર્વપાપહરાસ્ત્વિમાઃ ।
અન્યાઃ સહસ્રશઃ સન્તિ શુભાપો હેમવાલુકાઃ ॥ ૪૪॥

કુશદ્વીપે કુશસ્તમ્બો ઘૃતોદેન સમાવૃતઃ ।
ક્રૌઞ્ચદ્વીપો મહાભાગ શ્રૂયતાં ચાપરો મહાન્ ॥ ૪૫॥

દ્વિગુણેન સમુદ્રેણ દધિમણ્ડેન ચાવૃતઃ ।
વર્ષાચલા મહાબુદ્ધે તેષાં નામાનિ મે શૃણુ ॥ ૪૬॥

ક્રૌઞ્ચશ્ચ વામનશ્ચૈવ તૃતીયશ્ચાન્ધકારકઃ ।
દિવાવૃતિર્મનશ્ચૈવ પુણ્ડરીકશ્ચ દુન્દુભિઃ ॥ ૪૭॥

નિવસન્તિ નિરાતઙ્કા વર્ષશૈલેષુ તેષુ વૈ ।
સર્વસૌવર્ણરમ્યેષુ સુહૃદ્દેવગણૈઃ પ્રજાઃ ॥ ૪૮॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચાનુક્રમોદિતાઃ ।
સન્તિ તત્ર મહાનદ્યઃ સપ્તાન્યાસ્તુ સહસ્રશઃ ॥ ૪૯॥

ગૌરી કુમુદ્વતી ચૈવ સન્ધ્યા રાત્રિર્મનોજવા ।
શાન્તિશ્ચ પુણ્ડરીકા ચ યાઃ પિબન્તિ પયઃ શુભમ્ ॥ ૫૦॥

ભગવાન્ પૂજ્યતે તત્ર યોગરુદ્રસ્વરૂપવાન્ ।
દધિમણ્ડોદકશ્ચાપિ શાકદ્વીપેન સંવૃતઃ ॥ ૫૧॥

દ્વિગુણેનાદ્રયઃ સપ્ત તેષાં નામાનિ મે શૃણુ ।
પૂર્વે તત્રોદયગિરિર્જલધારઃ પરે યતઃ ॥ ૫૨॥

પૃષ્ઠતોઽસ્તગિરિશ્ચૈવ હ્યવિકેશશ્ચ કેસરી ।
શાકસ્તત્ર મહાવૃક્ષઃ સિદ્ધગન્ધર્વસેવિતઃ ॥ ૫૩॥

તત્ર પુણ્યા જનપદાશ્ચાતુર્વર્ણ્યસમન્વિતાઃ ।
નદ્યશ્ચાત્ર મહાપુણ્યાઃ સર્વપાપભયાપહાઃ ॥ ૫૪॥

સુકુમારી કુમારી ચ નલિની વેણુકા તથા ।
ઇક્ષુશ્ચ રેણુકા ચૈવ ગભસ્તિઃ સપ્તમી તથા ॥ ૫૫॥

અન્યાઃ સહસ્રશસ્તત્ર ક્ષુદ્રનદ્યો મહામુને ।
મહીધરાસ્તથા સન્તિ શતશોઽથ સહસ્રશઃ ॥ ૫૬॥

ધર્મહાનિર્ન તેષ્વસ્તિ સ્વર્ગાદાગત્ય માનવાઃ ।
વર્ષેષુ તેષુ પૃથિવીં વિહરન્તિ પરસ્પરમ્ ॥ ૫૭॥

શાકદ્વીપે તુ વૈ સૂર્યઃ પ્રીત્યા જનપદૈઃ સદા ।
યથોક્તૈરિજ્યતે સમ્યક્કર્મભિર્નિયતાત્મભિઃ ॥ ૫૮॥

ક્ષીરોદેનાવૃતઃ સોઽપિ દ્વિગુણેન સમન્તતઃ ।
ક્ષીરાબ્ધિઃ સર્વતો વ્યાસ પુષ્કરાખ્યેન સંવૃતઃ ॥ ૫૯॥

દ્વિગુણેન મહાવર્ષસ્તત્ર ખ્યાતોઽત્ર માનસઃ ।
યોજનાનાં સહસ્રાણિ ઊર્ધ્વં પઞ્ચાશદુચ્છ્રિતઃ ॥ ૬૦॥

તાનિ ચૈવ તુ લક્ષાણિ સર્વતો વલયાકૃતિઃ ।
પુષ્કરદ્વીપવલયં મધ્યેન વિભજન્નિવ ॥ ૬૧॥

તેનૈવ વલયાકારા દ્વીપવર્ષસમાકૃતિઃ ।
દશવર્ષસહસ્રાણિ તત્ર જીવન્તિ માનવાઃ ॥ ૬૨॥

નિરામયા વીતશોકા રાગદ્વેષવિવર્જિતાઃ ।
અધર્મો ન મતસ્તેષાં ન બન્ધવધકૌ મુને ॥ ૬૩॥

સત્યાનૃતે ન તસ્યાસ્તાં સદૈવ વસતિઃ સદા ।
તુલ્યવેષાસ્તુ મનુજા હેમવર્ણૈકરૂપિણઃ ॥ ૬૪॥

વર્ષશ્ચાયં તુ કાલેય ભૌમઃ સ્વર્ગોપમોપમઃ ।
સર્વસ્ય સુખદઃ કાલો જરારોગવિવર્જિતઃ ॥ ૬૫॥

પુષ્કરે ધાતકીખણ્ડે મહાવીતે મહામુને ।
ન્યગ્રોધં પુષ્કરદ્વીપે બ્રહ્મણઃ સ્થાનમુત્તમમ્ ॥ ૬૬॥

તસ્મિન્નિવસતે બ્રહ્મા પૂજ્યમાનઃ સુરાસુરૈઃ ।

સ્વાદૂદકેનામ્બુધિના પુષ્કરઃ પરિવેષ્ટિતઃ ॥ ૬૭॥

એવં દ્વીપાઃ સમુદ્રૈસ્તુ સપ્ત સપ્તભિરાવૃતાઃ ।
દ્વીપાશ્ચૈવ સમુદ્રાશ્ચ સમાના દ્વિગુણૈઃ પરૈઃ ॥ ૬૮॥

ઉક્તાતિરિક્તતા તેષાં સમુદ્રેષુ સમાનિ વૈ ।
પયાંસિ સર્વદાલ્પત્વં જાયન્તે ન કદાચન ॥ ૬૯॥

સ્થાલીસ્થમગ્નિસંયોગાદધઃસ્થં મુનિસત્તમ ।
તથેન્દુવૃદ્ધૌ સલિલમૂર્ધ્વગં ભવતિ ધ્રુવમ્ ॥ ૭૦॥

ઉદયાસ્તમને ત્વિન્દોર્વર્ધન્ત્યાપો હ્રસન્તિ ચ ।
અતો ન્યૂનાતિરિક્તાશ્ચ પક્ષયોઃ શુક્લકૃષ્ણયોઃ ॥ ૭૧॥

અપાં વૃદ્ધિક્ષયૌ દૃષ્ટૌ શતશસ્તુ દશોત્તરમ્ ।
સમુદ્રાણાં મુનિશ્રેષ્ઠ સર્વેષાં કથિતં તવ ॥ ૭૨॥

ભોજનં પુષ્કરદ્વીપે પ્રજાઃ સર્વાઃ સદૈવ હિ ।
ખણ્ડસ્ય કુર્વતે વિપ્ર તત્ર સ્વયમુપસ્થિતમ્ ॥ ૭૩॥

સ્વાદૂદકસ્ય પુરતો નાસ્તિ લોકસ્ય સંસ્થિતિઃ ।
સૌવર્ણી દ્વિગુણા ભૂમિઃ સર્વજન્તુવિવર્જિતા ॥ ૭૪॥

લોકાલોકસ્તતઃ શૈલઃ સહસ્રાણ્યચલો હિ સઃ ।
ઉચ્છ્રયેણ હિ તાવન્તિ યોજનાયુતવિસ્તૃતઃ ॥ ૭૫॥

તમશ્ચાણ્ડકટાહેન સેયમુર્વી મહામુને ।
પઞ્ચાશત્કોટિવિસ્તારા સદ્વીપા સમહીધરા ॥ ૭૬॥

આધારભૂતા સર્વેષાં સર્વભૂતગુણાધિકા ।
સેયં ધાત્રી ચ કાલેય સર્વેષાં જગતામિલા ॥ ૭૭॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં બ્રહ્માણ્ડકથને સપ્તદ્વીપવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૫.૧૮॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૧૯. એકોનવિંશોઽધ્યાયઃ । લોકવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
રવિચન્દ્રમસોર્યાવન્મયૂખા ભાસયન્તિ હિ ।
તાવત્પ્રમાણા પૃથિવી ભૂલોકઃ સ તુ ગીયતે ॥ ૧॥

ભૂમેર્યોજનલક્ષે તુ સંસ્થિતં રવિમણ્ડલમ્ ।
યોજનાનાં સહસ્રાણિ સદૈવ પરિસઙ્ખ્યયા ॥ ૨॥

શશિનસ્તુ પ્રમાણાય જગતઃ પરિચક્ષતે ।
રવેરૂર્ધ્વં શશી તસ્થૌ લક્ષયોજનસઙ્ખ્યયા ॥ ૩॥

ગ્રહાણાં મણ્ડલં કૃત્સ્નં વિધોરુપરિ સંસ્થિતમ્ ।
સનક્ષત્રં સહસ્રાણિ દશૈવ પરિતોપરિ ॥ ૪॥

બુધસ્તસ્માદથો કાવ્યસ્તસ્માદ્ભૌમસ્ય મણ્ડલમ્ ।
બૃહસ્પતિસ્તદૂર્ધ્વં તુ તસ્યોપરિ શનૈશ્ચરઃ ॥ ૫॥

સપ્તર્ષિમણ્ડલં તસ્માલ્લક્ષેણૈકેન સંસ્થિતમ્ ।
ઋષિભ્યસ્તુ સહસ્રાણાં શતાદૂર્ધ્વં ધ્રુવઃ સ્થિતઃ ॥ ૬॥

મેઢીભૂતઃ સ યસ્તસ્ય જ્યોતિશ્ચક્રસ્ય વૈ ધ્રુવઃ ।
ભૂર્ભુવઃ સ્વરિતિ જ્ઞેયં ભુવ ઊર્ધ્વં ધ્રુવાદવાક્ ॥ ૭॥

એકયોજનકોટિસ્તુ યત્ર તે કલ્પવાસિનઃ ।
ધ્રુવાદૂર્ધ્વં મહર્લોકઃ સમૈતે બ્રહ્મણઃ સુતાઃ ॥ ૮॥

સનકશ્ચ સનન્દશ્ચ તૃતીયશ્ચ સનાતનઃ ।
કપિલશ્ચાસુરિશ્ચૈવ વોઢુઃ પઞ્ચશિખસ્તથા ॥ ૯॥

ઉપરિષ્ટાત્તતઃ શુક્રો દ્વિલક્ષાભ્યન્તરે સ્થિતઃ ।
દ્વિલક્ષયોજનં તસ્માદધઃ સોમસુતઃ સ્મૃતઃ ॥ ૧૦॥

દ્વિલક્ષયોજનં તસ્માદૂર્ધ્વં ભૌમઃ સ્થિતો મુને ।
દ્વિલક્ષયોજનં તસ્માદૂર્ધ્વં જીવઃ સ્થિતો ગુરુઃ ॥ ૧૧॥

દ્વિલક્ષયોજનં જીવાદૂર્ધ્વં સૌરિર્વ્યવસ્થિતઃ ।
એતે સપ્ત ગ્રહાઃ પ્રોક્તાઃ સ્વ સ્વ રાશૌ વ્યવસ્થિતા ॥ ૧૨॥

રુદ્રલક્ષૈર્યોજનતઃ સપ્તોર્ધ્વમૃષયઃ સ્થિતાઃ ।
વિશ્વલક્ષૈર્યોજનતો ધ્રુવસ્થિતિરુદાહૃતા ॥ ૧૩॥

ચતુર્ગુણોત્તરે ચાર્ધે જનલોકાત્તપઃ સ્મૃતમ્ ।
વૈરાજા યત્ર દેવા વૈ સ્થિતા દાહવિવર્જિતાઃ ॥ ૧૪॥

ષડ્ગુણેન તપોલોકાત્સત્યલોકો વ્યવસ્થિતઃ ।
બ્રહ્મલોકઃ સ વિજ્ઞેયો વસન્ત્યમલચેતસઃ ॥ ૧૫॥

સત્યધર્મરતાશ્ચૈવ જ્ઞાનિનો બ્રહ્મચારિણઃ ।
યદ્ગામિનોઽથ ભૂલોકાન્નિવસન્તિ હિ માનવાઃ ॥ ૧૬॥

ભુવર્લોકે તુ સંસિદ્ધા મુનયો દેવરૂપિણઃ ।
સ્વર્ગલોકે સુરાદિત્યા મરુતો વસવોઽશ્વિનૌ ॥ ૧૭॥

વિશ્વેદેવાસ્તથા રુદ્રાઃ સાધ્યા નાગાઃ ખગાદયઃ ।
નવગ્રહાસ્તતસ્તત્ર ઋષયો વીતકલ્મષાઃ ॥ ૧૮॥

એતે સપ્ત મહાલોકાઃ કાલેય કથિતાસ્તવ ।
પાતાલાનિ ચ સપ્તૈવ બ્રહ્માણ્ડસ્ય ચ વિસ્તરઃ ॥ ૧૯॥

દધિવૃક્ષફલં યદ્વદ્ વૃત્તિશ્ચોર્ધ્વમધસ્તથા ।
એતદણ્ડકટાહેન સર્વતો વૈ સમાવૃતમ્ ॥ ૨૦॥

દશગુણેન પયસા સર્વતસ્તત્સમાવૃતમ્ ।
વહ્નિના વાયુના ચાપિ નભસા તમસા તથા ॥ ૨૧॥

ભૂતાદિનાપિ મહતા દિગ્ગુણોત્તરવેષ્ટિતઃ ।
મહાન્તં ચ સમાવૃત્ય પ્રધાનં પુરુષઃ સ્થિતઃ ॥ ૨૨॥

અનન્તસ્ય ન તસ્યાસ્તિ સઙ્ખ્યાપિ પરમાત્મનઃ ।
તેનાનન્ત ઇતિ ખ્યાતઃ પ્રમાણં નાસ્તિ વૈ યતઃ ॥ ૨૩॥

હેતુભૂતઃ સમસ્તસ્ય પ્રકૃતિઃ સા પરા મુને ।
અણ્ડાનાં તુ સહસ્રાણાં સહસ્રાણ્યયુતાનિ ચ ॥ ૨૪॥

ઈદૃશાનાં પ્રભૂતાનિ તસ્માદવ્યક્તજન્મનઃ ।
દારુણ્યગ્નિસ્તિલે તૈલં પયઃસુ ચ યથા ઘૃતમ્ ॥ ૨૫॥

તથાસૌ પરમાત્મા વૈ સર્વં વ્યાપ્યાત્મવેદનઃ ।
આદિબીજાત્પ્રસુવતે તતસ્તેભ્યઃ પરેઽણ્ડજાઃ ॥ ૨૬॥

તેભ્યઃ પુત્રાસ્તથાન્યેષાં બીજાન્યન્યાનિ વૈ તતઃ ।

મહદાદિર્યોવિશેષાન્તાસ્તદ્ભવન્તિ સુરાદયઃ ॥ ૨૭॥

બીજાદ્ વૃક્ષપ્રરોહેણ યથા નાપચયસ્તરોઃ ।
સૂર્યકાન્તમણેઃ સૂર્યાદ્યદ્વદ્વહ્નિઃ પ્રજાયતે ॥ ૨૮॥

તદ્વત્સઞ્જાયતે સૃષ્ટિઃ શિવસ્તત્રઃ ન કામયેત્ ।
શિવશક્તિસમાયોગે દેવાદ્યાઃ પ્રભવન્તિ હિ ॥ ૨૯॥

તથા સ્વકર્મણૈકેન પ્રરોહમુપયાન્તિ વૈ ।
બ્રહ્મા વિષ્ણુશ્ચ રુદ્રાશ્ચ સ શિવઃ પરિગીયતે ॥ ૩૦॥

તસ્માદુદ્ધરતે સર્વં યસ્મિંશ્ચ લયમેષ્યતિ ।
કર્તા ક્રિયાણાં સર્વાસાં સ શિવઃ પરિગીયતે ॥ ૩૧॥

વ્યાસ ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ છિન્ધિ મે સંશયં મહત્ ।
સન્તિ લોકા હિ બ્રહ્માણ્ડાદુપરિષ્ટાન્ન વા મુને ॥ ૩૨॥

સનત્કુમાર ઉવાચ ।
બ્રહ્માણ્ડાદુપરિષ્ટાચ્ચ સન્તિ લોકા મુનીશ્વર ।
તાન્ શ ૃણુ ત્વં વિશેષેણ વચ્મિ તેઽહં સમાગતઃ ॥ ૩૩॥

વિધિલોકાત્પરો લોકો વૈકુણ્ઠ ઇતિ વિશ્રુતઃ ।
વિરાજતે મહાદીપ્ત્યા યત્ર વિષ્ણુઃ પ્રતિષ્ઠિતઃ ॥ ૩૪॥

તસ્યોપરિષ્ટાત્કૌમારો લોકો હિ પરમાદ્ભુતઃ ।
સેનાનીઃ શમ્ભુતનયો રાજતે યત્ર સુપ્રભઃ ॥ ૩૫॥

તતઃ પરમુમાલોકો મહાદિવ્યો વિરાજતે ।
યત્ર શક્તિર્વિભાત્યેકા ત્રિદેવજનની શિવા ॥ ૩૬॥

પરાત્પરા હિ પ્રકૃતી રજઃસત્ત્વતમોમયી ।
નિર્ગુણા ચ સ્વયં દેવી નિર્વિકારા શિવાત્મિકા ॥ ૩૭॥

તસ્યોપરિષ્ટાદ્વિજ્ઞેયઃ શિવલોકઃ સનાતનઃ ।
અવિનાશી મહાદિવ્યો મહાશોભાન્વિતઃ સદા ॥ ૩૮॥

વિરાજતે પરં બ્રહ્મ યત્ર શમ્ભુર્મહેશ્વરઃ ।
ત્રિદેવજનકઃ સ્વામી સર્વેષાં ત્રિગુણાત્પરઃ ॥ ૩૯॥

તત ઊર્ધ્વં ન લોકાશ્ચ ગોલોકસ્તત્સમીપતઃ ।

ગોમાતરઃ સુશીલાખ્યાસ્તત્ર સન્તિ શિવપ્રિયા ॥ ૪૦॥

તત્પાલઃ કૃષ્ણનામા હિ રાજતે શઙ્કરાજ્ઞયા ।
પ્રતિષ્ઠિતઃ શિવેનૈવ શક્ત્યા સ્વચ્છન્દચારિણા ॥ ૪૧॥

શિવલોકોઽદ્ભુતો વ્યાસ નિરાધારો મનોહરઃ ।
તથાનિર્વચનીયશ્ચ નાનાવસ્તુવિરાજિતઃ ॥ ૪૨॥

શિવસ્તુ તદધિષ્ઠાતા સર્વદેવશિરોમણિઃ ।
વિષ્ણુબ્રહ્મહરૈઃ સેવ્યઃ પરમાત્મા નિરઞ્જનઃ ॥ ૪૩॥

ઇતિ તે કથિતા તાત સર્વબ્રહ્માણ્ડસંસ્થિતિઃ ।
તદૂર્ધ્વં લોકસંસ્થાનં કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૪૪॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં લોકવર્ણનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૫.૧૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૨૦. વિંશોઽધ્યાયઃ । મનુવિશેષકથનમ્ ।

વ્યાસ ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ તત્પ્રાપ્તિં વદ સત્તમ ।
યદ્ ગત્વા ન નિવર્તન્તે શિવભક્તિયુતા નરાઃ ॥ ૧॥

સનત્કુમાર ઉવાચ ।
પરાશરસુત વ્યાસ શ‍ૃણુ પ્રીત્યા શુભાં ગતિમ્ ।
વ્રતં હિ શુદ્ધભક્તાનાં તથા શુદ્ધં તપસ્વિનામ્ ॥ ૨॥

યે શિવં શુદ્ધકર્માણઃ સુશુદ્ધતપસાન્વિતાઃ ।
સમર્ચયન્તિ તં નિત્યં વન્દ્યાસ્તે સર્વથાન્વહમ્ ॥ ૩॥

નાતપ્તતપસો યાન્તિ શિવલોકમનામયમ્ ।
શિવાનુગ્રહસદ્ધેતુસ્તપ એવ મહામુને ॥ ૪॥

તપસા દિવિ મોદન્તે પ્રત્યક્ષં દેવતાગણાઃ ।
ઋષયો મુનયશ્ચૈવ સત્યં જાનીહ મદ્વચઃ ॥ ૫॥

સુદુર્દ્ધરં દુરારાધ્યં સુદૂરં દુરતિક્રમમ્ ।

તત્સર્વં તપસા સાધ્યં તપો હિ દુરતિક્રમમ્ ॥ ૬॥

સુસ્થિતસ્તપસિ બ્રહ્મા નિત્યં વિષ્ણુર્હરસ્તથા ।
દેવા દેવ્યોઽખિલાઃ પ્રાપ્તાસ્તપસા દુર્લભં ફલમ્ ॥ ૭॥

યેન યેન હિ ભાવેન સ્થિત્વા યત્ક્રિયતે તપઃ ।
તતઃ સમ્પ્રાપ્યતેઽસૌ તૈરિહ લોકે ન સંશયઃ ॥ ૮॥

સાત્ત્વિકં રાજસં ચૈવ તામસં ત્રિવિધં સ્મૃતમ્ ।
વિજ્ઞેયં હિ તપો વ્યાસ સર્વસાધનસાધનમ્ ॥ ૯॥

સાત્ત્વિકં દૈવતાનાં હિ યતીનામૂર્ધ્વરેતસામ્ ।
રાજસં દાનવાનાં હિ મનુષ્યાણાં તથૈવ ચ ।
તામસં રાક્ષસાનાં હિ નરાણાં ક્રૂરકર્મણામ્ ॥ ૧૦॥

ત્રિવિધં તત્ફલં પ્રોક્તં મુનિભિસ્તત્ત્વદર્શિભિઃ ।
જપો ધ્યાનં તુ દેવાનામર્ચનં ભક્તિતઃ શુભમ્ ॥ ૧૧॥

સાત્ત્વિકં તદ્ધિ નિર્દિષ્ટમશેષફલસાધકમ્ ।
ઇહ લોકે પરે ચૈવ મનોઽભિપ્રેતસાધનમ્ ॥ ૧૨॥

કામનાફલમુદ્દિશ્ય રાજસં તપ ઉચ્યતે ।
નિજદેહં સુસમ્પીડ્ય દેહશોષકદુઃસહૈઃ ॥ ૧૩॥

તપસ્તામસમુદ્દિષ્ટં મનોઽભિપ્રેતસાધનમ્ ॥ ૧૪॥

ઉત્તમં સાત્ત્વિકં વિદ્યાદ્ધર્મબુદ્ધિશ્ચ નિશ્ચલા ।
સ્નાનં પૂજા જપો હોમઃ શુદ્ધશૌચમહિંસનમ્ ॥ ૧૫॥

વ્રતોપવાસચર્યા ચ મૌનમિન્દ્રિયનિગ્રહઃ ।
ધીર્વિદ્યા સત્યમક્રોધો દાનં ક્ષાન્તિર્દમો દયા ॥ ૧૬॥

વાપીકૂપતડાગાદેઃ પ્રાસાદસ્ય ચ કલ્પના ।
કૃચ્છ્રં ચાન્દ્રાયણં યજ્ઞાઃ સુતીર્થાન્યાશ્રમાઃ પુનઃ ॥ ૧૭॥

ધર્મસ્થાનાનિ ચૈતાનિ સુખદાનિ મનીષિણામ્ ।
સુધર્મઃ પરમો વ્યાસ શિવભક્તેશ્ચ કારણમ્ ॥ ૧૮॥

સઙ્ક્રાન્તિવિષુવદ્યોગો નાદમુક્તે નિયુજ્યતામ્ ।
ધ્યાનં ત્રિકાલિકં જ્યોતિરુન્મનીભાવધારણા ॥ ૧૯॥

રેચકઃ પૂરકઃ કુમ્ભઃ પ્રાણાયામસ્ત્રિધા સ્મૃતઃ ।
નાડીસઞ્ચારવિજ્ઞાનં પ્રત્યાહારનિરોધનમ્ ॥ ૨૦॥

તુરીયં તદધો બુદ્ધિરણિમાદ્યષ્ટસંયુતમ્ ।
પૂર્વોત્તમં સમુદ્દિષ્ટં પરજ્ઞાનપ્રસાધનમ્ ॥ ૨૧॥

કાષ્ઠાવસ્થા મૃતાવસ્થા હરિતા વેતિ કીર્તિતાઃ ।
નાનોપલબ્ધયો હ્યેતાઃ સર્વપાપપ્રણાશનાઃ ॥ ૨૨॥

નારી શય્યા તથા પાનં વસ્ત્રધૂપવિલેપનમ્ ।
તામ્બૂલભક્ષણં પઞ્ચ રાજૈશ્વર્યવિભૂતયઃ ॥ ૨૩॥

હેમભારસ્તથા તામ્રં ગૃહાશ્ચ રત્નધેનવઃ ।
પાણ્ડિત્યં વેદશાસ્ત્રાણાં ગીતનૃત્યવિભૂષણમ્ ॥ ૨૪॥

શઙ્ખવીણામૃદઙ્ગાશ્ચ ગજેન્દ્રઃ છત્રચામરે ।
ભોગરૂપાણિ ચૈતાનિ એભિઃ સક્તોઽનુરજ્યતે ॥ ૨૫॥

આદર્શવન્મુને સ્નેહૈસ્તિલવત્સ નિપીડ્યતે ।
અરં ગચ્છેતિ ચાપ્યેનં કુરુતે જ્ઞાનમોહિતઃ ॥ ૨૬॥

જાનન્નપીહ સંસારે ભ્રમતે ઘટિયન્ત્રવત્ ।
સર્વયોનિષુ દુઃખાર્તઃ સ્થાવરેષુ ચરેષુ ચ ॥ ૨૭॥

એવં યોનિષુ સર્વાસુ પ્રતિક્રમ્ય ભ્રમેણ ત ।
કાલાન્તરવશાદ્યાતિ માનુષ્યમતિદુર્લભમ્ ॥ ૨૮॥

વ્યુત્ક્રમેણાપિ માનુષ્યં પ્રાપ્યતે પુણ્યગૌરવાત્ ।
વિચિત્રા ગતયઃ પ્રોક્તાઃ કર્મણાં ગુરુલાઘવાત્ ॥ ૨૯॥

માનુષ્યં ચ સમાસાદ્ય સ્વર્ગમોક્ષપ્રસાધનમ્ ।
નાચરત્યાત્મનઃ શ્રેયઃ સ મૃતઃ શોચતે ચિરમ્ ॥ ૩૦॥

દેવાસુરાણાં સર્વેષાં માનુષ્યં ચાતિદુર્લભમ્ ।
તત્સમ્પ્રાપ્ય તથા કુર્યાન્ન ગચ્છેન્નરકં યથા ॥ ૩૧॥

સ્વર્ગાપવર્ગલાભાય યદિ નાસ્તિ સમુદ્યમઃ ।
દુર્લભં પ્રાપ્ય માનુષ્યં વૃથા તજ્જન્મ કીર્તિતમ્ ॥ ૩૨॥

સર્વસ્ય મૂલં માનુષ્યં ચતુર્વર્ગસ્ય કીર્તિતમ્ ।
સમ્પ્રાપ્ય ધર્મતો વ્યાસ તદ્યત્નાદનુપાલયેત્ ॥ ૩૩॥

ધર્મમૂલં હિ માનુષ્યં લબ્ધ્વા સર્વાર્થસાધકમ્ ।
યદિ લાભાય યત્નઃ સ્યાન્મૂલં રક્ષેત્સ્વયં તતઃ ॥ ૩૪॥

માનુષ્યેઽપિ ચ વિપ્રત્વં યઃ પ્રાપ્ય ખલુ દુર્લભમ્ ।
નાચરત્યાત્મનઃ શ્રેયઃ કોઽન્યસ્તસ્માદચેતનઃ ॥ ૩૫॥

દ્વીપાનામેવ સર્વેષાં કર્મભૂરિયમુચ્યતે ।
ઇતઃ સ્વર્ગશ્ચ મોક્ષશ્ચ પ્રાપ્યતે સમુપાર્જિતઃ ॥ ૩૬॥

દેશેઽસ્મિન્ ભારતે વર્ષે પ્રાપ્ય માનુષ્યમધ્રુવમ્ ।
ન કુર્યાદાત્મનઃ શ્રેયસ્તેનાત્મા ખલુ વઞ્ચિતઃ ॥ ૩૭॥

કર્મભૂમિરિયં વિપ્ર ફલભૂમિરસૌ સ્મૃતા ।
ઇહ યત્ક્રિયતે કર્મ સ્વર્ગે તદનુભુજ્યતે ॥ ૩૮॥

યાવત્સ્વાસ્થ્યં શરીરસ્ય તાવદ્ધર્મં સમાચરેત્ ।
અસ્વસ્થશ્ચોદિતોઽપ્યન્યૈર્ન કિઞ્ચિત્કર્તુમુત્સહેત્ ॥ ૩૯॥

અધ્રુવેણ શરીરેણ ધ્રુવં યો ન પ્રસાધયેત્ ।
ધ્રુવં તસ્ય પરિભ્રષ્ટમધ્રુવં નષ્ટમેવ ચ ॥ ૪૦॥

આયુષઃ ખણ્ડખણ્ડાનિ નિપતન્તિ તદગ્રતઃ ।
અહોરાત્રોપદેશેન કિમર્થં નાવબુધ્યતે ॥ ૪૧॥

યદા ન જ્ઞાયતે મૃત્યુઃ કદા કસ્ય ભવિષ્યતિ ।
આકસ્મિકે હિ મરણે ધૃતિં વિન્દતિ કસ્તથા ॥ ૪૨॥

પરિત્યજ્ય યદા સર્વમેકાકી યાસ્યતિ ધ્રુવમ્ ।
ન દદાતિ કદા કસ્માત્પાથેયાર્થમિદં ધનમ્ ॥ ૪૩॥

ગૃહીતદાનપાથેયઃ સુખં યાતિ યમાલયમ્ ।
અન્યથા ક્લિશ્યતે જન્તુઃ પાથેયરહિતે પથિ ॥ ૪૪॥

યેષાં કાલેય પુણ્યાનિ પરિપૂર્ણાનિ સર્વતઃ ।
ગચ્છતાં સ્વર્ગદેશં હિ તેષાં લાભઃ પદે પદે ॥ ૪૫॥

ઇતિ જ્ઞાત્વા નરઃ પુણ્યં કુર્યાત્પાપં વિવર્જયેત્ ।
પુણ્યેન યાતિ દેવત્વમપુણ્યો નરકં વ્રજેત્ ॥ ૪૬॥

યે મનાગપિ દેવેશં પ્રપન્નાઃ શરણં શિવમ્ ।

તેઽપિ ઘોરં ન પશ્યન્તિ યમં ન નરકં તથા ॥ ૪૭॥

કિન્તુ પાપૈર્મહામોહૈઃ કિઞ્ચિત્કાલે શિવાજ્ઞયા ।
વસન્તિ તત્ર માનુષ્યાસ્તતો યાન્તિ શિવાસ્પદમ્ ॥ ૪૮॥

યે પુનઃ સર્વભાવેન પ્રતિપન્ના મહેશ્વરમ્ ।
ન તે લિમ્પન્તિ પાપેન પદ્મપત્રમિવામ્ભસા ॥ ૪૯॥

ઉક્તં શિવેતિ યૈર્નામ તથા હર હરેતિ ચ ।
ન તેષાં નરકાદ્ભીતિર્યમાદ્ધિ મુનિસત્તમ ॥ ૫૦॥

પરલોકસ્ય પાથેયં મોક્ષોપાયમનામયમ્ ।
પુણ્યસઙ્ઘૈકનિલયં શિવ ઇત્યક્ષરદ્વયમ્ ॥ ૫૧॥

શિવનામૈવ સંસારમહારોગૈકશામકમ્ ।
નાન્યત્સંસારરોગસ્ય શામકં દૃશ્યતે મયા ॥ ૫૨॥

બ્રહ્મહત્યાસહસ્રાણિ પુરા કૃત્વા તુ પુલ્કસઃ ।
શિવેતિ નામ વિમલં શ્રુત્વા મોક્ષં ગતઃ પુરા ॥ ૫૩॥

તસ્માદ્વિવર્ધયેદ્ભક્તિમીશ્વરે સતતં બુધઃ ।
શિવભક્ત્યા મહાપ્રાજ્ઞ ભુક્તિં મુક્તિં ચ વિન્દતિ ॥ ૫૪॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં મનુવિશેષકથનં નામ વિંશોઽધ્યાયઃ ॥ ૫.૨૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૨૧. એકવિંશોઽધ્યાયઃ । રણફલવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
બ્રાહ્મણત્વં હિ દુષ્પ્રાપ્યં નિસર્ગાદ્ બ્રાહ્મણો ભવેત્ ।
ઈશ્વરસ્ય મુખાત્ક્ષત્રં બાહુભ્યામૂરુતો વિશઃ ॥ ૧॥

પદ્ભ્યાં શૂદ્રઃ સમુત્પન્ન ઇતિ તસ્ય મુખાત્ શ્રુતિઃ ।
કિમુ સ્થિતિમધઃસ્થાનાદાપ્નુવન્તિ હ્યતો વદ ॥ ૨॥

સનત્કુમાર ઉવાચ ।
દુષ્કૃતેન તુ કાલેય સ્થાનાદ્ ભ્રશ્યન્તિ માનવાઃ ।

શ્રેષ્ઠં સ્થાનં સમાસાદ્ય તસ્માદ્રક્ષેત પણ્ડિતઃ ॥ ૩॥

યસ્તુ વિપ્રત્વમુત્સૃજ્ય ક્ષત્રયોન્યાં પ્રસૂયતે ।
બ્રાહ્મણ્યાત્સ પરિભ્રષ્ટઃ ક્ષત્રિયત્વં નિષેવતે ॥ ૪॥

અધર્મસેવનાન્મૂઢસ્તથૈવ પરિવર્તતે ।
જન્માન્તરસહસ્રાણિ તમસ્યાવિશતે યતઃ ॥ ૫॥

તસ્માત્પ્રાપ્ય પરં સ્થાનં પ્રમાદ્યેન્ન તુ નાશયેત્ ।
સ્વસ્થાનં સર્વદા રક્ષેત્પ્રાપ્યાપિ વિપદો નરઃ ॥ ૬॥

બ્રાહ્મણત્વં શુભં પ્રાપ્ય બ્રાહ્મણ્યં યોઽવમન્યતે ।
ભોજ્યાભોજ્યં ન જાનાતિ સ પુમાન્ ક્ષત્રિયો ભવેત્ ॥ ૭॥

કર્મણા યેન મેધાવી શૂદ્રો વૈશ્યો હિ જાયતે ।
તત્તે વક્ષ્યામિ નિખિલં યેન વર્ણોત્તમો ભવેત્ ॥ ૮॥

શૂદ્રકર્મ યથોદ્દિષ્ટં શૂદ્રો ભૂત્વા સમાચરેત્ ।
યથાવત્પરિચર્યાં તુ ત્રિષુ વર્ણેષુ નિત્યદા ॥ ૯॥

કુરુતે કામયાનસ્તુ શૂદ્રોઽપિ વૈશ્યતાં વ્રજેત્ ।
યો યોજયેદ્ધનૈર્વૈશ્યો જુહ્વાનશ્ચ યથાવિધિ ॥ ૧૦॥

અગ્નિહોત્રમુપાદાય શેષાન્નકૃતભોજનઃ ।
સ વૈશ્યઃ ક્ષત્રિયકુલે જાયતે નાત્ર સંશયઃ ॥ ૧૧॥

ક્ષત્રિયો જાયતે યજ્ઞૈઃ સંસ્કૃતૈરાત્તદક્ષિણૈઃ ।
અધીતે સ્વર્ગમન્વિચ્છંસ્ત્રેતાગ્નિશરણં સદા ॥ ૧૨॥

આર્દ્રહસ્તપદો નિત્યં ક્ષિતિં ધર્મેણ પાલયેત્ ।
ઋતુકાલાભિગામી ચ સ્વભાર્યાં ધર્મતત્પરઃ ॥ ૧૩॥

સર્વાતિથ્યં ત્રિવર્ગસ્ય ભૂતેભ્યો દીયતામિતિ ।
ગોબ્રાહ્મણાત્મનોઽર્થં હિ સઙ્ગ્રામાભિહતો ભવેત્ ॥ ૧૪॥

તેનાગ્નિમન્ત્રપૂતાત્મા ક્ષત્રિયો બ્રાહ્મણો ભવેત્ ।
વિધિતો બ્રાહ્મણો ભૂત્વા યાજકસ્તુ પ્રજાયતે ॥ ૧૫॥

સ્વકર્મનિરતો નિત્યં સત્યવાદી જિતેન્દ્રિયઃ ।
પ્રાપ્યતે વિપુલઃ સ્વર્ગો દેવાનામપિ વલ્લભઃ ॥ ૧૬॥

બ્રાહ્મણત્વં હિ દુષ્પ્રાપ્યં કૃચ્છ્રેણ સાધ્યતે નરૈઃ ।
બ્રાહ્મણ્યાત્સકલં પ્રાપ્ય મોક્ષં ચાપિ મુનીશ્વર ॥ ૧૭॥

તસ્માત્સર્વપ્રયત્નેન બ્રાહ્મણો ધર્મતત્પરઃ ।
સાધનં સર્વવર્ગસ્ય રક્ષેદ્ બ્રાહ્મણ્યમુત્તમમ્ ॥ ૧૮॥

વ્યાસ ઉવાચ ।
સઙ્ગ્રામસ્યેહ માહાત્મ્યં ત્વયોક્તં મુનિસત્તમ ।
એતદિચ્છામ્યહં શ્રોતું બ્રૂહિ ત્વં વદતાં વર ॥ ૧૯॥

સનત્કુમાર ઉવાચ ।
અગ્નિષ્ટોમાદિભિર્યજ્ઞૈરિષ્ટ્વા વિપુલદક્ષિણૈઃ ।
ન તત્ફલમવાપ્નોતિ સઙ્ગ્રામે યદવાપ્નુયાત્ ॥ ૨૦॥

ઇતિ તત્ત્વવિદઃ પ્રાહુર્યજ્ઞકર્મવિદઃ સદા ।
તસ્માત્તત્તે પ્રવક્ષ્યામિ યત્ફલં શસ્ત્રજીવિનામ્ ॥ ૨૧॥

ધર્મલાભોઽર્થલાભશ્ચ યશોલાભસ્તથૈવ ચ ।
યઃ શૂરો વાઞ્છતે યુદ્ધં વિમૃદન્ પરવાહિનીમ્ ॥ ૨૨॥

તસ્ય ધર્માર્થકામાશ્ચ યજ્ઞાશ્ચૈવ સદક્ષિણઃ ।
પરં હ્યભિમુખં દત્ત્વા તદ્યાનં યોઽધિરોહતિ ॥ ૨૩॥

વિષ્ણુલોકે સ જાયેત યશ્ચ યુદ્ધેઽપરાજિતઃ ।
અશ્વમેધાનવાપ્નોતિ ચતુરો ન મૃતઃ સ ચેત્ ॥ ૨૪॥

યસ્તુ શસ્ત્રમનુત્સૃજ્ય મ્રિયતે વાહિનીમુખે ।
સમ્મુખો વર્તતે શૂરઃ સ સ્વર્ગાન્ન નિવર્તતે ॥ ૨૫॥

રાજા વા રાજપુત્રો વા સેનાપતિરથાપિ વા ।
હતઃ ક્ષાત્રેણ યઃ શૂરસ્તસ્ય લોકોઽક્ષયો ભવેત્ ॥ ૨૬॥

યાવન્તિ તસ્ય રોમાણિ ભિદ્યન્તેઽસ્ત્રૈર્મહાહવે ।
તાવતો લભતે લોકાન્ સર્વકામદુઘાઽક્ષયાન્ ॥ ૨૭॥

વીરાસનં વીરશય્યા વીરસ્થાનસ્થિતિઃ સ્થિરા ।
સર્વદા ભવતિ વ્યાસ ઇહ લોકે પરત્ર ચ ॥ ૨૮॥

ગવાર્થે બ્રાહ્મણાર્થે ચ સ્થાનસ્વામ્યર્થમેવ ચ ।
યે મૃતાસ્તે સુખં યાન્તિ યથા સુકૃતિનસ્તથા ॥ ૨૯॥

યઃ કશ્ચિદ્ બ્રાહ્મણં હત્વા પશ્ચાત્પ્રાણાન્ પરિત્યજેત્ ।
તત્રાસૌ સ્વપતેર્યુદ્ધે સ સ્વર્ગાન્ન નિવર્તતે ॥ ૩૦॥

ક્રવ્યાદૈર્દન્તિભિશ્ચૈવ હતસ્ય ગતિરુત્તમા ।
દ્વિજગોસ્વામિનામર્થે ભવેદ્વિપુલદાક્ષયા ॥ ૩૧॥

શક્નોત્વિહ સમર્થશ્ચ યષ્ટું ક્રતુશતૈરપિ ।
આત્મદેહપરિત્યાગઃ કર્તું યુધિ સુદુષ્કરઃ ॥ ૩૨॥

યુદ્ધં પુણ્યતમં સ્વર્ગ્યં રૂપજ્ઞં સર્વતોમુખમ્ ।
સર્વેષામેવ વર્ણાનાં ક્ષત્રિયસ્ય વિશેષતઃ ॥ ૩૩॥

ભૃશં ચૈવ પ્રવક્ષ્યામિ યુદ્ધધર્મં સનાતનમ્ ।
યાદૃશાય પ્રહર્તવ્યં યાદૃશં પરિવર્જયેત્ ॥ ૩૪॥

આતતાયિનમાયાન્તમપિ વેદાન્તઽગં દ્વિજમ્ ।
જિઘાંસન્તં જિઘાંસેત્તુ ન તેન બ્રહ્મહા ભવેત્ ॥ ૩૫॥

હન્તવ્યોઽપિ ન હન્તવ્યઃ પાનીયં યશ્ચ યાચતે ।
રણે હત્વાતુરા વ્યાસ સ નરો બ્રહ્મહા ભવેત્ ॥ ૩૬॥

વ્યાધિતં દુર્બલં બાલં સ્ત્ર્યનાથૌ કૃપણં ધ્રુવમ્ ।
ધનુર્ભગ્નં છિન્નગુણં હત્વા વૈ બ્રહ્મહા ભવેત્ ॥ ૩૭॥

એવં વિચાર્ય સદ્ધીમાન્ ભવેત્પ્રીત્યાઃ રણપ્રિયઃ ।
સ જન્મનઃ ફલં પ્રાપ્ય પરત્રેહ પ્રમોદતે ॥ ૩૮॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં રણફલવર્ણનં નામૈકવિંશોઽધ્યાયઃ ॥ ૫.૨૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૨૨. દ્વાવિંશોઽધ્યાયઃ । દેહોત્પત્તિવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
વિધિં તાત વદેદાનીં જીવજન્મ વિધાનતઃ ।
ગર્ભે સ્થિતિં ચ તસ્યાપિ વૈરાગ્યાર્થં મુનીશ્વર ॥ ૧॥

સનત્કુમાર ઉવાચ ।

શ઼ૃણુ વ્યાસ સમાસેન શાસ્ત્રસારમશેષતઃ ।
વદિષ્યામિ સુવૈરાગ્યં મુમુક્ષોર્ભવબન્ધકૃત્ ॥ ૨॥

પાકપાત્રસ્ય મધ્યે તુ પૃથગન્નં પૃથગ્જલમ્ ।
અગ્નેરૂર્ધ્વં જલં સ્થાપ્યં તદન્નં ચ જલોપરિ ॥ ૩॥

જલસ્યાધઃ સ ચાગ્નિર્હિ સ્થિતોઽગ્નિં ધમતે શનૈઃ ।
વાયુના ધમ્યમાનોઽગ્નિરત્યુષ્ણં કુરુતે જલમ્ ॥ ૪॥

તદન્નમુષ્ણતોયેન સમન્તાત્પચ્યતે પુનઃ ।
દ્વિધા ભવતિ તત્પક્વં પૃથક્કિટ્ટં પૃથગ્રસઃ ॥ ૫॥

મલૈર્દ્વાદશભિઃ કિટ્ટં ભિન્નં દેહાદ્બહિર્ભવેત્ ।
રસસ્તુ દેહે સરતિ સ પુષ્ટસ્તેન જાયતે ॥ ૬॥

કર્ણાક્ષિનાસિકા જિહ્વા દન્તાઃ શિશ્નો ગુદં નખાઃ ।
મલાશ્રયઃ કફઃ સ્વેદો વિણ્મૂત્રં દ્વાદશ સ્મૃતાઃ ॥ ૭॥

હૃત્પદ્મે પ્રતિબદ્ધાશ્ચ સર્વનાડ્યઃ સમન્તતઃ ।
જ્ઞેયા રસપ્રવાહિન્યસ્તત્પ્રકારં બ્રુવે મુને ॥ ૮॥

તાસાં મુખેષુ તં સૂક્ષ્મં પ્રાણઃ સ્થાપયેત્ રસમ્ ।
રસેન તેન નાડીસ્તાઃ પ્રાણં પૂરયતે પુનઃ ॥ ૯॥

પુનઃ પ્રયાન્તિ સમ્પૂર્ણાઃ તાશ્ચ દેહં સમન્તતઃ ।
તતઃ સ નાડીમધ્યસ્થઃ શરીરેણાત્મના રસઃ ॥ ૧૦॥

પચ્યતે પચ્યમાનાચ્ચ ભવેત્પાકદ્વયં પુનઃ ।
ત્વક્ તયા વેષ્ટ્યતે પૂર્વં રુધિરં ચ પ્રજાયતે ॥ ૧૧॥

રક્તાલ્લોમાનિ માંસં ચ કેશાઃ સ્નાયુશ્ચ માંસતઃ ।
સ્નાયુતશ્ચ તથાસ્થીનિ નખા મજ્જાસ્થિસમ્ભવાઃ ॥ ૧૨॥

મજ્જાકારણવૈકલ્યં શુક્રં હિ પ્રસવાત્મકમ્ ।
ઇતિ દ્વાદશધાન્નસ્ય પરિણામઃ પ્રકીર્તિતાઃ ॥ ૧૩॥

શુક્રોઽન્નાજ્જાયતે શુક્રાદ્દિવ્યદેહસ્ય સમ્ભવઃ ।
ઋતુકાલે યદા શુક્રં નિર્દોષં યોનિસંસ્થિતમ્ ॥ ૧૪॥

તદા તદ્ વાયુસંસ્પૃષ્ટં સ્ત્રીરક્તેનૈકતાં વ્રજેત્ ।
વિસર્ગકાલે શુક્રસ્ય જીવઃ કારણસંયુતઃ ॥ ૧૫॥

સંવૃતઃ પ્રવિશેદ્યોનિં કર્મભિઃ સ્વૈર્નિયોજિતઃ ।
તચ્છુક્રરક્તમેકસ્થમેકાહાત્કલલં ભવેત્ ॥ ૧૬॥

પઞ્ચરાત્રેણ કલલં બુદ્બુદાકારતાં વ્રજેત્ ।
બુદ્બુદઃ સપ્તરાત્રેણ માંસપેશી ભવેત્ પુનઃ ॥ ૧૭॥

ગ્રીવા શિરશ્ચ સ્કન્ધૌ ચ પૃષ્ઠવંશસ્તથોદરમ્ ।
પાણિપાદં તથા પાર્શ્વે કટિર્ગાત્રં તથૈવ ચ ॥ ૧૮॥

દ્વિમાસાભ્યન્તરેણૈવ ક્રમશઃ શમ્ભવેદિહ ।
ત્રિભિર્માસૈઃ પ્રજાયન્તે સર્વે હ્યઙ્કુરસન્ધયઃ ॥ ૧૯॥

માસૈશ્ચતુર્ભિરઙ્ગુલ્યઃ પ્રજાયન્તે યથાક્રમમ્ ।
મુખં નાસા ચ કર્ણૌ માસૈઃ પઞ્ચભિરેવ ચ ॥ ૫.૨૨.૨૦॥

દન્તપઙ્ક્તિસ્તથા ગુહ્યં જાયન્તે ચ નખાઃ પુનઃ ।
કર્ણયોસ્તુ ભવેચ્છિદ્રં ષણ્માસાભ્યન્તરેણ તુ ॥ ૨૧॥

પાયુર્મેહમુપસ્થં ચ નાભિશ્ચાભ્યુપજાયતે ।
સન્ધયો યે ચ ગાત્રેષુ માસૈર્જાયન્તિ સપ્તભિઃ ॥ ૨૨॥

અઙ્ગપ્રત્યઙ્ગસમ્પૂર્ણઃ પરિપક્વઃ સ તિષ્ઠતિ ।
ઉદરે માતુરાચ્છન્નો જરાયૌ મુનિસત્તમ ॥ ૨૩॥

માતુરાહારચૌર્યેણ ષડ્વિધેન રસેન તુ ।
નાભિનાલનિબદ્ધેન વર્દ્ધતે સ દિને દિને ॥ ૨૪॥

તતઃ સ્મૃતિં લભેજ્જીવઃ સમ્પૂર્ણેઽસ્મિન્ શરીરકે ।
સુખં દુઃખં વિજાનાતિ નિદ્રાસ્વપ્નં પુરાકૃતમ્ ॥ ૨૫॥

મૃતશ્ચાહં પુનર્જાતો જાતશ્ચાહં પુનર્મૃતઃ ।
નાનાયોનિસહસ્રાણિ મયા દૃષ્ટાનિ જાયતા ॥ ૨૬॥

અધુના જાતમાત્રોઽહં પ્રાપ્તસંસ્કાર એવ ચ ।
શ્રેયોઽમુના કરિષ્યામિ યેન ગર્ભે ન સમ્ભવઃ ॥ ૨૭॥

ગર્ભસ્થશ્ચિન્તયન્નેવમહં ગર્ભાદ્વિનિઃસૃતઃ ।
અન્વેષ્યામિ શિવજ્ઞાનં સંસારવિનિવર્તકમ્ ॥ ૨૮॥

એવં સ ગર્ભદુઃખેન મહતા પરિપીડિતઃ ।

જીવઃ કર્મવશાદાસ્તે મોક્ષોપાયં વિચિન્તયન્ ॥ ૨૯॥

યથા ગિરિવરાક્રાન્તઃ કશ્ચિદ્દુઃખેન તિષ્ઠતિ ।
તથા જરાયુણા દેહી દુઃખં તિષ્ઠતિ વેષ્ટિતઃ ॥ ૩૦॥

પતિતઃ સાગરે યદ્વદ્દુઃખમાસ્તે સમાકુલઃ ।
ગર્ભોદકેન સિક્તાઙ્ગઃ સર્વદાકુલિતસ્તદા ॥ ૩૧॥

લોહકુમ્ભે યથા ન્યસ્તઃ પચ્યતે કશ્ચિદગ્નિના ।
ગર્ભકુમ્ભે તથા ક્ષિપ્તઃ પચ્યતે જઠરાગ્નિના ॥ ૩૨॥

સૂચીભિરગ્નિવર્ણાભિર્નિર્ભિન્નસ્ય નિરન્તરમ્ ।
યદ્દુઃખં જાયતે તસ્ય તત્ર સંસ્થસ્ય ચાધિકમ્ ॥ ૩૩॥

ગર્ભાવાસાત્પરં દુઃખં કષ્ટં નૈવાસ્તિ કુત્રચિત્ ।
દેહિનાં દુઃખબહુલં સુઘોરમતિસઙ્કટમ્ ॥ ૩૪॥

ઇત્યેતત્સુમહદ્દુઃખં પાપિનાં પરિકીર્તિતમ્ ।
કેવલં ધર્મબુધ્દીનાં સપ્તમાસૈર્ભવઃ સદા ॥ ૩૫॥

ગર્ભાત્સુદુર્લભં દુઃખં યોનિયન્ત્રનિપીડનાત્ ।
ભવેત્પાપાત્મનાં વ્યાસ ન હિ ધર્મયુતાત્મનામ્ ॥ ૩૬॥

ઇક્ષુવત્પીડ્યમાનસ્ય યન્ત્રેણૈવ સમન્તતઃ ।
શિરસા તાડ્યમાનસ્ય પાપમુદ્ગરકેણ ચ ॥ ૩૭॥

યન્ત્રેણ પીડિતા યદ્વન્નિઃસારાઃ સ્સ્યુસ્તિલાઃ ક્ષણાત્ ।
તથા શરીરં નિસ્સારં યોનિયન્ત્રનિપીડનાત્ ॥ ૩૮॥

અસ્થિપાદતુલાસ્તમ્ભં સ્નાયુબન્ધેન યન્ત્રિતમ્ ।
રક્તમાંસમૃદાલિપ્તં વિણ્મૂત્રદ્રવ્યભાજનમ્ ॥ ૩૯॥

કેશરોમનખચ્છન્નં રોગાયતનમાતુરમ્ ।
વદનૈકમહાદ્વારં ગવાક્ષાષ્ટકભૂષિતમ્ ॥ ૪૦॥

ઓષ્ઠદ્વયકપાટં ચ તથા જિહ્વાર્ગલાન્વિતમ્ ।
ભોગતૃષ્ણાતુરં મૂઢં રાગદ્વેષવશાનુગમ્ ॥ ૪૧॥

સંવર્તિતાઙ્ગપ્રત્યઙ્ગં જરાયુપરિવેષ્ટિતમ્ ।
સઙ્કટેનાવિવિક્તેન યોનિમાર્ગેણ નિર્ગતમ્ ॥ ૪૨॥

વિણ્મૂત્રરક્તસિક્તાઙ્ગં વિકોશિકસમુદ્ભવમ્ ।
અસ્થિપઞ્જરવિખ્યાતમસ્મિન્ જ્ઞેયં કલેવરમ્ ॥ ૪૩॥

શતત્રયં ષષ્ટ્યધિકં પઞ્ચ પેશીશતાનિ ચ ।
સાર્ધાભિસ્તિસૃભિશ્છન્નં સમન્તાદ્રોમકોટિભિઃ ॥ ૪૪॥

શરીરં સ્થૂલસૂક્ષ્માભિર્દૃશ્યાદૃશ્યા હિ તાઃ સ્મૃતાઃ ।
એતાવતીભિર્નાડીભિઃ કોટિભિસ્તત્સમન્તતઃ ॥ ૪૫॥

અસ્વેદમધુભિર્યાભિરન્તસ્થઃ સ્રવતે બહિઃ ।
દ્વાત્રિંશદ્દશનાઃ પ્રોક્તા વિંશતિશ્ચ નખાઃ સ્મૃતાઃ ॥ ૪૬॥

પિત્તસ્ય કુડવં જ્ઞેયં કફસ્યાથાઢકં સ્મૃતમ્ ।
વસાયાશ્ચ પલં વિંશત્તદર્ધં કપિલસ્ય ચ ॥ ૪૭॥

પઞ્ચાર્દ્ધં તુ તુલા જ્ઞેયા પલાનિ દશ મેદસઃ ।
પલત્રયં મહારક્તં મજ્જાયાશ્ચ ચતુર્ગુણમ્ ॥ ૪૮॥

શુક્રોઽર્દ્ધં કુડવં જ્ઞેયં તદ્બીજં દેહિનાં બલમ્ ।
માંસસ્ય ચૈકપિણ્ડેન પલસાહસ્રમુચ્યતે ॥ ૪૯॥

રક્તં પલશતં જ્ઞેયં વિણ્મૂત્રં યત્પ્રમાણતઃ ।
અઞ્જલયશ્ચ ચત્વારશ્ચત્વારો મુનિસત્તમ ॥ ૫૦॥

ઇતિ દેહગૃહં હ્યેતન્નિત્યસ્યાનિત્યમાત્મનઃ ।
અવિશુદ્ધં વિશુદ્ધસ્ય કર્મબન્ધાદ્વિનિર્મિતમ્ ॥ ૫૧॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં દેહોત્પત્તિવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૫.૨૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૨૩. ત્રયોવિંશોઽધ્યાયઃ । દેહાશુચિત્વબાલ્યાદ્યવસ્થાદુઃખવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
શ ृણુ વ્યાસ મહાબુદ્ધે દેહસ્યાશુચિતાં મુને ।
મહત્ત્વં ચ સ્વભાવસ્ય સમાસાત્કથયામ્યહમ્ ॥ ૧॥

શુક્રશોણિતસંયોગાદ્દેહઃ સઞ્જાયતે યતઃ ।

નિત્યં વિણ્મૂત્રસમ્પૂર્ણસ્તેનાયમશુચિઃ સ્મૃતઃ ॥ ૨॥

યથાન્તર્વિષ્ઠયા પૂર્ણઃ શુચિમાન્ન બહિર્ઘટઃ ।
શોધ્યમાનો હિ દેહોઽયં તેનાયમશુચિસ્તતઃ ॥ ૩॥

સમ્પ્રાપ્યાતિ પવિત્રાણિ પઞ્ચગવ્યં હવીંષિ ચ ।
અશુચિત્વં ક્ષણાદ્યાન્તિ કિમન્યદશુચિસ્તતઃ ॥ ૪॥

હૃદ્યાન્યપ્યન્નપાનાનિ યં પ્રાપ્ય સુરભીણિ ચ ।
અશુચિત્વં પ્રયાન્ત્યાશુ કિમન્યદશુચિસ્તતઃ ॥ ૫॥

હે જનાઃ કિન્ન પશ્યન્તિ યન્નિર્યાતિ દિને દિને ।
સ્વદેહાત્કશ્મલં પૂતિસ્તદાધારઃ કથં શુચિઃ ॥ ૬॥

દેહઃ સશોધ્યમાનોઽપિ પઞ્ચગવ્યકુશામ્બુભિઃ ।
ઘૃષ્યમાણ ઇવાઙ્ગારો નિર્મલત્વં ન ગચ્છતિ ॥ ૭॥

સ્રોતાંસિ યસ્ય સતતં પ્રભવન્તિ ગિરેરિવ ।
કફમૂત્રપુરીષાદ્યૈઃ સ દેહઃ શુધ્યતે કથમ્ ॥ ૮॥

સર્વાશુચિનિધાનસ્ય શરીરસ્ય ન વિદ્યતે ।
શુચિરેકઃ પ્રદેશોઽપિ વિણ્મૂત્રસ્ય દૃતેરિવ ॥ ૯॥

સૃષ્ટ્વાત્મદેહસ્રોતાંસિ મૃત્તોયૈઃ શોધ્યતે કરઃ ।
તથાપ્યશુચિભાણ્ડસ્ય ન વિભ્રશ્યતિ કિં કરઃ ॥ ૧૦॥

કાયઃ સુગન્ધધૂપાદ્યૈર્યત્નેનાપિ સુસંસ્કૃતઃ ।
ન જહાતિ સ્વભાવં સ શ્વપુચ્છમિવ નામિતમ્ ॥ ૧૧॥

યથા જાત્યૈવ કૃષ્ણોર્થઃ શુક્લઃ સ્સ્યાન્નહ્યુપાયતઃ ।
સંશોદ્ધ્યમાનાપિ તથા ભવેન્મૂર્તિર્ન નિર્મલા ॥ ૧૨॥

જિઘ્રન્નપિ સ્વદુર્ગન્ધં પશ્યન્નપિ સ્વકં મલમ્ ।
ન વિરજ્યેત લોકોઽયં પીડયન્નપિ નાસિકામ્ ॥ ૧૩॥

અહો મોહસ્ય માહાત્મ્યં યેનેદં છાદિતં જગત્ ।
શીઘ્રં પશ્યન્ સ્વકં દોષં કાયસ્ય ન વિરજ્યતે ॥ ૧૪॥

સ્વદેહસ્ય વિગન્ધેન ન વિરજ્યેત યો નરઃ ।
વિરાગકારણં તસ્ય કિમેતદુપદિશ્યતે ॥ ૧૫॥

સર્વસ્યૈવ જગન્મધ્યે દેહ એવાશુચિર્ભવેત્ ।
તન્મલાવયવસ્પર્શાચ્છુચિરપ્યશુચિર્ભવેત્ ॥ ૧૬॥

ગન્ધલેપાપનોદાર્થં શૌચં દેહસ્ય કીર્તિતમ્ ।
દ્વયસ્યાપગમાચ્છુદ્ધિઃ શુદ્ધસ્પર્શાદ્વિશુધ્યતિ ॥ ૧૭॥

ગઙ્ગાતોયેન સર્વેણ મૃદ્ભારૈઃ પર્વતોપમૈઃ ।
આમૃત્યોરાચરેચ્છૌચં ભાવદુષ્ટો ન શુધ્યતિ ॥ ૧૮॥

તીર્થસ્નાનૈસ્તપોભિર્વા દુષ્ટાત્મા નૈવ શુધ્યતિ ।
શ્વદૃતિઃ ક્ષાલિતા તીર્થે કિં શુદ્ધિમધિગચ્છતિ ॥ ૧૯॥

અન્તર્ભાવપ્રદુષ્ટસ્ય વિશતોઽપિ હુતાશનમ્ ।
ન સ્વર્ગો નાપવર્ગશ્ચ દેહનિર્દહનં પરમ્ ॥ ૨૦॥

સર્વેણ ગાઙ્ગેન જલેન સમ્યઙ્
મૃત્પર્વતેનાપ્યથ ભાવદુષ્ટઃ ।
આજન્મનઃ સ્નાનપરો મનુષ્યો
ન શુધ્યતીત્યેવ વયં વદામઃ ॥ ૨૧॥

પ્રજ્વાલ્ય વહ્નિં ઘૃતતૈલસિક્તં
પ્રદક્ષિણાવર્તશિખં મહાન્તમ્ ।
પ્રવિશ્ય દગ્ધસ્ત્વપિ ભાવદુષ્ટો
ન ધર્મમાપ્નોતિ ફલં ન ચાન્યત્ ॥ ૨૨॥

ગઙ્ગાદિતીર્થેષુ વસન્તિ મત્સ્યા
દેવાલયે પક્ષિગણાશ્ચ નિત્યમ્ ।
ભાવોજ્ઝિતાસ્તે ન ફલં લભન્તે
તીર્થાવગાહાચ્ચ તથૈવ દાનાત્ ॥ ૨૩॥

ભાવશુદ્ધિઃ પરં શૌચં પ્રમાણે સર્વકર્મસુ ।
અન્યથાલિઙ્ગ્યતે કાન્તા ભાવેન દુહિતાન્યથા ॥ ૨૪॥

મનસો ભિદ્યતે વૃત્તિરભિન્નેષ્વપિ વસ્તુષુ ।
અન્યથૈવ સુતં નારી ચિન્તયત્યન્યથા પતિમ્ ॥ ૨૫॥

પશ્યધ્વમસ્ય ભાવસ્ય મહાભાગ્યમશેષતઃ ।
પરિષ્વક્તોઽપિ યન્નાર્યા ભાવહીનં ન કામયેત્ ॥ ૨૬॥

નાદ્યાદ્વિવિધમન્નાદ્યં ભક્ષ્યાણિ સુરભીણિ ચ ।
યદિ ચિન્તાં સમાધત્તે ચિત્તે કામાદિષુ ત્રિષુ ॥ ૨૭॥

ગૃહ્યતે તેન ભાવેન નરો ભાવાદ્વિમુચ્યતે ।
ભાવતઃ શુચિ શુદ્ધાત્મા સ્વર્ગં મોક્ષં ચ વિન્દતિ ॥ ૨૮॥

ભાવેનૈકાત્મશુદ્ધાત્મા દહન્ જુહ્વન્ સ્તુવન્ મૃતઃ ।
જ્ઞાનાવાપ્તેરવાપ્યાશુ લોકાન્ સુબહુયાજિનામ્ ॥ ૨૯॥

જ્ઞાનામલામ્ભસા પુંસાં સદ્વૈરાગ્યમૃદા પુનઃ ।
અવિદ્યારાગવિણ્મૂત્રલેપગન્ધવિશોધનમ્ ॥ ૩૦॥

એવમેતચ્છરીરં હિ નિસર્ગાદશુચિ સ્મૃતમ્ ।
ત્વઙ્માત્રસારં નિઃસારં કદલીસારસન્નિભમ્ ॥ ૩૧॥

જ્ઞાત્વૈવં દોષવદ્દેહં યઃ પ્રાજ્ઞઃ શિથિલો ભવેત્ ।
દેહભોગોદ્ભવાદ્ભાવાચ્છમચિત્તઃ પ્રસન્નધીઃ ॥ ૩૨॥

સોઽતિક્રામતિ સંસારં જીવન્મુક્તઃ પ્રજાયતે ।
સંસારકુદલીસારદૃઢગ્રાહ્યવતિષ્ઠતે ॥ ૩૩॥

એવમેતન્મહાકષ્ટં જન્મદુઃખં પ્રકીર્તિતમ્ ।
પુંસામજ્ઞાનદોષેણ નાનાકર્મવશેન ચ ॥ ૩૪॥

શ્લોકાર્ધેન તુ વક્ષ્યામિ યદુક્તં ગ્રન્થકોટિભિઃ ।
મમેતિ પરમં દુઃખં ન મમેતિ પરં સુખમ્ ॥ ૩૫॥

બહવોઽપીહ રાજાનઃ પરં લોકમિતો ગતાઃ ।
નિર્મમત્વસમેતાસ્તુ બદ્ધાઃ શતસહસ્રશઃ ॥ ૩૬॥

ગર્ભસ્થસ્ય સ્મૃતિર્યાસીત્સા ચ તસ્ય પ્રણશ્યતિ ।
સમ્મૂર્છિતેન દુઃખેન યોનિયન્ત્રનિપીડનાત્ ॥ ૩૭॥

બાહ્યેન વાયુના વાસ્ય મોહસઙ્ગેન દેહિનઃ ।
સ્પૃષ્ટમાત્રેણ ઘોરેણ જ્વરઃ સમુપજાયતે ॥ ૩૮॥

તેન જ્વરેણ મહતા સમ્મોહશ્ચ પ્રજાયતે ।
સમ્મૂઢસ્ય સ્મૃતિભ્રંશઃ શીઘ્રં સઞ્જાયતે પુનઃ ॥ ૩૯॥

સ્મૃતિભ્રંશાત્તતસ્તસ્ય સ્મૃતિર્ન્નો પૂર્વકર્મણઃ ।
રતિઃ સઞ્જાયતે તૂર્ણં જન્તોસ્તત્રૈવ જન્મનિ ॥ ૪૦॥

રક્તો મૂઢશ્ચ લોકોઽયં ન કાર્યે સમ્પ્રવર્તતે ।
ન ચાત્માનં વિજાનાતિ ન પરં ન ચ દૈવતમ્ ॥ ૪૧॥

ન શ ૃણોતિ પરં શ્રેયઃ સતિ કર્ણેઽપિ સન્મુને ।
ન પશ્યતિ પરં શ્રેયઃ સતિ ચક્ષુષિ તત્ક્ષમે ॥ ૪૨॥

સમે પથિ શનૈર્ગચ્છન્ સ્ખલતીવ પદે પદે ।
સત્યાં બુદ્ધૌ ન જાનાતિ બોધ્યમાનો બુધૈરપિ ॥ ૪૩॥

સંસારે ક્લિશ્યતે તેન ગર્ભલોભવશાનુગઃ ।
ગર્ભસ્મૃતેન પાપેન સમુજ્ઝિતમતિઃ પુમાન્ ॥ ૪૪॥

ઇત્થં મહત્પરં દિવ્યં શાસ્ત્રમુક્તં શિવેન તુ ।
તપસઃ કથનાર્થાય સ્વર્ગમોક્ષપ્રસાધનમ્ ॥ ૪૫॥

યે સત્યસ્મિન્ શિવે જ્ઞાને સર્વકામાર્થસાધને ।
ન કુર્વન્ત્યાત્મનઃ શ્રેયસ્તદેવ મહદદ્ભુતમ્ ॥ ૪૬॥

અવ્યક્તેન્દ્રિયવૃત્તિત્વાદ્ બાલ્યે દુઃખં મહત્પુનઃ ।
ઇચ્છન્નપિ ન શક્નોતિ વક્તું કર્તું પ્રતિક્રિયામ્ ॥ ૪૭॥

દન્તોત્થાને મહદ્દુઃખમલ્પેન વ્યાધિના તથા ।
બાલરોગૈશ્ચ વિવિધૈઃ પીડા બાલગ્રહૈરપિ ॥ ૪૮॥

ક્વચિત્ક્ષુત્તૃટ્પરીતાઙ્ગઃ ક્વચિત્તિષ્ઠતિ સંરટન્ ।
વિણ્મૂત્રભક્ષણાદ્યં ચ મોહાદ્ બાલઃ સમાચરેત્ ॥ ૪૯॥

કૌમારે કર્ણપીડાયાં માતાપિત્રોશ્ચ સાધનૈઃ ।
અક્ષરાધ્યયનાદ્યૈશ્ચ નાનાદુઃખં પ્રવર્તતે ॥ ૫૦॥

બાલ્યે દુઃખમતીત્યૈવ પશ્યન્નપિ વિમૂઢધીઃ ।
ન કુર્વીતાત્મનઃ શ્રેયસ્તદત્ર મહદદ્ભુતમ્ ॥ ૫૧॥

પ્રવૃત્તેન્દ્રિયવૃત્તિત્વાત્કામરોગપ્રપીડનાત્ ।
તદપ્રાપ્તે તુ સતતં કુતઃ સૌખ્યં તુ યૌવને ॥ ૫૨॥

ઈર્ષ્યયા ચ મહદ્દુઃખં મોહાદ્રક્તસ્ય તસ્ય ચ ।
નેત્રસ્ય કુપિતસ્યેવ ત્યાગી દુઃખાય કેવલમ્ ॥ ૫૩॥

ન રાત્રૌ વિન્દતે નિદ્રાં કામાગ્નિપરિવેદિતઃ ।

દિવાપિ ચ કુતઃ સૌખ્યમર્થોપાર્જનચિન્તયા ॥ ૫૪॥

સ્ત્રીષ્વધ્યાસિતચિત્તસ્ય યે પુંસઃ શુક્રબિન્દવઃ ।
તે સુખાય ન મન્યન્તે સ્વેદજા ઇવ તે તથા ॥ ૫૫॥

કૃમિભિસ્તુદ્યમાનસ્ય કુષ્ઠિનો વાનરસ્ય ચ ।
કણ્ડૂયનાભિતાપેન યદ્ભવેત્ સ્ત્રીષુ તદ્વિદઃ ॥ ૫૬॥

યાદૃશં મન્યતે સૌખ્યં ગણ્ડે પૂતિવિનિર્ગમાત્ ।
તાદૃશં સ્ત્રીષુ મન્તવ્યં નાધિકં તાસુ વિદ્યતે ॥ ૫૭॥

વિણ્મૂત્રસ્ય સમુત્સર્ગાત્સુખં ભવતિ યાદૃશમ્ ।
તાદૃશં સ્ત્રીષુ વિજ્ઞેયં મૂઢૈઃ કલ્પિતમન્યથા ॥ ૫૮॥

નારીષ્વવસ્તુભૂતાસુ સર્વદોષાશ્રયાસુ ચ ।
નાણુમાત્રં સુખં તાસુ કથિતં પઞ્ચચૂડયા ॥ ૫૯॥

સમ્માનનાવમાનાભ્યાં વિયોગેનેષ્ટસઙ્ગમાત્ ।
યૌવનં જરયા ગ્રસ્તં ક્વ સૌખ્યમનુપદ્રવમ્ ॥ ૬૦॥

વલીપલિતખાલિત્યૈઃ શિથિલિકૃતવિગ્રહમ્ ।
સર્વક્રિયાસ્વશક્તિં ચ જરયા જર્જરીકૃતમ્ ॥ ૬૧॥

સ્ત્રીપુંસયૌવનં હૃદ્યમન્યોઽન્યસ્ય પ્રિયં પુરા ।
તદેવ જરયા ગ્રસ્તમનયોરપિ ન પ્રિયમ્ ॥ ૬૨॥

અપૂર્વવત્સ્વમાત્માનં જરયા પરિવર્તિતમ્ ।
યઃ પશ્યન્નપિ રજ્યેત કોઽન્યસ્તસ્માદચેતનઃ ॥ ૬૩॥

જરાભિભૂતઃ પુરુષઃ પુત્રીપુત્રાદિબાન્ધવૈઃ ।
અસક્તત્વાદ્દુરાધર્ષૈર્ભૃત્યૈશ્ચ પરિભૂયતે ॥ ૬૪॥

ધર્મમર્થં ચ કામં વા મોક્ષં વાતિજરાતુરઃ ।
અશક્તઃ સાધિતું તસ્માદ્યુવા ધર્મં સમાચરેત્ ॥ ૬૫॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં સંસારચિકિત્સાયાં દેહાશુચિત્વબાલ્યાદ્યવસ્થાદુઃખવર્ણનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૫.૨૩॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

# ૫.૨૪. ચતુર્વિંશોઽધ્યાયઃ । સ્ત્રીસ્વભાવવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
કુત્સિતં યોષિદર્થં યત્સમ્પ્રોક્તં પઞ્ચચૂડયા ।
તન્મે બ્રૂહિ સમાસેન યદિ તુષ્ટોઽસિ મે મુને ॥ ૧॥

સનત્કુમાર ઉવાચ ।
સ્ત્રીણાં સ્વભાવં વક્ષ્યામિ શ‍ૃણુ વિપ્ર યથાતથમ્ ।
યસ્ય શ્રવણમાત્રેણ ભવેદ્વૈરાગ્યમુત્તમમ્ ॥ ૨॥

સ્ત્રિયો મૂલં હિ દોષાણાં લઘુચિત્તાઃ સદા મુને ।
તદાસક્તિર્ન કર્તવ્યા મોક્ષેપ્સુભિરતન્દ્રિતૈઃ ॥ ૩॥

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
નારદસ્ય ચ સંવાદં પુંશ્ચલ્યા પઞ્ચચૂડયા ॥ ૪॥

લોકાન્ પરિચરન્ ધીમાન્ દેવર્ષિર્નારદઃ પુરા ।
દદર્શાપ્સરસં બાલાં પઞ્ચચૂડામનુત્તમામ્ ॥ ૫॥

પપ્રચ્છાપ્સરસં સુભ્રૂં નારદો મુનિસત્તમઃ ।
સંશયો હૃદિ મે કશ્ચિત્તન્મે બ્રૂહિ સુમધ્યમે ॥ ૬॥

એવમુક્તા તુ સા વિપ્રં પ્રત્યુવાચ વરાપ્સરા ।
વિષયે સતિ વક્ષ્યામિ સમર્થાં મન્યસેઽથ મામ્ ॥ ૭॥

નારદ ઉવાચ ।
ન ત્વામવિષયે ભદ્રે નિયોક્ષ્યામિ કથઞ્ચન ।
સ્ત્રીણાં સ્વભાવમિચ્છામિ ત્વત્તઃ શ્રોતું સુમધ્યમે ॥ ૮॥

સનત્કુમાર ઉવાચ ।
એતચ્છ્રુત્વા વચસ્તસ્ય દેવર્ષેરપ્સરોત્તમા ।
પ્રત્યુવાચ મુનીશં તં દેવર્ષિં મુનિસત્તમમ્ ॥ ૯॥

પઞ્ચચૂડોવાચ ।
મુને શ‍ૃણુ ન શક્યા સ્ત્રી સતી વૈ નિન્દિતું સ્ત્રિયા ।
વિદિતાસ્તે સ્ત્રિયો યાશ્ચ યાદૃશ્યશ્ચ સ્વભાવતઃ ॥ ૧૦॥

ન મામર્હસિ દેવર્ષે નિયોક્તું પ્રશ્નમીદૃશમ્ ।

ઇત્યુક્ત્વા સાભવત્તૂષ્ણીં પઞ્ચચૂડાપ્સરોવરા ॥ ૧૧॥

અથ દેવર્ષિવર્યો હિ શ્રુત્વા તદ્વાક્યમુત્તમમ્ ।
પ્રત્યુવાચ પુનસ્તાં વૈ લોકાનાં હિતકામ્યયા ॥ ૧૨॥

નારદ ઉવાચ ।
મૃષાવાદે ભવેદ્દોષઃ સત્યે દોષો ન વિદ્યતે ।
ઇતિ જાનીહિ સત્યં ત્વં વદાતસ્તત્સુમધ્યમે ॥ ૧૩॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્તા સા કૃતમતી રભસા ચારુહાસિની ।
સ્ત્રીદોષાન્ શાશ્વતાન્સત્યાન્ ભાષિતું સમ્પ્રચક્રમે ॥ ૧૪॥

પઞ્ચચૂડોવાચ ।
કુલીના નાથવન્ત્યશ્ચ રૂપવન્ત્યશ્ચ યોષિતઃ ।
મર્યાદાષુ ન તિષ્ઠન્તિ સ દોષઃ સ્ત્રીષુ નારદ ॥ ૧૫॥

ન સ્ત્રીભ્યઃ કિઞ્ચિદન્યદ્વૈ પાપીયસ્તરમસ્તિ હિ ।
સ્ત્રિયો મૂલં હિ પાપાનાં તથા ત્વમપિ વેત્થ હ ॥ ૧૬॥

સમાજ્ઞાતાનર્થવતઃ પ્રતિરૂપાન્ યથેપ્સિતાન્ ।
પતીનન્તરમાસાદ્ય નાલં નાર્યઃ પ્રતીક્ષિતુમ્ ॥ ૧૭॥

અસદ્ધર્મસ્ત્વયં સ્ત્રીણામસ્માકં ભવતિ પ્રભો ।
પાપીયસો નરાન્ યદ્વૈ લજ્જાં ત્યક્ત્વા ભજામહે ॥ ૧૮॥

સ્ત્રિયં ચ યઃ પ્રાર્થયતે સન્નિકર્ષં ચ ગચ્છતિ ।
ઈષચ્ચ કુરુતે સેવાં તમેવેચ્છન્તિ યોષિતઃ ॥ ૧૯॥

અનર્થિત્વાન્મનુષ્યાણાં ભયાત્પતિજનસ્ય ચ ।
મર્યાદાયામમર્યાદાઃ સ્ત્રિયસ્તિષ્ઠન્તિ ભર્તૃષુ ॥ ૨૦॥

નાસાં કશ્ચિદમાન્યોઽસ્તિ નાસાં વયસિ નિશ્ચયઃ ।
સુરૂપં વા કુરૂપં વા પુમાંસમુપભુઞ્જતે ॥ ૨૧॥

ન ભયાદથ વાક્રોશાન્નાર્થહેતોઃ કથઞ્ચન ।
ન જ્ઞાતિકુલસમ્બન્ધાત્ સ્ત્રિયસ્તિષ્ઠન્તિ ભર્તૃષુ ॥ ૨૨॥

યૌવને વર્તમાનાનામિષ્ટાભરણવાસસામ્ ।
નારીણાં સ્વૈરવૃત્તીનાં સ્પૃહયન્તિ કુલસ્ત્રિયઃ ॥ ૨૩॥

યા હિ શશ્વદ્ બહુમતા રક્ષ્યન્તે દયિતાઃ સ્ત્રિયઃ ।
અપિ તાઃ સમ્પ્રસજ્જન્તે કુબ્જાન્ધજડવામને ॥ ૨૪॥

પઙ્ગુષ્વપિ ચ દેવર્ષે યે ચાન્યે કુત્સિતા નરાઃ ।
સ્ત્રીણામગમ્યો લોકેષુ નાસ્તિ કશ્ચિન્મહામુને ॥ ૨૫॥

યદિ પુંસાં ગતિર્બ્રહ્મન્ કથઞ્ચિન્નોપપદ્યતે ।
અપ્યન્યોઽન્યં પ્રવર્તન્તે ન ચ તિષ્ઠન્તિ ભર્તૃષુ ॥ ૨૬॥

અલાભાત્પુરુષાણાં ચ ભયાત્પરિજનસ્ય ચ ।
વધબન્ધભયાચ્ચૈવ તા ભગ્નાશા હિ યોષિતઃ ॥ ૨૭॥

ચલસ્વભાવ દુશ્ચેષ્ટા દુર્ગાહ્યા ભાવતસ્તથા ।
પ્રાજ્ઞસ્ય પુરુષસ્યેહ યથા રતિપરિગ્રહાત્ ॥ ૨૮॥

નાગ્નિસ્તુષ્યતિ કાષ્ઠાનાં નાપગાનાં મહોદધિ ।
નાન્તકઃ સર્વભૂતાનાં ન પુંસાં વામલોચનાઃ ॥ ૨૯॥

ઇદમન્યચ્ચ દેવર્ષે રહસ્યં સર્વયોષિતામ્ ।
દૃષ્ટ્વૈવ પુરુષં સદ્યો યોનિઃ પ્રક્લિદ્યતે સ્ત્રિયાઃ ॥ ૩૦॥

સુસ્નાતં પુરુષં દૃષ્ટ્વા સુગન્ધં મલવર્જિતમ્ ।
યોનિઃ પ્રક્લિદ્યતે સ્ત્રીણાં દૃતેઃ પાત્રાદિવોદકમ્ ॥ ૩૧॥

કાયાનામપિ દાતારં કર્ત્તારં માનસાન્ત્વયોઃ ।
રક્ષિતારં ન મૃષ્યન્તિ ભર્તારં પરમં સ્ત્રિયઃ ॥ ૩૨॥

ન કામભોગાત્પરમાન્નાલઙ્કારાર્થસઞ્ચયાત્ ।
તથા હિતં ન મન્યન્તે યથા રતિપરિગ્રહાત્ ॥ ૩૩॥

અન્તકઃ શમનો મૃત્યુઃ પાતાલં વડવામુખમ્ ।
ક્ષુરધારા વિષં સર્પો વહ્નિરિત્યેકતઃ સ્ત્રિયઃ ॥ ૩૪॥

યતશ્ચ ભૂતાનિ મહાન્તિ પઞ્ચ
યતશ્ચ લોકો વિહિતો વિધાત્રા ।
યતઃ પુમાંસઃ પ્રમદાશ્ચ નિર્મિતાઃ
સદૈવ દોષઃ પ્રમદાસુ નારદ ॥ ૩૫॥

સનત્કુમાર ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્યા નારદસ્તુષ્ટમાનસઃ ।

તથ્યં મત્વા તતસ્તદ્વૈ વિરક્તોઽભૂદ્ધિ તાસુ ચ ॥ ૩૬॥

ઇત્યુક્તઃ સ્ત્રીસ્વભાવસ્તે પઞ્ચચૂડોક્ત આદરાત્ ।
વૈરાગ્યકારણં વ્યાસ કિમન્યચ્છ્રોતુમર્હસિ ॥ ૩૭॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં સ્ત્રીસ્વભાવવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૫.૨૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૨૫. પઞ્ચવિંશોઽધ્યાયઃ । કાલજ્ઞાનવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ ત્વત્સકાશાન્મયા મુને ।
સ્ત્રીસ્વભાવઃ શ્રુતઃ પ્રીત્યા કાલજ્ઞાનં વદસ્વ મે ॥ ૧॥

સનત્કુમાર ઉવાચ ।
ઇદમેવ પુરાપૃચ્છત્ પાર્વતી પરમેશ્વરમ્ ।
શ્રુત્વા નાનાકથાં દિવ્યાં પ્રસન્ના સુપ્રણમ્ય તમ્ ॥ ૨॥

પાર્વત્યુવાચ ।
ભગવંસ્ત્વત્પ્રસાદેન જ્ઞાતં મે સકલં મતમ્ ।
યથાર્ચનં તુ તે દેવ યૈર્મન્ત્રૈશ્ચ યથાવિધિ ॥ ૩॥

અદ્યાપિ સંશયસ્ત્વેકઃ કાલચક્રં પ્રતિ પ્રભો ।
મૃત્યુચિહ્નં યથા દેવ કિં પ્રમાણં યથાયુષઃ ॥ ૪॥

સર્વં કથય મે નાથ યદ્યહં તવ વલ્લભા ।
ઇતિ પૃષ્ટસ્તયા દેવ્યા પ્રત્યુવાચ મહેશ્વરઃ ॥ ૫॥

ઈશ્વર ઉવાચ ।
સત્યં તે કથયિષ્યામિ શાસ્ત્રં સર્વોત્તમં પ્રિયે ।
યેન શાસ્ત્રેણ દેવેશિ નરૈઃ કાલઃ પ્રબુધ્યતે ॥ ૬॥

અહઃ પક્ષં તથા માસમૃતું ચાયનવત્સરૌ ।
સ્થૂલસૂક્ષ્મગતૈશ્ચિહ્નૈર્બહિરન્તર્ગતૈસ્તથા ॥ ૭॥

તત્તેઽહં સમ્પ્રવક્ષ્યામિ શ઼ૃણુ તત્ત્વેન સુન્દરિ ।

લોકાનામુપકારાર્થં વૈરાગ્યાર્થમુમેઽધુના ॥ ૮॥

અકસ્માત્પાણ્ડુરં દેહમૂર્ધ્વરાગં સમન્તતઃ ।
તદા મૃત્યું વિજાનીયાત્ષણ્માસાભ્યન્તરે પ્રિયે ॥ ૯॥

મુખં કર્ણૌ તથા ચક્ષુર્જિહ્વાસ્તમ્ભો યદા ભવેત્ ।
તદા મૃત્યું વિજાનીયાત્ષણ્માસાભ્યન્તરે પ્રિયે ॥ ૧૦॥

રૌરવાનુગતં ભદ્રે ધ્વનિં નાકર્ણયેદ્ દ્રુતમ્ ।
ષણ્માસાભ્યન્તરે મૃત્યુર્જ્ઞાતવ્યઃ કાલવેદિભિઃ ॥ ૧૧॥

રવિસોમાગ્નિસંયોગાદ્યદોદ્યોતં ન પશ્યતિ ।
કૃષ્ણં સર્વં સમસ્તં ચ ષણ્માસં જીવિતં તથા ॥ ૧૨॥

વામહસ્તો યદા દેવિ સપ્તાહં સ્પન્દતે પ્રિયે ।
જીવિતં તુ તદા તસ્ય માસમેકં ન સંશયઃ ॥ ૧૩॥

ઉન્મીલયન્તિ ગાત્રાણિ તાલુકં શુષ્યતે યદા ।
જીવિતં તુ તદા તસ્ય માસમેકં ન સંશયઃ ॥ ૧૪॥

નાસા તુ સ્રવતે યસ્ય ત્રિદોષે પક્ષજીવિતમ્ ।
વક્ત્રં કણ્ઠં ચ શુષ્યેત ષણ્માસાન્તે ગતાયુષઃ ॥ ૧૫॥

સ્થૂલજિહ્વા ભવેદ્યસ્ય દ્વિજાઃ ક્લિદ્યન્તિ ભામિનિ ।
ષણ્માસાજ્જાયતે મૃત્યુશ્ચિહ્નૈસ્તૈરુપલક્ષયેત્ ॥ ૧૬॥

અમ્બુતૈલઘૃતસ્થં તુ દર્પણે વરવર્ણિનિ ।
ન પશ્યતિ યદાત્માનં વિકૃતં પલમેવ ચ ॥ ૧૭॥

ષણ્માસાયુઃ સ વિજ્ઞેયઃ કાલચક્રં વિજાનતા ।
અન્યચ્ચ શૃણુ દેવેશિ યેન મૃત્યુર્વિબુદ્ધ્યતે ॥ ૧૮॥

શિરોહીનાં યદા છાયાં સ્વકીયામુપલક્ષયેત્ ।
અથવા છાયયા હીનો માસમેકં ન જીવતિ ॥ ૧૯॥

આઙ્ગિકાનિ મયોક્તાનિ મૃત્યુચિહ્નાનિ પાર્વતિ ।
બાહ્યસ્થાનિ બ્રુવે ભદ્રે ચિહ્નાનિ શૃણુ સામ્પ્રતમ્ ॥ ૨૦॥

રશ્મિહીનં યદા દેવિ ભવેત્સોમાર્કમણ્ડલમ્ ।
દૃશ્યતે પાટલાકારં માસાર્ધેન વિપદ્યતે ॥ ૨૧॥

અરુન્ધતીં મહાયાનમિન્દું લક્ષણવર્જિતમ્ ।
અદૃષ્ટતારકો યોઽસૌ માસમેકં સ જીવતિ ॥ ૨૨॥

દૃષ્ટે ગ્રહે ચ દિઙ્મોહઃ ષણ્માસાજ્જાયતે ધ્રુવમ્ ।
ઉતથ્યં ન ધ્રુવં પશ્યેદ્યદિ વા રવિમણ્ડલમ્ ॥ ૨૩॥

રાત્રૌ ધનુર્યદા પશ્યેન્મધ્યાહ્ને ચોલ્કપાતનમ્ ।
વેષ્ટ્યતે ગૃધ્રકાકૈશ્ચ ષણ્માસાયુર્ન સંશયઃ ॥ ૨૪॥

ઋષયઃ સ્વર્ગપન્થાશ્ચ દૃશ્યન્તે નૈવ ચામ્બરે ।
ષણ્માસાયુર્વિજનીયાત્પુરુષૈઃ કાલવેદિભિઃ ॥ ૨૫॥

અકસ્માદ્રાહુણા ગ્રસ્તં સૂર્યં વા સોમમેવ ચ ।
દિક્ચક્રં ભ્રાન્તવત્પશ્યેત્ષણ્માસાન્મ્રિયતે સ્ફુટમ્ ॥ ૨૬॥

નીલાભિર્મક્ષિકાભિશ્ચ હ્યકસ્માદ્ વેષ્ટ્યતે પુમાન્ ।
માસમેકં હિ તસ્યાયુર્જ્ઞાતવ્યં પરમાર્થતઃ ॥ ૨૭॥

ગૃધ્રઃ કાકઃ કપોતશ્ચ શિરશ્ચાક્રમ્ય તિષ્ઠતિ ।
શીઘ્રં તુ મ્રિયતે જન્તુર્માસૈકેન ન સંશયઃ ॥ ૨૮॥

એવં ચારિષ્ટભેદસ્તુ બાહ્યસ્થઃ સમુદાહૃતઃ ।
માનુષાણાં હિતાર્થાય સઙ્ક્ષેપેણ વદામ્યહમ્ ॥ ૨૯॥

હસ્તયોરુભયોર્દેવિ યથા કાલં વિજાનતે ।
વામદક્ષિણયોર્મધ્યે પ્રત્યક્ષં ચેત્યુદાહૃતમ્ ॥ ૩૦॥

એવં પક્ષૌ સ્થિતૌ દ્વૌ તુ સમાસાત્સુરસુન્દરિ ।
શુચિર્ભૂત્વા સ્મરન્દેવં સુસ્નાતઃ સંયતેન્દ્રિયઃ ॥ ૩૧॥

હસ્તૌ પ્રક્ષાલ્ય દુગ્ધેનાલક્તકેન વિમર્દયેત્ ।
ગન્ધૈઃ પુષ્પૈઃ કરૌ કૃત્વા મૃગયેચ્ચ શુભાશુભમ્ ॥ ૩૨॥

કનિષ્ઠામાદિતઃ કૃત્વા યાવદઙ્ગુષ્ઠકં પ્રિયે ।
પર્વત્રયક્રમેણૈવ હસ્તયોરુભયોરપિ ॥ ૩૩॥

પ્રતિપદાદિ વિન્યસ્ય તિથિં પ્રતિપદાદિતઃ ।
સમ્પુટાકારહસ્તૌ તુ પૂર્વદિઙ્મુખસંસ્થિતઃ ॥ ૩૪॥

સ્મરેન્નવાત્મકં મન્ત્રં યાવદષ્ટોત્તરં શતમ્ ।
નિરીક્ષયેત્તતો હસ્તૌ પ્રતિપર્વણિ યત્નતઃ ॥ ૩૫॥

તસ્મિન્પર્વણિ સા રેખા દૃશ્યતે ભૃઙ્ગસન્નિભા ।
તત્તિથૌ હિ મૃતિર્જ્ઞેયા કૃષ્ણે શુક્લે તથા પ્રિયે ॥ ૩૬॥

અધુના નાદજં વક્ષ્યે સઙ્ક્ષેપાત્કાલલક્ષણમ્ ।
ગમાગમં વિદિત્વા તુ કર્મ કુર્યાચ્છૃણુ પ્રિયે ॥ ૩૭॥

આત્મવિજ્ઞાનં સુશ્રોણિ ચારં જ્ઞાત્વા તુ યત્નતઃ ।
ક્ષણં ત્રુટિર્લવં ચૈવ નિમેષં કાષ્ઠકાલિકમ્ ॥ ૩૮॥

મુહૂર્તકં ત્વહોરાત્રં પક્ષમાસર્તુવત્સરમ્ ।
અબ્દં યુગં તથા કલ્પં મહાકલ્પં તથૈવ ચ ॥ ૩૯॥

એવં સ હરતે કાલઃ પરિપાટ્યા સદાશિવઃ ।
વામદક્ષિણમધ્યે તુ પથિ ત્રયમિદં સ્મૃતમ્ ॥ ૪૦॥

દિનાનિ પઞ્ચ ચારભ્ય પઞ્ચવિંશદ્દિનાવધિ ।
વામાચારગતૌ નાદઃ પ્રમાણં કથિતં તવ ॥ ૪૧॥

ભૂતરન્ધ્રં દિશશ્ચૈવ ધ્વજશ્ચ વરવર્ણિનિ ।
વામચારગતૌ નાદઃ પ્રમાણં કાલવેદિનઃ ॥ ૪૨॥

ઋતોર્વિકારભૂતાશ્ચ ગુણાસ્તત્રૈવ ભામિનિ ।
પ્રમાણં દક્ષિણં પ્રોક્તં જ્ઞાતવ્યં પ્રાણવેદિભિઃ ॥ ૪૩॥

ભૂતસઙ્ખ્યા યદા પ્રાણાન્વહન્તે ચ ઇડાદયઃ ।
વર્ષસ્યાભ્યન્તરે તસ્ય જીવિતં હિ ન સંશયઃ ॥ ૪૪॥

દશઘસ્રપ્રવાહેણ હ્યબ્દમાનં સ જીવતિ ।
પઞ્ચદશપ્રવાહેણ હ્યબ્દમેકં ગતાયુષમ્ ॥ ૪૫॥

વિંશદ્દિનપ્રવાહેણ ષણ્માસં લક્ષયેત્તદા ।
પઞ્ચવિંશદ્દિનમિતં વહતે વામનાડિકા ॥ ૪૬॥

જીવિતં તુ તદા તસ્ય ત્રિમાસં હિ ગતાયુષઃ ।
ષડ્વિંશદ્દિનમાનેન માસદ્વયમુદાહૃતમ્ ॥ ૪૭॥

સપ્તવિંશદ્દિનમિતં વહતે ત્વત્યવિશ્રમા ।
માસમેકં સમાખ્યાતં જીવિતં વામગોચરે ॥ ૪૮॥

એતત્પ્રમાણં વિજ્ઞેયં વામવાયુપ્રમાણતઃ ।

સવ્યેતરે દિનાન્યેવ ચત્વારશ્ચાનુપૂર્વશઃ ॥ ૪૯॥

ચતુસ્સ્થાને સ્થિતા દેવિ ષોડશૈતાઃ પ્રકીર્તિતાઃ ।
તેષાં પ્રમાણં વક્ષ્યામિ સામ્પ્રતં હિ યથાર્થતઃ ॥ ૫૦॥

ષડ્દિનાન્યાદિતઃ કૃત્વા સઙ્ખ્યાયાશ્ચ યથાવિધિ ।
એતદન્તર્ગતે ચૈવ વામરન્ધ્રે પ્રકાશિતમ્ ॥ ૫૧॥

ષડ્દિનાનિ યદા રૂઢં દ્વિવર્ષં ચ સ જીવતિ ।
માસાનષ્ટૌ વિજાનીયાદ્દિનાન્યષ્ટૌ ચ તાનિ તુ ॥ ૫૨॥

પ્રાણાઃ સપ્તદશે ચૈવ વિદ્ધિ વર્ષં ન સંશયઃ ।
સપ્તમાસાન્વિજાનીયાદ્દિનૈઃ ષડ્ભિર્ન સંશયઃ ॥ ૫૩॥

અષ્ટઘસ્રપ્રભેદેન દ્વિવર્ષં હિ સ જીવતિ ।
ચતુર્માસા હિ વિજ્ઞેયાશ્ચતુર્વિંશદ્દિનાવધિ ॥ ૫૪॥

યદા નવદિનં પ્રાણા વહન્ત્યેવ ત્રિમાસકમ્ ।
માસદ્વયં ચ દ્વે માસે દિના દ્વાદશ કીર્તિતાઃ ॥ ૫૫॥

પૂર્વવત્કથિતા યે તુ કાલં તેષાં તુ પૂર્વકમ્ ।
અવાન્તરદિના યે તુ તેન માસેન કથ્યતે ॥ ૫૬॥

એકાદશપ્રવાહેણ વર્ષમેકં સ જીવતિ ।
માસા નવ તથા પ્રોક્તા દિનાન્યષ્ટમિતાન્યપિ ॥ ૫૭॥

દ્વાદશેન પ્રવાહેણ વર્ષમેકં સ જીવતિ ।
માસાન્ સપ્ત વિજાનીયાત્ષડ્ઘસ્રાંશ્ચાપ્યુદાહરેત્ ॥ ૫૮॥

નાડી યદા ચ વહતિ ત્રયોદશદિનાવધિ ।
સંવત્સરં ભવેત્તસ્ય ચતુર્માસાઃ પ્રકીર્તિતાઃ ॥ ૫૯॥

ચતુર્વિંશદ્દિનં શેષં જીવિતં ચ ન સંશયઃ ।
પ્રાણવાહા યદા વામે ચતુર્દશદિનાનિ તુ ॥ ૬૦॥

સંવત્સરં ભવેત્તસ્ય માસાઃ ષટ્ ચ પ્રકીર્તિતાઃ ।
ચતુર્વિંશદ્દિનાન્યેવ જીવિતં ચ ન સંશયઃ ॥ ૬૧॥

પઞ્ચદશપ્રવાહેણ નવ માસાન્સ જીવતિ ।
ચતુર્વિંશદ્દિનાન્યેવ કથિતં કાલવેદિભિઃ ॥ ૬૨॥

ષોડશાહપ્રવાહેણ દશમાસાન્સ જીવતિ ।
ચતુર્વિંશદ્દિનાધિક્યં કથિતં કાલવેદિભિઃ ॥ ૬૩॥

સપ્તદશપ્રવાહેણ નવમાસૈર્ગતાયુષમ્ ।
અષ્ટાદશ દિનાન્યત્ર કથિતં સાધકેશ્વરિ ॥ ૬૪॥

વામચારં યદા દેવિ હ્યષ્ટાદશદિનાવધિઃ ।
જીવિતં ચાષ્ટમાસં તુ ઘસ્રા દ્વાદશ કીર્તિતાઃ ॥ ૬૫॥

ચતુર્વિંશદ્દિનાન્યત્ર નિશ્ચયેનાવધારય ।
પ્રાણવાહો યદા દેવિ ત્રયોવિંશદ્દિનાવધિઃ ॥ ૬૬॥

ચત્વારઃ કથિતા માસાઃ ષડ્દિનાનિ તથોત્તરે ।
ચતુર્વિંશપ્રવાહેણ ત્રીન્માસાંશ્ચ સ જીવતિ ॥ ૬૭॥

દિનાન્યત્ર દશાષ્ટૌ સ સંહરન્ત્યેવ ચારતઃ ।
અવાન્તરદિને યસ્તુ સઙ્ક્ષેપાત્તે પ્રકીર્તિતાઃ ॥ ૬૮॥

વામચારઃ સમાખ્યાતો દક્ષિણં શ‍ૃણુ સામ્પ્રતમ્ ।
અષ્ટાવિંશપ્રવાહેણ તિથિમાનેન જીવતિ ॥ ૬૯॥

પ્રવાહેણ દશાહેન તત્સંસ્થેન વિપદ્યતે ।
ત્રિંશદ્દસ્રપ્રવાહેન પઞ્ચાહેન વિપદ્યતે ॥ ૭૦॥

એકત્રિંશદ્યદા દેવિ વહતે ચ નિરન્તરમ્ ।
દિનત્રયં તદા તસ્ય જીવિતં હિ ન સંશયઃ ॥ ૭૧॥

દ્વાત્રિંશત્પ્રાણસઙ્ખ્યા ચ યદા હિ વહતે રવિઃ ।
તદા તુ જીવિતં તસ્ય દ્વિદિનં હિ ન સંશયઃ ॥ ૭૨॥

દક્ષિણઃ કથિતઃ પ્રાણો મધ્યસ્થં કથયામિ તે ।
એકભાગગતો વાયુપ્રવાહો મુખમણ્ડલે ॥ ૭૩॥

ધાવમાનપ્રવાહેણ દિનમેકં સ જીવતિ ।
ચક્રમેતત્પરાસોર્હિ પુરાવિદ્ભિરુદાહૃતમ્ ॥ ૭૪॥

એતત્તે કથિતં દેવિ કાલચક્રં ગતાયુષઃ ।
લોકાનાં ચ હિતાર્થાય કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૭૫॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં કાલજ્ઞાનવર્ણનં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૫.૨૫॥

પ.૨૬
॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## પ.૨૬. ષડ્વિંશોઽધ્યાયઃ । કાલવઞ્ચનવર્ણનમ્ ।

દેવ્યુવાચ ।
કથિતં તુ ત્વયા દેવ કાલજ્ઞાનં યથાર્થતઃ ।
કાલસ્ય વઞ્ચનં બ્રૂહિ યથા તત્ત્વેન યોગિનઃ ॥ ૧॥

કાલસ્તુ સન્નિકૃષ્ટો હિ વર્તતે સર્વજન્તુષુ ।
યથા ચાસ્ય ન મૃત્યુશ્ચ વઞ્ચતે કાલમાગતમ્ ॥ ૨॥

તથા કથય મે દેવ પ્રીતિં કૃત્વા મમોપરિ ।
યોગિનાં ચ હિતાય ત્વં બ્રૂહિ સર્વસુખપ્રદ ॥ ૩॥

શઙ્કર ઉવાચ ।
શ ૃણુ દેવિ પ્રવક્ષ્યામિ પૃષ્ટોઽહં યત્ત્વયા શિવે ।
સમાસેન ચ સર્વેષાં માનુષાણાં હિતાર્થતઃ ॥ ૪॥

પૃથિવ્યાપસ્તથા તેજો વાયુરાકાશમેવ ચ ।
એતેષાં હિ સમાયોગઃ શરીરં પાઞ્ચભૌતિકમ્ ॥ ૫॥

આકાશસ્તુ તતો વ્યાપી સર્વેષાં સર્વગઃ સ્થિતઃ ।
આકાશે તુ વિલીયન્તે સમ્ભવન્તિ પુનસ્તતઃ ॥ ૬॥

વિયોગે તુ સદા કસ્ય સ્વં ધામ પ્રતિપેદિરે ।
તસ્યા ન સ્થિરતા ચાસ્તિ સન્નિપાતસ્ય સુન્દરિ ॥ ૭॥

જ્ઞાનિનોઽપિ તથા તત્ર તપોમન્ત્રબલાદપિ ।
તે સર્વે સુવિજાનન્તિ સર્વમેતન્ન સંશયઃ ॥ ૮॥

દેવ્યુવાચ ।
ખં તેન યન્નશ્યતિ ઘોરરૂપઃ
કાલઃ કરાલસ્ત્રિદિવૈકનાથઃ ।
દગ્ધસ્ત્વયા ત્વં પુનરેવ તુષ્ટઃ
સ્તોત્રૈઃ સ્તુતઃ સ્વાં પ્રકૃતિં સ લેભે ॥ ૯॥

ત્વયા સ ચોક્તઃ કથયા જનાના-
મદૃષ્ટરૂપઃ પ્રચરિષ્યસીતિ ।
દૃષ્ટસ્ત્વયા તત્ર મહાપ્રભાવઃ
પ્રભોર્વરાત્તે પુનરુત્થિતશ્ચ ॥ ૫.૨૬.૧૦॥

તદદ્ય ભોઃ કાલ ઇહાસ્થિ કિઞ્ચિત્
નિહન્યતે યેન વદસ્વ તન્મે ।
ત્વં યોગિવર્યઃ પ્રભુરાત્મતન્ત્રઃ
પરોપકારાત્તતનુર્મહેશ ॥ ૧૧॥

શઙ્કર ઉવાચ ।
ન હન્યતે દેવવરૈસ્તુ દૈત્યૈઃ
સયક્ષરક્ષોરગમાનુષૈશ્ચ ।
યે યોગિનો ધ્યાનપરાઃ સદેહા
ભવન્તિ તે ઘ્નન્તિ સુખેન કાલમ્ ॥ ૧૨॥

સનત્કુમાર ઉવાચ ।
એતચ્છ્રુત્વા ત્રિભુવનગુરોઃ પ્રાહ ગૌરી વિહસ્ય
સત્યં ત્વં મે વદ કથમસૌ હન્યતે યેન કાલઃ ।
શમ્ભુસ્તામાહ સદ્યો હિમકરવદને યોગિનો યે ક્ષિપન્તિ
કાલવ્યાલં સકલમનઘાસ્તચ્છૃણુષ્વૈકચિત્તાઃ ॥ ૧૩॥

શઙ્કર ઉવાચ ।
પઞ્ચભૂતાત્મકો દેહઃ સદા યુક્તસ્તુ તદ્ગુણૈઃ ।
ઉત્પાદ્યતે વરારોહે તદ્વિલીનો હિ પાર્થિવઃ ॥ ૧૪॥

આકાશાજ્જાયતે વાયુર્વાયોસ્તેજશ્ચ જાયતે ।
તેજસોઽમ્બુ વિનિર્દિષ્ટં તસ્માદ્ધિ પૃથિવી ભવેત્ ॥ ૧૫॥

પૃથિવ્યાદીનિ ભૂતાનિ ગચ્છન્તિ ક્રમશઃ પરમ્ ।
ધરા પઞ્ચગુણા પ્રોક્તા હ્યાપશ્ચૈવ ચતુર્ગુણાઃ ॥ ૧૬॥

ત્રિગુણં ચ તથા તેજો વાયુર્દ્વિગુણ એવ ચ ।
શબ્દૈકગુણમાકાશં પૃથિવ્યાદિષુ કીર્તિતમ્ ॥ ૧૭॥

શબ્દઃ સ્પર્શશ્ચ રૂપં ચ રસો ગન્ધશ્ચ પઞ્ચમઃ ।

વિજહાતિ ગુણં સ્વં સ્વં તદા ભૂતં વિપદ્યતે ॥ ૧૮॥

તદા ગુણં વિગૃહ્ણાતિ પ્રાદુર્ભૂતં તદુચ્યતે ।
એવં જાનીહિ દેવેશિ પઞ્ચભૂતાનિ તત્ત્વતઃ ॥ ૧૯॥

તસ્માદ્ધિ યોગિના નિત્યં સ્વસ્વકાલેંઽશજા ગુણાઃ ।
ચિન્તનીયાઃ પ્રયત્નેન દેવિ કાલજિગીષુણા ॥ ૫.૨૬.૨૦॥

દેવ્યુવાચ ।
કથં જેજીયતે કાલો યોગિભિર્યોગવિત્પ્રભો ।
ધ્યાનેન ચાથ મન્ત્રેણ તત્સર્વં કથયસ્વ મે ॥ ૨૧॥

શઙ્કર ઉવાચ ।
શ ૃણુ દેવિ પ્રવક્ષ્યામિ યોગિનાં હિતકામ્યયા ।
પરજ્ઞાનપ્રકથનં ન દેયં યસ્ય કસ્યચિત્ ॥ ૨૨॥

શ્રદ્દધાનાય દાતવ્યં ભક્તિયુક્તાય ધીમતે ।
અનાસ્તિકાય શુદ્ધાય ધર્મનિત્યાય ભામિનિ ॥ ૨૩॥

સુશ્વાસેન સુશય્યાયાં યોગં યુઞ્જીત યોગવિત્ ।
દીપં વિનાન્ધકારે તુ પ્રજાઃ સુપ્તેષુ ધારયેત્ ॥ ૨૪॥

તર્જન્યા પિહિતૌ કર્ણૌ પીડયિત્વા મુહૂર્ત્તકમ્ ।
તસ્માત્સંશ્રૂયતે શબ્દસ્તુદન્વહ્નિસમુદ્ભવઃ ॥ ૨૫॥

સન્ધ્યાતો ભુક્તમેવં હિ ચાવસન્નં ક્ષણાદપિ ।
સર્વરોગાન્નિહત્યાશુ જ્વરોપદ્રવકાન્બહૂન્ ॥ ૨૬॥

યશ્ચોપલક્ષયેન્નિત્યમાકારં ઘટિકાદ્વયમ્ ।
જિત્વા મૃત્યું તથા કામં સ્વેચ્છયા પર્યટેદિહ ॥ ૨૭॥

સર્વજ્ઞઃ સર્વદર્શી ચ સર્વસિદ્ધિમવાપ્નુયાત્ ।
યથા નદતિ ખેઽબ્દો હિ પ્રાવૃડ્ભિઃ સુસંયતઃ ॥ ૨૮॥

તં શ્રુત્વા મુચ્યતે યોગી સદ્યઃ સંસારબન્ધનાત્ ।
તતઃ સ યોગિભિર્નિત્યં સૂક્ષ્માત્સૂક્ષ્મતરો ભવેત્ ॥ ૨૯॥

એષ તે કથિતો દેવિ શબ્દબ્રહ્મવિધિક્રમઃ ।
પલાલમિવ ધાન્યાર્થી ત્યજેદ્ગ્રન્થમશેષતઃ ॥ ૫.૨૬.૩૦॥

શબ્દબ્રહ્મ ત્વિદં પ્રાપ્ય યે કેચિદન્યકાઙ્ક્ષિણઃ ।

ઘ્નન્તિ તે મુષ્ટિનાકાશં કામયન્તે ક્ષુધાં તૃષામ્ ॥ ૩૧॥

જ્ઞાત્વા પરમિદં બ્રહ્મ સુખદં મુક્તિકારણમ્ ।
અબાહ્યમક્ષરં ચૈવ સર્વોપાધિવિવર્જિતમ્ ॥ ૩૨॥

મોહિતાઃ કાલપાશેન મૃત્યુપાશવશઙ્ગતાઃ ।
શબ્દબ્રહ્મ ન જાનન્તિ પાપિનસ્તે કુબુદ્ધયઃ ॥ ૩૩॥

તાવદ્ ભ્રમન્તિ સંસારે યાવદ્ધામ ન વિન્દતે ।
વિદિતે તુ પરે તત્ત્વે મુચ્યતે જન્મબન્ધનાત્ ॥ ૩૪॥

નિદ્રાલસ્યં મહાવિઘ્નં જિત્વા શત્રું પ્રયત્નતઃ ।
સુખાસને સ્થિતો નિત્યં શબ્દબ્રહ્માભ્યસન્નિતિ ॥ ૩૫॥

શતવૃદ્ધઃ પુમાંલ્લબ્ધ્વા યાવદાયુઃ સમભ્યસેત્ ।
મૃત્યુઞ્જયવપુસ્તમ્ભ આરોગ્યં વાયુવર્દ્ધનમ્ ॥ ૩૬॥

પ્રત્યયો દૃશ્યતે વૃદ્ધે કિં પુનસ્તરુણે જને ।
ન ચોઙ્કારો ન મન્ત્રોઽપિ નૈવ બીજં ન ચાક્ષરમ્ ॥ ૩૭॥

અનાહતમનુચ્ચાર્યં શબ્દબ્રહ્મ શિવં પરમ્ ।
ધ્યાયન્તે દેવિ સતતં સુધિયો યત્નતઃ પ્રિયે ॥ ૩૮॥

તસ્માચ્છબ્દા નવ પ્રોક્તાઃ પ્રાણવિદ્ભિસ્તુ લક્ષિતાઃ ।
તાન્ પ્રવક્ષ્યામિ યત્નેન નાદસિદ્ધિમનુક્રમાત્ ॥ ૩૯॥

ઘોષં કાંસ્યં તથા શ‍ૃઙ્ગં ઘણ્ટાં વીણાદિવંશજાન્ ।
દુન્દુભિં શઙ્ખશબ્દં તુ નવમં મેઘગર્જિતમ્ ॥ ૫.૨૬.૪૦॥

નવ શબ્દાન્ પરિત્યજ્ય તુઙ્કારં તુ સમભ્યસેત્ ।
ધ્યાયન્નેવં સદા યોગી પુણ્યૈઃ પાપૈર્ન લિપ્યતે ॥ ૪૧॥

ન શ‍ૃણોતિ યદા શ‍ૃણ્વન્યોગાભ્યાસેન દેવિકે ।
મ્રિયતેઽભ્યસમાનસ્તુ યોગી તિષ્ઠેદ્દિવાનિશમ્ ॥ ૪૨॥

તસ્માદુત્પદ્યતે શબ્દો મૃત્યુજિત્સપ્તભિર્દિનૈઃ ।
સ વૈ નવવિધો દેવિ તં બ્રવીમિ યથાર્થતઃ ॥ ૪૩॥

પ્રથમં નદતે ઘોષમાત્મશુદ્ધિકરં પરમ્ ।
સર્વવ્યાધિહરં નાદં વશ્યાકર્ષણમુત્તમમ્ ॥ ૪૪॥

દ્વિતીયં નદતે કાંસ્યં સ્તમ્ભયેત્ પ્રાણિનાં ગતિમ્ ।
વિષં ભૂતગ્રહાન્ સર્વાન્ બધ્નીયાન્નાત્ર સંશયઃ ॥ ૪૫॥

તૃતીયં નદતે શ‍ૃઙ્ગમભિચારિ નિયોજયેત્ ।
વિદ્વિડુચ્ચાટને શત્રોર્મારણે ચ પ્રયોજયેત્ ॥ ૪૬॥

ઘણ્ટાનાદં ચતુર્થં તુ વદતે પરમેશ્વરઃ ।
આકર્ષઃ સર્વદેવાનાં કિં પુનર્માનુષા ભુવિ ॥ ૪૭॥

યક્ષગન્ધર્વકન્યાશ્ચ તસ્યાકૃષ્ટા દદન્તિ હિ ।
યથેપ્સિતાં મહાસિદ્ધિં યોગિને કામતોઽપિ વા ॥ ૪૮॥

વીણા તુ પઞ્ચમો નાદઃ શ્રૂયતે યોગિભિઃ સદા ।
તસ્માદુત્પદ્યતે દેવિ દૂરાદર્શનમેવ હિ ॥ ૪૯॥

ધ્યાયતો વંશનાદં તુ સર્વતત્ત્વં પ્રજાયતે ।
દુન્દુભિં ધ્યાયમાનસ્તુ જરામૃત્યુવિવર્જિતઃ ॥ ૫.૨૬.૫૦॥

શઙ્ખશબ્દેન દેવેશિ કામરૂપં પ્રપદ્યતે ।
યોગિનો મેઘનાદેન ન વિપત્સઙ્ગમો ભવેત્ ॥ ૫૧॥

યશ્ચૈકમનસા નિત્યં તુઙ્કારં બ્રહ્મરૂપિણમ્ ।
કિમસાધ્યં ન તસ્યાસ્તિ યથામતિ વરાનને ॥ ૫૨॥

સર્વજ્ઞઃ સર્વદર્શી ચ કામરૂપી વ્રજત્યસૌ ।
ન વિકારૈઃ પ્રયુજ્યેત શિવ એવ ન સંશયઃ ॥ ૫૩॥

એતત્તે પરમેશાનિ શબ્દબ્રહ્મસ્વરૂપકમ્ ।
નવધા સર્વમાખ્યાતં કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૫૪॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં કાલવઞ્ચનવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૫.૨૬॥

૫.૨૭

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૨૭. સપ્તવિંશોઽધ્યાયઃ । કાલવઞ્ચનશિવપ્રાપ્તિવર્ણનમ્ ।

દેવ્યુવાચ ।
વાયોસ્તુ પદમાપ્નોતિ યોગાકાશસમુદ્ભવમ્ ।
તન્મે સર્વં સમાચક્ષ્વ પ્રસન્નસ્ત્વં યદિ પ્રભો ॥ ૧॥

શઙ્કર ઉવાચ ।
પુરા મે સર્વમાખ્યાતં યોગિનાં હિતકામ્યયા ।
કાલં જિગાય યઃ સમ્યગ્વાયોર્લિઙ્ગં યથા ભવેત્ ॥ ૨॥

તેન જ્ઞાત્વા દિનં યોગી પ્રાણાયામપરઃ સ્થિતઃ ।
સ જયત્યાગતં કાલં માસાર્ધેનૈવ સુન્દરિ ॥ ૩॥

હૃત્સ્થો વાયુઃ સદા વહ્નેર્દીપકઃ સોઽનુપાવકઃ ।
સ બાહ્યાભ્યન્તરો વ્યાપી વાયુઃ સર્વગતો મહાન્ ॥ ૪॥

જ્ઞાનવિજ્ઞાનમુત્સાહઃ સર્વં વાયોઃ પ્રવર્તતે ।
યેનેહ નિર્જિતો વાયુસ્તેન સર્વમિદં જગત્ ॥ ૫॥

ધારણાયાં સદા તિષ્ઠેજ્જરામૃત્યુજિઘાંસયા ।
યોગી યોગરતઃ સમ્યગ્ધારણાધ્યાનતત્પરઃ ॥ ૬॥

લોહકારો યથા ભસ્ત્રામાપૂર્યમુખતો મુને ।
સાધયેદ્વાયુના કર્મ તદ્વદ્યોગી સમભ્યસેત્ ॥ ૭॥

દેવઃ સહસ્રકો નેત્રપાદહસ્તસહસ્રકઃ ।
પૃથવીં હિ સર્વમાવૃત્ય સોઽગ્રે તિષ્ઠેદ્દશાઙ્ગુલમ્ ॥ ૮॥

ગાયત્રીં શિરસા સાર્દ્ધં જપેદ્ વ્યાહૃતિપૂર્વિકામ્ ।
ત્રિવારમાયતપ્રાણાઃ પ્રાણાયામઃ સ ઉચ્યતે ॥ ૯॥

ગતાગતા નિવર્તન્તે ચન્દ્રસૂર્યાદયો ગ્રહાઃ ।
અદ્યાપિ ન નિવર્તન્તે યોગધ્યાનપરાયણાઃ ॥ ૫.૨૭.૧૦॥

શતમબ્દં તપસ્તપ્ત્વા કુશાગ્રાપઃ પિબેદ્ દ્વિજઃ ।
તદાપ્નોતિ ફલં દેવિ પ્રાણાનાં ધારણૈકયા ॥ ૧૧॥

યો દ્વિજઃ કલ્યમુત્થાય પ્રાણાયામૈકમાચરેત્ ।
સર્વં પાપં નિહન્ત્યાશુ બ્રહ્મલોકં સ ગચ્છતિ ॥ ૧૨॥

યોઽતન્દ્રિતઃ સદૈકાન્તે પ્રણાયામપરો ભવેત્ ।

જરાં મૃત્યું વિનિર્જિત્ય વાયુગઃ ખેચરીતિ સઃ ॥ ૧૩॥

સિદ્ધસ્ય ભજતે રૂપં કાન્તિં મેધાં પરાક્રમમ્ ।
શૌર્યં વાયુસમો ગત્યા સૌખ્યં શ્લાઘ્યં પરં સુખમ્ ॥ ૧૪॥

એતત્કથિતમશેષં વાયોઃ સિદ્ધિં યદાપ્નુતે યોગી ।
યત્તેજસોઽપિ લભતે તત્તે વક્ષ્યામિ દેવેશિ ॥ ૧૫॥

સ્થિત્વા સુખાસને સ્વે શેતે જનવચનહીને તુ ।
શશિરવિયુતયા તેજઃ પ્રકાશયન્મધ્યમે દેશે ॥ ૧૬॥

વહ્નિગતં ભ્રૂમધ્યે પ્રકાશતે યસ્ત્વતન્દ્રિતો યોગી ।
દીપૈર્હીનધ્વાન્તે પશ્યેન્ન્યૂનમસંશયં લોકે ॥ ૧૭॥

નેત્રે કરશાખાભિઃ કિઞ્ચિત્સમ્પીડ્ય યત્નતો યોગી ।
તારં પશ્યન્ધ્યાયેન્મુહૂર્તમર્દ્ધં તમેહકભાવોઽપિ ॥ ૧૮॥

તતસ્તુ તમસિ ધ્યાયન્પશ્યતિ જ્યોતિરૈશ્વરમ્ ।
શ્વેતં રક્તં તથા પીતં કૃષ્ણમિન્દ્રધનુષ્પ્રભમ્ ॥ ૧૯॥

ભ્રુવોર્મધ્યે લલાટસ્થં બાલાર્કસમતેજસમ્ ।
તં વિદિત્વા તુ કામાઙ્ગી ક્રીડતે કામરૂપધૃક્ ॥ ૫.૨૭.૨૦॥

કારણપ્રશમાવેશં પરકાયપ્રવેશનમ્ ।
અણિમાદિગુણાવાપ્તિર્મનસા ચાવલોકનમ્ ॥ ૨૧॥

દૂરશ્રવણવિજ્ઞાનમદૃશ્યં બહુરૂપધૃક્ ।
સતતાભ્યાસયોગેન ખેચરત્વં પ્રજાયતે ॥ ૨૨॥

શ્રુતાધ્યયનસમ્પન્ના નાનાશાસ્ત્રવિશારદાઃ ।
જ્ઞાનિનોઽપિ વિમુહ્યન્તે પૂર્વકર્મવશાનુગાઃ ॥ ૨૩॥

પશ્યન્તોઽપિ ન પશ્યન્તિ શ ૃણ્વાના બધિરા યથા ।
યથાન્ધા માનુષા લોકે મૂઢાઃ પાપવિમોહિતાઃ ॥ ૨૪॥

વેદાહમેતં પુરુષં મહાન્ત-
માદિત્યવર્ણં તમસઃ પરસ્તાત્ ।
તમેવ વિદિત્વાતિમૃત્યુમેતિ
નાન્યઃ પન્થા વિદ્યતે પ્રાયણાય ॥ ૨૫॥

એષ તે કથિતઃ સમ્યક્તેજસો વિધિરુત્તમઃ ।

કાલં જિત્વા યથા યોગી ચામરત્વં પ્રપદ્યતે ॥ ૨૬॥

પુનઃ પરતરં વક્ષ્યે યથા મૃત્યુર્ન જાયતે ।
સાવધાનતયા દેવિ શ‍ૃણુષ્વૈકાગ્રમાનસા ॥ ૨૭॥

તુરીયા દેવિ ભૂતાનાં યોગિનાં ધ્યાનિનાં તથા ।
સુખાસને યથાસ્થાનં યોગી નિયતમાનસઃ ॥ ૨૮॥

સમુન્નતશરીરોઽપિ સ બદ્ધ્વા કરસમ્પુટમ્ ।
ચઞ્ચ્વાકારેણ વક્ત્રેણ પિબન્વાયું શનૈઃ શનૈઃ ॥ ૨૯॥

પ્રસ્રવન્તિ ક્ષણાદાપસ્તાલુસ્થા જીવદાયિકાઃ ।
તા જિઘ્રેદ્વાયુનાદાયામૃતં તચ્છીતલં જલમ્ ॥ ૩૦॥

પિબન્નનુદિનં યોગી ન મૃત્યુવશગો ભવેત્ ।
દિવ્યકાયો મહાતેજાઃ પિપાસાક્ષુદ્વિવર્જિતઃ ॥ ૩૧॥

બલેન નાગસ્તુરગો જવેન
દૃષ્ટ્યા સુપર્ણઃ સુશ્રુતિસ્તુ દૂરાત્ ।
આકુઞ્ચિતાકુણ્ડલિકૃષ્ણકેશો
ગન્ધર્વવિદ્યાધરતુલ્યવર્ણઃ ॥ ૩૨॥

જીવેન્નરો વર્ષશતં સુરાણાં
સુમેધસા વાક્પતિના સમત્વમ્ ।
એવં ચરન્ ખેચરતાં પ્રયાતિ
યથેષ્ટચારી સુખિતઃ સદૈવ ॥ ૩૩॥

પુનરન્યત્પ્રવક્ષ્યામિ વિધાનં યત્સુરૈરપિ ।
ગોપિતં તુ પ્રયત્નેન તચ્છૃણુષ્વ વરાનને ॥ ૩૪॥

સમાકુઞ્ચ્યાભ્યસેદ્યોગી રસનાં તાલુકં પ્રતિ ।
કિઞ્ચિત્કાલાન્તરેણૈવ ક્રમાત્પ્રાપ્નોતિ લમ્બિકામ્ ॥ ૩૫॥

તતઃ પ્રસ્રવતે સા તુ સંસ્પૃષ્ટા શીતલાં સુધામ્ ।
પિબન્નેવ સદા યોગી સોઽમરત્વં હિ ગચ્છતિ ॥ ૩૬॥

રેફાગ્રં લમ્બકાગ્રં કરતલઘટનં શુભ્રપદ્મસ્ય બિન્દો-
સ્તેનાકૃષ્ટા સુધેયં પતતિ પરપદે દેવતાનન્દકારી ।
સારં સંસારતારં કૃતકલુષતરં કાલતારં સતારં

યેનેદં પ્લાવિતાઙ્ગં સ ભવતિ ન મૃતઃ ક્ષુત્પિપાસાવિહીનઃ ॥ ૩૭॥

એભિર્યુક્તા ચતુર્ભિઃ ક્ષિતિધરતનયે યોગિભિર્વૈ ધરૈષા
ધૈર્યાન્નિત્યં કુતોઽન્તઃ સકલમપિ જગદ્ધત્સુખપ્રાપણાય ।
સ્વપ્ને દેહી વિધત્તે સકલમપિ સદા માનયન્યચ્ચ દુઃખં
સ્વર્ગે હ્યેવં ધરિત્ર્યાઃ પ્રભવતિ ચ તતો વા સ કિઞ્ચિચ્ચતુર્ણામ્ ॥ ૩૮॥

તસ્માન્મન્ત્રૈસ્તપોભિર્વ્રતનિયમયુતૈરૌષધૈર્યોગયુક્તા
ધાત્રી રક્તા મનુષ્યૈર્નયવિનયયુતૈર્ધર્મવિદ્ભિઃ ક્રમેણ ।
ભૂતાનામાદિ દેવો ન હિ ભવતિ ચલઃ સંયુતો વૈ ચતુર્ણાં
તસ્માદેવં પ્રવક્ષ્યે વિધિમનુગદિતં છાયિકં યચ્છિવાખ્યમ્ ॥ ૩૯॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં કાલવઞ્ચનશિવપ્રાપ્તિવર્ણનં નામ સપ્તવિંશોઽધ્યાયઃ ॥ ૫.૨૭॥

૫.૨૮
॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૨૮. અષ્ટાવિંશોઽધ્યાયઃ । છાયાપુરુષદર્શનવર્ણનમ્ ।

દેવ્યુવાચ ।
દેવદેવ મહાદેવ કથિતં કાલવઞ્ચનમ્ ।
શબ્દબ્રહ્મસ્વરૂપં ચ યોગલક્ષણમુત્તમમ્ ॥ ૧॥

કથિતં તે સમાસેન છાયિકં જ્ઞાનમુત્તમમ્ ।
વિસ્તરેણ સમાખ્યાહિ યોગિનાં હિતકામ્યયા ॥ ૨॥

શઙ્કર ઉવાચ ।
શ ृણુ દેવિ પ્રવક્ષ્યામિ છાયાપુરુષલક્ષણમ્ ।
યજ્જ્ઞાત્વા પુરુષઃ સમ્યક્સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૩॥

સૂર્યં હિ પૃષ્ઠતઃ કૃત્વા સોમં વા વરવર્ણિનિ ।
શુક્લામ્બરધરઃ સ્રગ્વી ગન્ધધૂપાદિવાસિતઃ ॥ ૪॥

સંસ્મરેન્મે મહામન્ત્રં સર્વકામફલપ્રદમ્ ।
નવાત્મકં પિણ્ડભૂતં સ્વાં છાયાં સન્નિરીક્ષયેત્ ॥ ૫॥

દૃષ્ટ્વા તાં પુનરાકાશે શ્વેતવર્ણસ્વરૂપિણીમ્ ।
સ પશ્યત્યેકભાવસ્તુ શિવં પરમકારણમ્ ॥ ૬॥

બ્રહ્મપ્રાપ્તિર્ભવેત્તસ્ય કાલવિદ્ભિરિતીરિતમ્ ।
બ્રહ્મહત્યાદિકૈઃ પાપૈર્મુચ્યતે નાત્ર સંશયઃ ॥ ૭॥

શિરોહીનં યદા પશ્યેત્ષડ્ભિર્માસૈર્ભવેત્ક્ષયઃ ।
સમસ્તં વાઙ્મયં તસ્ય યોગિનસ્તુ યથા તથા ॥ ૮॥

શુક્લે ધર્મં વિજાનીયાત્કૃષ્ણે પાપં વિનિર્દિશેત્ ।
રક્તે બન્ધં વિજાનીયાત્પીતે વિદ્વિષમાદિશેત્ ॥ ૯॥

વિવાહો બન્ધુનાશઃ સ્યાદ્વિતુણ્ડે ચૈવ ક્ષુદ્ભયમ્ ।
વિકટૌ નશ્યતે ભાર્યા વિજઙ્ઘે ધનમેવ હિ ॥ ૫.૨૮.૧૦॥

પાદાભાવે વિદેશઃ સ્યાદિત્યેતત્કથિતં મયા ।
તદ્વિચાર્યં પ્રયત્નેન પુરુષેણ મહેશ્વરિ ॥ ૧૧॥

સમ્યક્તં પુરુષં દૃષ્ટ્વા સન્નિવેશ્યાત્મનાત્મનિ ।
જપેન્નવાત્મકં મન્ત્રં હૃદયં મે મહેશ્વરિ ॥ ૧૨॥

વત્સરે વિગતે મન્ત્રી તન્નાસ્તિ યન્ન સાધયેત્ ।
અણિમાદિગુણાનષ્ટૌ ખેચરત્વં પ્રપદ્યતે ॥ ૧૩॥

પુનરન્યત્પ્રવક્ષ્યામિ શક્તિં જ્ઞાતું દુરાસદામ્ ।
પ્રત્યક્ષં દૃશ્યતે લોકે જ્ઞાનિનામગ્રતઃ સ્થિતમ્ ॥ ૧૪॥

અજ્ઞેયા લિખ્યતે લોકે યા સર્પીકૃતકુણ્ડલી ।
સા માત્રા યાનસંસ્થાપિ દૃશ્યતે ન ચ પઠ્યતે ॥ ૧૫॥

બ્રહ્માણ્ડમૂર્ધ્નિગા યા ચ સ્તુતા વેદૈસ્તુ નિત્યશઃ ।
જનની સર્વવિદ્યાનાં ગુપ્તવિદ્યેતિ ગીયતે ॥ ૧૬॥

ખેચરા સા વિનિર્દિષ્ટા સર્વપ્રાણિષુ સંસ્થિતા ।
દૃશ્યાદૃશ્યાચલા નિત્યા વ્યક્તાવ્યક્તા સનાતની ॥ ૧૭॥

અવર્ણા વર્ણસંયુક્તા પ્રોચ્યતે બિન્દુમાલિની ।
તાં પશ્યન્સર્વદા યોગી કૃતકૃત્યોઽભિજાયતે ॥ ૧૮॥

સર્વતીર્થકૃતસ્નાનાદ્ભવેદ્દાનસ્ય યત્ફલમ્ ।
સર્વયજ્ઞફલં યચ્ચ માલિન્યા દર્શનાત્તદા ॥ ૧૯॥

પ્રાપ્નોત્યત્ર ન સન્દેહઃ સત્યં વૈ કથિતં મયા ।
સર્વતીર્થેષુ યત્સ્નાત્વા દત્ત્વા દાનાનિ સર્વશઃ ॥ ૫.૨૮.૨૦॥

સર્વેષાં દેવિ યજ્ઞાનાં યત્ફલં તલ્લભેત્પુમાન્ ।
કિં બહૂક્ત્યા મહેશાનિ સર્વાન્કામાન્સમશ્નુતે ॥ ૨૧॥

તસ્માજ્જ્ઞાનં યથાયોગમભ્યસેત્સતતં બુધઃ ।
અભ્યાસાજ્જાયતે સિદ્ધિર્યોગોઽભ્યાસાત્પ્રવર્ધતે ॥ ૨૨॥

સંવિત્તિર્લભ્યતેઽભ્યાસાદભ્યાસાન્મોક્ષમશ્નુતે ।
અભ્યાસઃ સતતં કાર્યો ધીમતા મોક્ષકારણમ્ ॥ ૨૩॥

ઇત્યેતત્કથિતં દેવિ ભુક્તિમુક્તિફલપ્રદમ્ ।
કિમન્યત્પૃચ્છ્યતે તત્ત્વં વદ સત્યં બ્રવીમિ તે ॥ ૨૪॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા બ્રહ્મપુત્રવચનં પરમાર્થદમ્ ।
પ્રસન્નોઽભૂદતિ વ્યાસઃ પારાશર્યો મુનીશ્વરાઃ ॥ ૨૫॥

સનત્કુમારં સર્વજ્ઞં બ્રહ્મપુત્રં કૃપાનિધિમ્ ।
વ્યાસઃ પરમસન્તુષ્ટઃ પ્રણનામ મુહુર્મુહુઃ ॥ ૨૬॥

તતસ્તુષ્ટાવ તં વ્યાસઃ કાલેયઃ સ મુનીશ્વરઃ ।
સનત્કુમારં મુનયઃ સુરવિજ્ઞાનસાગરમ્ ॥ ૨૭॥

વ્યાસ ઉવાચ ।
કૃતાર્થોઽહં મુનિશ્રેષ્ઠ બ્રહ્મત્વં મે ત્વયા કૃતમ્ ।
નમસ્તેઽસ્તુ નમસ્તેઽસ્તુ ધન્યસ્ત્વં બ્રહ્મવિત્તમઃ ॥ ૨૮॥

સૂત ઉવાચ ।
ઇતિ સ્તુત્વા સ કાલેયો બ્રહ્મપુત્રં મહામુનિમ્ ।
તૂષ્ણીં બભૂવ સુપ્રીતઃ પરમાનન્દનિર્ભરઃ ॥ ૨૯॥

બ્રહ્મપુત્રસ્તમામન્ત્ર્ય પૂજિતસ્તેન શૌનકઃ ।
યયૌ સ્વધામ સુપ્રીતો વ્યાસોઽપિ પ્રીતમાનસઃ ॥ ૫.૨૮.૩૦॥

ઇતિ મે વર્ણિતો વિપ્રાઃ સુખદઃ પરમાર્થયુક્ ।
સનત્કુમારકાલેયસંવાદો જ્ઞાનવર્ધનઃ ॥ ૩૧॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં છાયાપુરુષદર્શનવર્ણનં નામાષ્ટાવિંશોઽધ્યાયઃ ॥ ૫.૨૮॥

૫.૨૯

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૨૯. એકોનત્રિંશોઽધ્યાયઃ । આદિસર્ગવર્ણનમ્ ।

શૌનક ઉવાચ ।
શ્રુતં મે મહદાખ્યાનં યત્ત્વયા પરિકીર્તિતમ્ ।
સનત્કુમારકાલેયસંવાદં પરમાર્થદમ્ ॥ ૧॥

અતોઽહં શ્રોતુમિચ્છામિ યથા સર્ગસ્તુ બ્રહ્મણઃ ।
સમુત્પન્નં તુ મે બ્રૂહિ યથા વ્યાસાચ્ચ તે શ્રુતમ્ ॥ ૨॥

સૂત ઉવાચ ।
મુને શ‍ૃણુ કથાં દિવ્યાં સર્વપાપપ્રણાશિનીમ્ ।
કથ્યમાનાં મયા ચિત્રાં બહ્વર્થાં શ્રુતવિસ્તરામ્ ॥ ૩॥

યશ્ચૈનાં પાઠયેત્તાં ચ શ‍ૃણુયાદ્વાપ્યભીક્ષ્ણશઃ ।
સ્વવંશધારણં કૃત્વા સ્વર્ગલોકે મહીયતે ॥ ૪॥

પ્રધાનં પુરુષો યત્તન્નિત્યં સદસદાત્મકમ્ ।
પ્રધાનપુરુષો ભૂત્વા નિર્મમે લોકભાવનઃ ॥ ૫॥

સ્રષ્ટારં સર્વભૂતાનાં નારાયણપરાયણમ્ ।
તં વૈ વિદ્ધિ મુનિશ્રેષ્ઠ બ્રહ્માણમમિતૌજસમ્ ॥ ૬॥

યસ્માદકલ્પયત્કલ્પાઃ સમગ્રાઃ શુચયો યતઃ ।
ભવન્તિ મુનિશાર્દૂલ નમસ્તસ્મૈ સ્વયમ્ભુવે ॥ ૭॥

તસ્મૈ હિરણ્યગર્ભાય પુરુષાયેશ્વરાય ચ ।
નમસ્કૃત્ય પ્રવક્ષ્યામિ ભૂયઃ સર્ગમનુત્તમમ્ ॥ ૮॥

બ્રહ્મા સ્રષ્ટા હરિઃ પાતા સંહર્તા ચ મહેશ્વરઃ ।
તસ્ય સર્ગસ્ય નાન્યોઽસ્તિ કાલે કાલે તથા ગતે ॥ ૯॥

સોઽપિ સ્વયમ્ભૂર્ભગવાન્ સિસૃક્ષુર્વિવિધાઃ પ્રજાઃ ।

અપ એવ સસર્જાદૌ તાસુ વીર્યમવાસૃજત્ ॥ ૫.૨૯.૧૦॥

આપો નારા ઇતિ પ્રોક્તા આપો વૈ નરસૂનવઃ ।
અયનં તસ્ય તાઃ પૂર્વં તેન નારાયણઃ સ્મૃતઃ ॥ ૧૧॥

હિરણ્યવર્ણમભવત્તદણ્ડમુદકેશયમ્ ।
તત્ર જજ્ઞે સ્વયં બ્રહ્મા સ્વયમ્ભૂરિતિ વિશ્રુતઃ ॥ ૧૨॥

હિરણ્યગર્ભો ભગવાનુષિત્વા પરિવત્સરમ્ ।
તદણ્ડમકરોદ્ દ્વૈધં દિવં ભૂમિં ચ નિર્મમે ॥ ૧૩॥

અધોઽધોર્ધ્વં પ્રયુક્તાનિ ભુવનાનિ ચતુર્દશ ।
તયોઃ શકલયોર્મધ્ય આકાશમમૃજત્પ્રભુઃ ॥ ૧૪॥

અપ્સુ પરિપ્લવાં પૃથ્વીં દિશશ્ચ દશધા દધે ।
તત્ર કાલે મનો વાચં કામક્રોધાવથો રતિમ્ ॥ ૧૫॥

મરીચિમત્ર્યઙ્ગિરસૌ પુલસ્ત્યં પુલહં ક્રતુમ્ ।
વસિષ્ઠં તુ મહાતેજાઃ સોઽસૃજત્સપ્ત માનસાન્ ॥ ૧૬॥

સપ્ત બહ્માણ ઇત્યેતે પુરાણે નિશ્ચયં ગતાઃ ।
તતોઽસૃજત્પુનર્બ્રહ્મા રુદ્રાન્ ક્રોધસમુદ્ભવાન્ ॥ ૧૭॥

સનત્કુમારં ચ ઋષિં સર્વેષામપિ પૂર્વજમ્ ।
સપ્ત ચૈતે પ્રજાયન્તે પશ્ચાદ્રુદ્રાશ્ચ સર્વતઃ ॥ ૧૮॥

અતઃ સનત્કુમારસ્તુ તેજઃ સઙ્ક્ષિપ્ય તિષ્ઠતિ ।
તેષાં સપ્ત મહાવંશા દિવ્યા દેવર્ષિપૂજિતાઃ ॥ ૧૯॥

પ્રજાયન્તે ક્રિયાવન્તો મહર્ષિભિરલઙ્કૃતાઃ ।
વિદ્યુતોઽશનિમેઘાંશ્ચ રોહિતેન્દ્રધનૂંષિ ચ ॥ ૫.૨૯.૨૦॥

પયાંસિ ચ સસર્જાદૌ પર્જન્યં ચ સસર્જ હ ।
ઋચો યજૂંષિ સામાનિ નિર્મમે યજ્ઞસિદ્ધયે ॥ ૨૧॥

પૂજ્યાંસ્તૈરયજન્દેવાનિત્યેવમનુશુશ્રુમ ।
મુખાદ્દેવાનજનયત્પિતૄંશ્ચૈવાથ વક્ષસઃ ।
પ્રજનાચ્ચ મનુષ્યાન્વૈ જઘનાન્નિર્મમેઽસુરાન્ ॥ ૨૨॥

ઉચ્ચાવચાનિ ભૂતાનિ ગાત્રેભ્યસ્તસ્ય જજ્ઞિરે ।
આપવસ્ય પ્રજાસર્ગં સૃજતો હિ પ્રજાપતેઃ ॥ ૨૩॥

સૃજ્યમાનાઃ પ્રજાશ્ચૈવ નાવર્ધન્ત યદા તદા ।
દ્વિધા કૃત્વાત્મનો દેહં સ્ત્રી ચૈવ પુરુષોઽભવત્ ॥ ૨૪॥

સસૃજેઽથ પ્રજાઃ સર્વા મહિમ્ના વ્યાપ્ય વિશ્વતઃ ।
વિરાજમસૃજદ્વિષ્ણુઃ સ સૃષ્ટઃ પુરુષં વિરાટ્ ॥ ૨૫॥

દ્વિતીયં તં મનું વિદ્ધિ મનોરન્તરમેવ ચ ।
સ વૈરાજઃ પ્રજાઃ સર્વાઃ સસર્જ પુરુષઃ પ્રભુઃ ॥ ૨૬॥

નારાયણવિસર્ગસ્ય પ્રજાસ્તસ્યાપ્યયોનિજઃ ।
આયુષ્માન્ કીર્તિમાન્ધન્યઃ પ્રજાવાંશ્ચાભવત્તતઃ ॥ ૨૭॥

ઇત્યેવમાદિસર્ગસ્તે વર્ણિતો મુનિસત્તમ ।
આદિસર્ગં વિદિત્વૈવં યથેષ્ટાં પ્રાપ્નુયાદ્ગતિમ્ ॥ ૨૮॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં આદિસર્ગવર્ણનં નામ એકોનત્રિંશોઽધ્યાયઃ ॥ ૫.૨૯॥

૫.૩૦
॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૩૦. ત્રિંશોઽધ્યાયઃ । સર્ગવર્ણનમ્ ૧ ।

સૂત ઉવાચ ।
સંસૃષ્ટાસુ પ્રજાસ્વેવ આપવોઽથ પ્રજાપતિઃ ।
લેભે વૈ પુરુષઃ પત્નીં શતરૂપામયોનિજામ્ ॥ ૧॥

આપવસ્ય મહિમ્ના તુ દિવમાવૃત્ય તિષ્ઠતઃ ।
ધર્મેણૈવ મહાત્મા સ શતરૂપાપ્યજાયત ॥ ૨॥

સા તુ વર્ષશતં તપ્ત્વા તપઃ પરમદુશ્ચરમ્ ।
ભર્તારં દીપ્તતપસં પુરુષં પ્રત્યપદ્યત ॥ ૩॥

સ વૈ સ્વાયમ્ભુવો જજ્ઞે પુરુષો મનુરુચ્યતે ।
તસ્યૈકસપ્તતિયુગં મન્વન્તરમિહોચ્યતે ॥ ૪॥

વૈરાજાત્પુરુષાદ્વીરા શતરૂપા વ્યજાયત ।

પ્રિયવ્રતોત્તાનપાદૌ વીરકાયામજાયતામ્ ॥ ૫॥

કામ્યા નામ મહાભાગા કર્દમસ્ય પ્રજાપતેઃ ।
કામ્યાપુત્રાસ્ત્રયસ્ત્વાસન્સંરાટ્સાક્ષિરવિટ્પ્રભુઃ ॥ ૬॥

ઉત્તાનપાદોઽજનયત્પુત્રાન્ શક્રસમાન્ પ્રભુઃ ।
ધ્રુવં ચ તનયં દિવ્યમાત્માનન્દસુવર્ચસમ્ ॥ ૭॥

ધર્મસ્ય કન્યા સુશ્રોણી સુનીતિર્નામ વિશ્રુતા ।
ઉત્પન્ના ચાપિ ધર્મેણ ધ્રુવસ્ય જનની તથા ॥ ૮॥

ધ્રુવો વર્ષસહસ્રાણિ ત્રીણિ દિવ્યાનિ કાનને ।
તપસ્તેપે સ બાલસ્તુ પ્રાર્થયન્સ્થાનમવ્યયમ્ ॥ ૯॥

તસ્મૈ બ્રહ્મા દદૌ પ્રીતઃ સ્થાનમાત્મસમં પ્રભુઃ ।
અચલં ચૈવ પુરતઃ સપ્તર્ષીણાં પ્રજાપતિઃ ॥ ૫.૩૦.૧૦॥

તસ્માત્ પુષ્ટિશ્ચ ધાન્યશ્ચ ધ્રુવાત્પુત્રૌ વ્યજાયતામ્ ।
પુષ્ટિરેવં સમુત્થાયાઃ પઞ્ચપુત્રાનકલ્મષાન્ ॥ ૧૧॥

રિપું રિપુઞ્જયં વિપ્રં વૃકલં વૃષતેજસમ્ ।
રિપોરેવં ચ મહિષી ચાક્ષુષં સર્વતોદિશમ્ ॥ ૧૨॥

અજીજનત્પુષ્કરિણ્યાં વરુણં ચાક્ષુષો મનુઃ ।
મનોરજાયન્ત દશ નડ્વલાયાં મહૌજસઃ ॥ ૧૩॥

કન્યાયાં હિ મુનિશ્રેષ્ઠ વૈરાજસ્ય પ્રજાપતેઃ ।
પુરુર્માસઃ શતદ્યુમ્નસ્તપસ્વી સત્યવિત્કવિઃ ॥ ૧૪॥

અગ્નિષ્ટોમોઽતિરાત્રશ્ચાતિમન્યુઃ સુયશા દશ ।
પૂરોરજનયત્પુત્રાન્ ષડાગ્નેયી મહાપ્રભાન્ ॥ ૧૫॥

અઙ્ગં સુમનસં ખ્યાતિં સૃતિમઙ્ગિરસં ગયમ્ ।
અઙ્ગાત્સુનીથા ભાર્યા વૈ વેનમેકમસૂયત ॥ ૧૬॥

અપચારેણ વેનસ્ય કોપસ્તેષાં મહાનભૂત્ ।
હુઙ્કારેણૈવ તં જઘ્નુર્મુનયો ધર્મતત્પરાઃ ॥ ૧૭॥

અથ પ્રજાર્થમૃષયઃ પ્રાર્થિતાશ્ચ સુનીથયા ।
સારસ્વતાસ્તદા તસ્ય મમન્થુર્દક્ષિણં કરમ્ ॥ ૧૮॥

વેનસ્ય પાણૌ મથિતે સમ્બભૂવ તતઃ પૃથુઃ ।
સ ધન્વી કવચી જાતસ્તેજસાદિત્યસન્નિભઃ ॥ ૧૯॥

અવતારઃ સ વિષ્ણોર્હિ પ્રજાપાલનહેતવે ।
ધર્મસંરક્ષણાર્થાય દુષ્ટાનાં દણ્ડહેતવે ॥ ૫.૩૦.૨૦॥

પૃથુર્વૈન્યસ્તદા પૃથ્વીમરક્ષત્ક્ષત્રપૂર્વજઃ ।
રાજસૂયાભિષિક્તાનામાદ્યઃ સ વસુધાપતિઃ ॥ ૨૧॥

તસ્માચ્ચૈવ સમુત્પન્નૌ નિપુણૌ સૂતમાગધૌ ।
તેનેયં ગૌર્મુનિશ્રેષ્ઠ દુગ્ધા સર્વહિતાય વૈ ॥ ૨૨॥

સર્વેષાં વૃત્તિદશ્ચાભૂદ્દેવર્ષિસુરરક્ષસામ્ ।
મનુષ્યાણાં વિશેષેણ શતયજ્ઞકરો નૃપઃ ॥ ૨૩॥

પૃથોઃ પુત્રૌ તુ જજ્ઞાતે ધર્મજ્ઞૌ ભુવિ પાર્થિવૌ ।
વિજિતાશ્વશ્ચ હર્યક્ષો મહાવીરૌ સુવિશ્રુતૌ ॥ ૨૪॥

શિખણ્ડિની ચાજનયત્પુત્રં પ્રાચીનબર્હિષમ્ ।
પ્રાચીનાગ્રાઃ કુશાસ્તસ્ય પૃથિવીતલચારિણઃ ॥ ૨૫॥

સમુદ્રતનયા તેન ધર્મતઃ સુવિવાહિતા ।
રેજેઽધિકતરં રાજા કૃતદારો મહાપ્રભુઃ ॥ ૨૬॥

સમુદ્રતનયાયાસ્તુ દશ પ્રાચીનબર્હિષઃ ।
બભૂવુસ્તનયા દિવ્યા બહુયજ્ઞકરસ્ય વૈ ॥ ૨૭॥

સર્વે પ્રાચેતસા નામ્ના ધનુર્વેદસ્ય પારગાઃ ।
અપૃથગ્ધર્માચરણાસ્તેઽતપ્યન્ત મહત્તપઃ ॥ ૨૮॥

દશવર્ષસહસ્રાણિ સમુદ્રસલિલેશયાઃ ।
રુદ્રગીતં જપન્તશ્ચ શિવધ્યાનપરાયણાઃ ॥ ૨૯॥

તપશ્ચરત્સુ પૃથ્વ્યામભવંશ્ચ મહીરુહાઃ ।
અરક્ષ્યમાણાયાં પૃથ્વ્યાં બભૂવાથ પ્રજાક્ષયઃ ॥ ૫.૩૦.૩૦॥

તાન્ દૃષ્ટ્વા તુ નિવૃત્તાસ્તે તપસો લબ્ધસદ્વરાઃ ।
ચુક્રુધુર્મુનિશાર્દૂલ દગ્ધુકામાસ્તપોબલાઃ ॥ ૩૧॥

પ્રાચેતસા મુખેભ્યસ્તે પ્રાસૃજન્નગ્નિમારુતૌ ।
વૃક્ષાનુન્મૂલ્ય વાયુસ્તાનદહદ્ધવ્યવાહનઃ ॥ ૩૨॥

વૃક્ષક્ષયં તતો દૃષ્ટ્વા કિઞ્ચિચ્છેષેષુ શાખિષુ ।
ઉપગમ્યાબ્રવીદેતાન્ રાજા સોમઃ પ્રતાપવાન્ ॥ ૩૩॥

સોમ ઉવાચ ।
કોપં યચ્છત રાજાનઃ સર્વે પ્રાચીનબર્હિષઃ ।
અનુભૂતાનુકન્યેયં વૃક્ષાણાં વરવર્ણિની ॥ ૩૪॥

ભવિષ્યં જાનતા સા તુ ધૃતા ગર્ભેણ વૈ મયા ।
ભાર્યા વોઽસ્તુ મહાભાગાઃ સોમવંશવિવર્ધિની ॥ ૩૫॥

અસ્યામુત્પત્સ્યતે વિદ્વાન્ દક્ષો નામ પ્રજાપતિઃ ।
સૃષ્ટિકર્તા મહાતેજા બ્રહ્મપુત્રઃ પુરાતનઃ ॥ ૩૬॥

યુષ્માકં તેજસાર્ધેન મમ ચાનેન તેજસા ।
બ્રહ્મતેજોમયો ભૂપઃ પ્રજાઃ સંવર્ધયિષ્યતિ ॥ ૩૭॥

તતઃ સોમસ્ય વચનાજ્જગૃહુસ્તે પ્રચેતસઃ ।
ભાર્યાં ધર્મેણ તાં પ્રીત્યા વૃક્ષજાં વરવર્ણિનીમ્ ॥ ૩૮॥

તેભ્યસ્તસ્યાસ્તુ સઞ્જજ્ઞે દક્ષો નામ પ્રજાપતિઃ ।
સોઽપિ જજ્ઞે મહાતેજાઃ સોમસ્યાંશેન વૈ મુને ॥ ૩૯॥

અચરાંશ્ચ ચરાંશ્ચૈવ દ્વિપદોઽથ ચતુષ્પદઃ ।
સંસૃજ્ય મનસા દક્ષો મૈથુનીં સૃષ્ટિમારભત્ ॥ ૫.૩૦.૪૦॥

વીરણસ્ય સુતાં નામ્ના વીરણીં સ પ્રજાપતેઃ ।
ઉપયેમે સુવિધિના સુધર્મેણ પતિવ્રતામ્ ॥ ૪૧॥

હર્યશ્વાનયુતં તસ્યાં સુતાન્ પુણ્યાનજીજનત્ ।
તે વિરક્તા બભૂવુશ્ચ નારદસ્યોપદેશતઃ ॥ ૪૨॥

તચ્છ્રુત્વા સ પુનર્દક્ષઃ સુબલાશ્વાનજીજનત્ ।
નામતસ્તનયાંસ્તસ્યાં સહસ્રપરિસઙ્ખ્યયા ॥ ૪૩॥

તેઽપિ ભ્રાતૃપથા યાતાસ્તન્મુનેરુપદેશતઃ ।
નાગમન્ પિતૃસાન્નિધ્યં વિરક્તા ભિક્ષુમાર્ગિણઃ ॥ ૪૪॥

તચ્છ્રુત્વા શાપમાક્રુદ્ધો મુનયે દુઃસહં દદૌ ।
કુત્રચિન્ન લભસ્વેતિ સંસ્થિતિં કલહપ્રિય ॥ ૪૫॥

સાન્ત્વિતોઽથ વિધાત્રા હિ સ પશ્ચાદસૃજત્સ્ત્રિયઃ ।
મહાજ્વાલાસ્વરૂપેણ ગુણૈશ્ચાપિ મુનીશ્વરઃ ॥ ૪૬॥

દદૌ સ દશ ધર્માય કશ્યપાય ત્રયોદશ ।
દ્વે ચૈવં બ્રહ્મપુત્રાય દ્વે ચૈવાઙ્ગિરસે તદા ॥ ૪૭॥

દ્વે કૃશાશ્વાય વિદુષે મુનયે મુનિસત્તમ ।
શિષ્ટાઃ સોમાય દક્ષોઽપિ નક્ષત્રાખ્યા દદૌ પ્રભુઃ ॥ ૪૮॥

તાભ્યો દક્ષસ્ય પુત્રીભ્યો જાતા દેવાસુરાદયઃ ।
બહવસ્તનયાઃ ખ્યાતાસ્તૈઃ સર્વૈઃ પૂરિતં જગત્ ॥ ૪૯॥

તતઃ પ્રભૃતિ વિપ્રેન્દ્ર પ્રજા મૈથુનસમ્ભવાઃ ।
સઙ્કલ્પાદ્દર્શનાત્સ્પર્શાત્પૂર્વેષાં સૃષ્ટિરુચ્યતે ॥ ૫.૩૦.૫૦॥

શૌનક ઉવાચ ।
અઙ્ગુષ્ઠાદ્ બ્રહ્મણો જજ્ઞે દક્ષશ્ચોક્તસ્ત્વયા પુરા ।
કથં પ્રાચેતસત્વં હિ પુનર્લેભે મહાતપાઃ ॥ ૫૧॥

એતં મે સંશયં સૂત પ્રત્યાખ્યાતું ત્વમર્હસિ ।
ચિત્રમેતત્સ સોમસ્ય કથં શ્વશુરતાં ગતઃ ॥ ૫૨॥

સૂત ઉવાચ ।
ઉત્પત્તિશ્ચ નિરોધશ્ચ નિત્યં ભૂતેષુ વર્તતે ।
કલ્પે કલ્પે ભવન્ત્યેતે સર્વે દક્ષાદયો મુને ॥ ૫૩॥

ઇમાં વિસૃષ્ટિં દક્ષસ્ય યો વિદ્યાત્સચરાચરામ્ ।
પ્રજાવાનાયુષા પૂર્ણઃ સ્વર્ગલોકે મહીયતે ॥ ૫૪॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં સર્ગવર્ણનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૫.૩૦॥

૫.૩૧

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

# ૫.૩૧. એકત્રિંશોઽધ્યાયઃ । સર્ગવર્ણનમ્ ૨ ।

શૌનક ઉવાચ ।
દેવાનાં દાનવાનાં ચ ગન્ધર્વોરગરક્ષસામ્ ।
સૃષ્ટિં તુ વિસ્તરેણેમાં સૂતપુત્ર વદાશુ મે ॥ ૧॥

સૂત ઉવાચ ।
યદા ન વવૃધે સા તુ વીરણસ્ય પ્રજાપતિઃ ।
સુતાં સુતપસા યુક્તામાહ્વયત્સર્ગકારણાત્ ॥ ૨॥

સ મૈથુનેન ધર્મેણ સસર્જ વિવિધાઃ પ્રજાઃ ।
તાઃ શ◌ૃણુ ત્વં મહાપ્રાજ્ઞ કથયામિ સમાસતઃ ॥ ૩॥

તસ્યાં પુત્રસહસ્રાણિ વીરિણ્યાં પઞ્ચ વીર્યવાન્ ।
આશ્રિત્ય જનયામાસ દક્ષ એવ પ્રજાપતિઃ ॥ ૪॥

એતાન્ સૃષ્ટાંસ્તુ તાન્દૃષ્ટ્વા નારદઃ પ્રાહ વૈ મુનિઃ ।
સત્રે સ તુ સમુત્પન્નો નારદઃ પરમેષ્ઠિનઃ ॥ ૫॥

શ્રુતવાન્વા કશ્યપાદ્વૈ પુંસાં સૃષ્ટિર્ભવિષ્યતિ ।
દક્ષસ્યૈવ દુહિતૃષુ તસ્માત્તાનબ્રવીત્તુ સઃ ॥ ૬॥

અજાનન્તઃ કથં સૃષ્ટિં બાલિશા વૈ કરિષ્યથ ।
દિશં કાઞ્ચિદજાનન્તસ્તસ્માદ્વિજ્ઞાય તાં ભુવમ્ ॥ ૭॥

ઇત્યુક્તાઃ પ્રયયુઃ સર્વે આશાં વિજ્ઞાતુમોજસા ।
તદન્તં ન હિ સમ્પ્રાપ્ય ન નિવૃત્તાઃ પિતુર્ગૃહમ્ ॥ ૮॥

તજ્જ્ઞાત્વા જનયામાસ પુનઃ પઞ્ચશતાન્ સુતાન્ ।
તાનુવાચ પુનઃ સોઽપિ નારદઃ સર્વદર્શનઃ ॥ ૯॥

નારદ ઉવાચ ।
ભુવો માનમજાનન્તઃ કથં સૃષ્ટિં કરિષ્યથ ।
સર્વે હિ બાલિશાઃ કિં હિ સૃષ્ટિકર્તું સમુદ્યતાઃ ॥ ૫.૩૧.૧૦॥

સૂત ઉવાચ ।
તેઽપિ તદ્વચનં શ્રુત્વા નિર્યાતાઃ સર્વતોદિશમ્ ।
સુબલાશ્વા દક્ષસુતા હર્યશ્વા ઇવ તે પુરા ॥ ૧૧॥

અનન્તં પુષ્કરં પ્રાપ્ય ગતાસ્તેઽપિ પરાભવમ્ ।

અદ્યાપિ ન નિવર્તન્તે સમુદ્રેભ્ય ઇવાપગાઃ ॥ ૧૨॥

તદાપ્રભૃતિ વૈ ભ્રાતા ભ્રાતુરન્વેષણે રતઃ ।
પ્રયાતો નશ્યતિ મુને તન્ન કાર્યં વિપશ્ચિતા ॥ ૧૩॥

તાંશ્ચાપિ નષ્ટાન્ વિજ્ઞાય પુત્રાન્દક્ષઃ પ્રજાપતિઃ ।
સ ચ ક્રોધાદ્દદૌ શાપં નારદાય મહાત્મને ॥ ૧૪॥

કુત્રચિન્ન લભસ્વેતિ સંસ્થિતિં કલહપ્રિય ।
તવ સાન્નિધ્યતો લોકે ભવેચ્ચ કલહઃ સદા ॥ ૧૫॥

સાન્ત્વિતોઽથ વિધાત્રા હિ સ દક્ષસ્તુ પ્રજાપતિઃ ।
કન્યાઃ ષષ્ટ્યસૃજત્પશ્ચાદ્વીરિણ્યામિતિ નઃ શ્રુતમ્ ॥ ૧૬॥

દદૌ સ દશ ધર્માય કશ્યપાય ત્રયોદશ ।
સપ્તવિંશતિ સોમાય ચતસ્રોઽરિષ્ટનેમિને ॥ ૧૭॥

દ્વે ચૈવં બ્રહ્મપુત્રાય દ્વે ચૈવાઙ્ગિરસે તદા ।
દ્વે કૃશાશ્વાય વિદુષે તાસાં નામાનિ મે શ‍ૃણુ ॥ ૧૮॥

અરુન્ધતી વસુર્યામિર્લમ્બા ભાનુર્મરુત્વતી ।
સઙ્કુલ્પા ચ મુહૂર્તા ચ સન્ધ્યા વિશ્વા ચ વૈ મુને ॥ ૧૯॥

ધર્મપત્ન્યો મુને ત્વેતાસ્તાસ્વપત્યાનિ મે શ‍ૃણુ ।
વિશ્વેદેવાસ્તુ વિશ્વાયાઃ સાધ્યાન્સાધ્યા વ્યજાયત ॥ ૫.૩૧.૨૦॥

મરુત્વત્યાં મરુત્વન્તો વસોસ્તુ વસવસ્તથા ।
ભાનોસ્તુ ભાનવઃ સર્વે મુહૂર્તાયાં મુહૂર્તજાઃ ॥ ૨૧॥

લમ્બાયાશ્ચૈવ ઘોષોઽથ નાગવીથી ચ યામિજા ।
પૃથિવીવિષમસ્તસ્યામરુન્ધત્યામજાયત ॥ ૨૨॥

સઙ્કુલ્પાયાસ્તુ સત્યાત્મા જજ્ઞે સઙ્કુલ્પ એવ હિ ।
અયાદયો વસોઃ પુત્રા અષ્ટૌ તાન્ શ‍ૃણુ શૌનક ॥ ૨૩॥

અયો ધ્રુવશ્ચ સોમશ્ચ ધરશ્ચૈવાનિલોઽનલઃ ।
પ્રત્યૂષશ્ચ પ્રભાસશ્ચ વસવાઽષ્ટૌ ચ નામતઃ ॥ ૨૪॥

અયસ્ય પુત્રો વૈતણ્ડઃ શ્રમઃ શાન્તો મુનિસ્તથા ।
ધ્રુવસ્ય પુત્રો ભગવાન્ કાલો લોકભાવનઃ ॥ ૨૫॥

સોમસ્ય ભગવાન્ વર્ચા વર્ચસ્વી યેન જાયતે ।
ધરસ્ય પુત્રો દ્રવિણો હુતહવ્યવહસ્તથા ॥ ૨૬ ॥

મનોહરાયાઃ શિશિરઃ પ્રાણોઽથ રમણસ્તથા ।
અનિલસ્ય શિવા ભાર્યા યસ્યાઃ પુત્રાઃ પુરોજવઃ ॥ ૨૭ ॥

અવિજ્ઞાતગતિશ્ચૈવ દ્વૌ પુત્રાવનિલસ્ય તુ ।
અગ્નિપુત્રઃ કુમારસ્તુ શરસ્તમ્બે શ્રિયાવૃતે ॥ ૨૮ ॥

તસ્ય શાખો વિશાખશ્ચ નૈગમેયશ્ચ પૃષ્ઠતઃ ।
અપત્યં કૃત્તિકાનાં તુ કાર્તિકેય ઇતિ સ્મૃતઃ ॥ ૨૯ ॥

પ્રત્યૂષસ્ય ત્વભૂત્પુત્ર ઋષિર્નામ્ના તુ દેવલઃ ।
દ્વૌ પુત્રૌ દેવલસ્યાપિ પ્રજાવન્તૌ મનીષિણૌ ॥ ૫.૩૧.૩૦ ॥

બૃહસ્પતેસ્તુ ભગિની વરસ્ત્રી બ્રહ્મચારિણી ।
યોગસિદ્ધા જગત્કૃત્સ્નં સમન્તાદ્વ્યચરત્તદા ॥ ૩૧ ॥

પ્રભાસસ્ય તુ સા ભાર્યા વસૂનામષ્ટમસ્ય ચ ।
વિશ્વકર્મા મહાભાગ તસ્ય જજ્ઞે પ્રજાપતિઃ ॥ ૩૨ ॥

કર્તા શિલ્પસહસ્રાણાં ત્રિદશાનાં ચ વાર્ધકિઃ ।
ભૂષણાનાં ચ સર્વેષાં કર્તા શિલ્પવતાં વરઃ ॥ ૩૩ ॥

યઃ સર્વાસાં વિમાનાનિ દેવતાનાં ચકાર હ ।
મનુષ્યાશ્ચોપજીવન્તિ યસ્ય શિલ્પં મહાત્મનઃ ॥ ૩૪ ॥

રૈવતોઽજો ભવો ભીમો વામ ઉગ્રો વૃષાકપિઃ ।
અજૈકપાદહિર્બુધ્ન્યો બહુરૂપો મહાનિતિ ॥ ૩૫ ॥

સરૂપાયાં પ્રસૂતસ્ય સ્ત્રિયાં રુદ્રશ્ચ કોટિશઃ ।
તત્રૈકાદશમુખ્યાસ્તુ તન્નામાનિ મુને શ◌ૃણુ ॥ ૩૬ ॥

અજૈકપાદહિર્બુધ્ન્યસ્ત્વષ્ટા રુદ્રશ્ચ વીર્યવાન્ ।
હરશ્ચ બહુરૂપશ્ચ ત્ર્યમ્બકશ્ચાપરાજિતઃ ॥ ૩૭ ॥

વૃષાકપિશ્ચ શમ્ભુશ્ચ કપર્દી રૈવતસ્તથા ।
એકાદશૈતે કથિતા રુદ્રાસ્ત્રિભુવનેશ્વરાઃ ॥ ૩૮ ॥

શતં ત્વેવં સમાખ્યાતં રુદ્રાણામમિતૌજસામ્ ।
શ◌ૃણુ કશ્યપપત્નીનાં નામાનિ મુનિસત્તમ ॥ ૩૯ ॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં સર્ગવર્ણનં નામૈકત્રિંશોઽધ્યાયઃ ॥ ૫.૩૧॥

૫.૩૨
॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૩૨. દ્વાત્રિંશોઽધ્યાયઃ । કશ્યપવંશવર્ણનમ્ ૧ ।

સૂત ઉવાચ ।
અદિતિર્દિતિશ્ચ સુરસારિષ્ટેલા દનુરેવ ચ ।
સુરભિર્વિનતા ચૈવ તામ્રા ક્રોધવશા ખશા ॥ ૧॥

કદ્રૂર્મુનિશ્ચ વિપ્રેન્દ્ર તાસ્વપત્યાનિ મે શ ૃણુ ।
પૂર્વમન્વન્તરે શ્રેષ્ઠે દ્વાદશાસન્સુરોત્તમાઃ ॥ ૨॥

તુષિતા નામ તેઽન્યોન્યમૂચુર્વૈવસ્વતેઽન્તરે ।
ઉપસ્થિતે સુયશસશ્ચાક્ષુષસ્યાન્તરે મનોઃ ॥ ૩॥

હિતાય સર્વલોકાનાં સમાગમ્ય પરસ્પરમ્ ।
આગચ્છત દ્રુતં દેવા અદિતિં ચ પ્રવિશ્ય વૈ ॥ ૪॥

મન્વન્તરે પ્રસૂયામઃ સતાં શ્રેયો ભવિષ્યતિ ।
એવમુક્તાસ્તુ તે સર્વે ચાક્ષુષસ્યાન્તરે મનોઃ ॥ ૫॥

મારીચાત્કશ્યપાજ્જાતાસ્તેઽદિત્યાં દક્ષકન્યયા ।
તત્ર વિષ્ણુશ્ચ શક્રશ્ચ જજ્ઞાતે પુનરેવ હિ ॥ ૬॥

અર્યમા ચૈવ ધાતા ચ ત્વષ્ટા પૂષા તથૈવ ચ ।
વિવસ્વાન્ સવિતા ચૈવ મિત્રાવરુણ એવ ચ ॥ ૭॥

અંશો ભગશ્ચાતિતેજા આદિત્યા દ્વાદશ સ્મૃતાઃ ।
ચાક્ષુષસ્યાન્તરે પૂર્વમાસન્યે તુષિતાઃ સુરાઃ ॥ ૮॥

પુરૈવ તસ્યાન્તરે તુ આદિત્યા દ્વાદશ સ્મૃતાઃ ।
ઇતિ પ્રોક્તાનિ ક્રમશોઽદિત્યપત્યાનિ શૌનક ॥ ૯॥

સપ્તવિંશતિર્યાઃ પ્રોક્તાઃ સોમપત્ન્યોઽથ સુવ્રતાઃ ।

તાસામપત્યાન્યભવન્દીપ્તયોઽમિતતેજસઃ ॥ ૫.૩૨.૧૦॥

અરિષ્ટનેમિપત્નીનામપત્યાનીહ ષોડશ ।
બહુપુત્રસ્ય વિદુષશ્ચતસ્રો વિદ્યુતઃ સ્મૃતાઃ ॥ ૧૧॥

કૃશાશ્વસ્ય તુ દેવર્ષે દેવપ્રહરણાઃ સ્મૃતાઃ ।
ભાર્મ્યાયામર્ચિષિ મુને ધૂમ્રકેશસ્તથૈવ ચ ॥ ૧૨॥

સ્વધા સતી ચ દ્વે પત્ન્યૌ સ્વધા જ્યેષ્ઠા સતી પરા ।
સ્વધાસૂત પિતૄન્ વેદમથર્વાઙ્ગિરસં સતી ॥ ૧૩॥

એતે યુગસહસ્રાન્તે જાયન્તે પુનરેવ હિ ।
સર્વદેવનિકાયાશ્ચ ત્રયસ્ત્રિંશત્તુ કામજાઃ ॥ ૧૪॥

યથા સૂર્યસ્ય નિત્યં હિ ઉદયાસ્તમયાવિહ ।
એવં દેવાનિકાસ્તે ચ સમ્ભવન્તિ યુગે યુગે ॥ ૧૫॥

દિત્યાં બભૂવતુઃ પુત્રૌ કશ્યપાદિતિ નઃ શ્રુતમ્ ।
હિરણ્યકશિપુશ્ચૈવ હિરણ્યાક્ષશ્ચ વીર્યવાન્ ॥ ૧૬॥

સિંહિકા હ્યભવત્કન્યા વિપ્રચિત્તેઃ પરિગ્રહઃ ।
હિરણ્યકશિપોઃ પુત્રાશ્ચત્વારઃ પ્રથિતૌજસઃ ॥ ૧૭॥

અનુહ્રાદશ્ચ હ્રાદશ્ચ સંહ્રાદશ્ચૈવ વીર્યવાન્ ।
પ્રહ્રાદશ્ચાનુજસ્તત્ર વિષ્ણુભક્તિવિચારધીઃ ॥ ૧૮॥

અનુહ્રાદસ્ય સૂર્યાયાં પુલોમા મહિષસ્તથા ।
હ્રાદસ્ય ધમનિર્ભાર્યાસૂત વાતાપિમિલ્વલમ્ ॥ ૧૯॥

સંહ્રાદસ્ય કૃતિર્ભાર્યાસૂત પઞ્ચજનં તતઃ ।
વિરોચનસ્તુ પ્રાહ્રાદિર્દેવ્યાં તસ્યાભવદ્ બલિઃ ॥ ૫.૩૨.૨૦॥

બલેઃ પુત્રશતં ત્વાસીદશનાયાં મુનીશ્વર ।
બલિરાસીન્મહાશૈવઃ શિવભક્તિપરાયણઃ ॥ ૨૧॥

દાનશીલ ઉદારશ્ચ પુણ્યકીર્તિતપાઃ સ્મૃતઃ ।
તત્પુત્રો બાણનામા યઃ સોઽપિ શૈવવરઃ સુધીઃ ।
યઃ સન્તોષ્ય શિવં સમ્યગ્ગાણપત્યમવાપ હ ॥ ૨૨॥

સા કથા શ્રુતપૂર્વા તે બાણસ્ય હિ મહાત્મનઃ ।
કૃષ્ણં યઃ સમરે વીરઃ સુપ્રસન્નં ચકાર હ ॥ ૨૩॥

હિરણ્યાક્ષસુતાઃ પઞ્ચ પણ્ડિતાઃ સુમહાબલાઃ ।
કુકુરઃ શકુનિશ્ચૈવ ભૂતસન્તાપનસ્તથા ॥ ૨૪॥

મહાનાદશ્ચ વિક્રાન્તઃ કાલનાભસ્તથૈવ ચ ।
ઇત્યુક્તા દિતિપુત્રાશ્ચ દનોઃ પુત્રાન્ મુને શ‍ૃણુ ॥ ૨૫॥

અભવન્દનુપુત્રાશ્ચ શતં તીવ્રપરાક્રમાઃ ।
અયોમુખઃ શમ્બરશ્ચ કપોલો વામનસ્તથા ॥ ૨૬॥

વૈશ્વાનરઃ પુલોમા ચ વિદ્રાવણમહાશિરૌ ।
સ્વર્ભાનુર્વૃષપર્વા ચ વિપ્રચિત્તિશ્ચ વીર્યવાન્ ॥ ૨૭॥

એતે સર્વે દનોઃ પુત્રાઃ કશ્યપાદનુજજ્ઞિરે ।
એષાં પુત્રીઃ શ‍ૃણુ મુને પ્રસઙ્ગાદ્વચ્મિ તેઽનઘ ॥ ૨૮॥

સ્વભાર્નોસ્તુ પ્રભા કન્યા પુલોમ્નસ્તુ શચી સુતા ।
ઉપદાનવી હયશિરા શર્મિષ્ઠા વાર્ષપર્વણી ॥ ૨૯॥

પુલોમિકા પુલોમા ચ વૈશ્વાનરસુતે ઉભે ।
બહ્વપત્યે મહાવીર્યે મારીચેસ્તુ પરિગ્રહા ત્ ॥ ૫.૩૨.૩૦॥

તયોઃ પુત્રસહસ્રાણિ ષષ્ટિર્દાનવનન્દનાઃ ।
મરીચિર્જનયામાસ મહતા તપસાન્વિતાઃ ॥ ૩૧॥

પૌલોમાઃ કાલખઞ્જાશ્ચ દાનવાનાં મહાબલાઃ ।
અવધ્યા દેવતાનાં ચ હિરણ્યપુરવાસિનઃ ॥ ૩૨॥

પિતામહપ્રસાદેન યે હતાઃ સવ્યસાચિના ।
સિંહિકાયામથોત્પન્ના વિપ્રચિત્તેઃ સુતાસ્તથા ॥ ૩૩॥

દૈત્યદાનવસંયોગાજ્જાતાસ્તીવ્રપરાક્રમાઃ ।
સૈંહિકેયા ઇતિ ખ્યાતાસ્ત્રયોદશ મહાબલાઃ ॥ ૩૪॥

રાહુઃ શલ્યો સુબલિનો બલશ્ચૈવ મહાબલઃ ।
વાતાપિર્નમુચિશ્ચૈવાથેલ્વલઃ સ્વસૃપસ્તથા ॥ ૩૫॥

અજિકો નરકશ્ચૈવ કાલનાભસ્તથૈવ ચ ।
શરમાણઃ શરઃ કલ્પ એતે વંશવિવર્ધનાઃ ॥ ૩૬॥

એષાં પુત્રાશ્ચ પૌત્રાશ્ચ દનુવંશવિવર્દ્ધનાઃ ।

બહવશ્ચ સમુદ્ભૂતા વિસ્તરત્વાન્ન વર્ણિતાઃ ॥ ૩૭॥

સંહ્રાદસ્ય તુ દૈતેયા નિવાતકવચાઃ કુલે ।
ઉત્પન્ના મરુતસ્તસ્મિંસ્તપસા ભાવિતાત્મનઃ ॥ ૩૮॥

ષણ્મુખાદ્યા મહાસત્ત્વાસ્તામ્રાયાઃ પરિકીર્તિતાઃ ।
કાકી શ્યેની ચ ભાસી ચ સુગ્રીવી ચ શુકી તથા ॥ ૩૯॥

ગૃધ્રિકાશ્વી હ્યુલૂકી ચ તામ્રાકન્યાઃ પ્રકીર્તિતાઃ ।
કાકી કાકાનજનયદુલૂકી પ્રત્યુલૂકકાન્ ॥ ૫.૩૨.૪૦॥

શ્યેની શ્યેનાંસ્તથા ભાસી ભાસાન્ગૃધ્રી તુ ગૃધ્રકાન્ ।
શુકી શુકાનજનયત્સુગ્રીવી શુભપક્ષિણઃ ॥ ૪૧॥

અશ્વાનુષ્ટ્રાન્ ગર્દભાંશ્ચ તામ્રા ચ કશ્યપપ્રિયા ।
જનયામાસ ચેત્યેવં તામ્રાવંશઃ પ્રકીર્તિતઃ ॥ ૪૨॥

વિનતાયાશ્ચ પુત્રૌ દ્વાવરુણો ગરુડસ્તથા ।
સુપર્ણઃ પતતાં શ્રેષ્ઠો દારુણઃ સ્વેન કર્મણા ॥ ૪૩॥

સુરસાયાઃ સહસ્રં તુ સર્પાણામમિતૌજસામ્ ।
અનેકશિરસાં તેષાં ખેચરાણાં મહાત્મનામ્ ॥ ૪૪॥

યેષાં પ્રધાના રાજાનઃ શેષવાસુકિતક્ષકાઃ ।
ઐરાવતો મહાપદ્મઃ કમ્બલાશ્વતરાવુભૌ ॥ ૪૫॥

ઐલાપત્રસ્તથા પદ્મઃ કર્કોટકધનઞ્જયૌ ।
મહાનીલમહાકર્ણૌ ધૃતરાષ્ટ્રો બલાહકઃ ॥ ૪૬॥

કુહરઃ પુષ્પદન્તશ્ચ દુર્મુખઃ સુમુખસ્તથા ।
બહુશઃ ખરરોમા ચ પાણિરિત્યેવમાદયઃ ॥ ૪૭॥

ગણાઃ ક્રોધવશાયાશ્ચ તસ્યાઃ સર્વે ચ દંષ્ટ્રિણઃ ।
અણ્ડજાઃ પક્ષિણોઽબ્જાશ્ચ વરાહ્યાઃ પશવો મતાઃ ॥ ૪૮॥

અનાયુષાયાઃ પુત્રાશ્ચ પઞ્ચાશચ્ચ મહાબલાઃ ।
અભવન્બલવૃક્ષૌ ચ વિક્ષરોઽથ બૃહંસ્તથા ॥ ૪૯॥

શશાંસ્તુ જનયામાસ સુરરભિર્મહિષાંસ્તથા ।
ઇલા વૃક્ષાઁલ્લતા વલ્લીસ્તૃણજાતીસ્તુ સર્વશઃ ॥ ૫.૩૨.૫૦॥

ખશા તુ યક્ષરક્ષાંસિ મુનિરપ્સરસસ્તથા ।
અરિષ્ટાસૂત સર્પાંશ્ચ પ્રભા વૈ માનવોત્તમાન્ ॥ ૫૧॥

એતે કશ્યપદાયાદાઃ કીર્તિતાસ્તે મુનીશ્વર ।
યેષાં પુત્રાશ્ચ પૌત્રાશ્ચ શતશોઽથ સહસ્રશઃ ॥ ૫૨॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં કશ્યપવંશવર્ણનં નામ દ્વાત્રિંશોઽધ્યાયઃ ॥ ૫.૩૨॥

૫.૩૩
॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૩૩. ત્રયસ્ત્રિંશત્તમોઽધ્યાયઃ । કશ્યપવંશવર્ણનમ્ ૨ ।

સૂત ઉવાચ ।
એષ મન્વન્તરે તાત સર્ગઃ સ્વારોચિષે સ્મૃતઃ ।
વૈવસ્વતે તુ મહતિ વારુણે વિત તે ક્રતૌ ॥ ૧॥

જુહ્વાનસ્ય બ્રહ્મણો વૈ પ્રજાસર્ગ ઇહોચ્યતે ।
પૂર્વં યાનથ બ્રહ્મર્ષીનુત્પન્નાન્ સપ્ત માનસાન્ ॥ ૨॥

પુત્રાન્વૈ કલ્પયામાસ સ્વયમેવ પિતામહઃ ।
તેષાં વિરોધો દેવાનાં દાનવાનાં મહાઋષે ॥ ૩॥

દિતિર્વિનષ્ટપુત્રા તુ કશ્યપં સમુપસ્થિતા ।
સ કશ્યપઃ પ્રસન્નાત્મા સમ્ગયગારાધિતસ્તયા ॥ ૪॥

વરેણચ્છન્દયામાસ સા ચ વવ્રે વરં તદા ।
પુત્રમિન્દ્રવધાર્થાય સમર્થમમિતૌજસમ્ ॥ ૫॥

સ તસ્યૈ ચ વરં પ્રાદાત્પ્રાર્થિતં સુમહાતપાઃ ।
બ્રહ્મચર્ય્યાદિનિયમં પ્રાહ ચૈવ શતં સમાઃ ॥ ૬॥

ધારયામાસ ગર્ભં તુ શુચિઃ સા વરવર્ણિની ।
બ્રહ્મચર્ય્યાદિનિયમં દિતિર્દધ્રે તથૈવ વૈ ॥ ૭॥

તતસ્ત્વાધાય સો દિત્યાં ગર્ભં તં શંસિતવ્રતઃ ।
જગામ કશ્યપસ્તમું તપઃ સંહૃષ્ટમાનસઃ ॥ ૮॥

તસ્યાશ્ચૈવાન્તરં પ્રેપ્સુઃ સોઽભવત્પાકશાસનઃ ।
ઊનવર્ષે શતે ચાસ્યા દદર્શાન્તરમેવ સઃ ॥ ૯॥

અકૃત્વા પાદયોઃ શૌચં દિતિર્વાક્ષિરાસ્તદા ।
નિદ્રામાહારયામાસ ભાવિનોઽર્થસ્ય ગૌરવાત્ ॥ ૫.૩૩.૧૦॥

એતસ્મિન્નન્તરે શક્રસ્તસ્યાઃ કુક્ષિં પ્રવિશ્ય સઃ ।
વજ્રપાણિસ્તુ તં ગર્ભં સપ્તધા હિ ન્યકૃન્તત ॥ ૧૧॥

સ પાટ્યમાનો ગર્ભોઽથ વજ્રેણ પ્રરુરોદ હ ।
રુદન્તં સપ્તધૈકૈકં મા રોદીરિતિ તાન્પુનઃ ।
ચકર્ત વજ્રપાણિસ્તાન્નેવ મમ્રુસ્તથાપિ તે ॥ ૧૨॥

તે તમૂચુઃ પાટ્યમાનાઃ સર્વે પ્રાઞ્જલયો મુને ।
નો જિઘાંસસિ કિં શક્ર ભ્રાતરો મરુતસ્તવ ॥ ૧૩॥

ઇન્દ્રેણ સ્વીકૃતાસ્તે હિ ભ્રાતૃત્વે સર્વ એવ ચ ।
તત્યજુર્દૈત્યભાવં તે વિપ્રર્ષે શઙ્કરેચ્છયા ॥ ૧૪॥

મરુતો નામ તે દેવા બભૂવુઃ સુમહાબલાઃ ।
ખગા એકોનપઞ્ચાશત્સહાયા વજ્રપાણિનઃ ॥ ૧૫॥

તેષામેવ પ્રવૃદ્ધાનાં હરિઃ પ્રાદાત્પ્રજાપતિઃ ।
ક્રમશસ્તાનિ રાજ્યાનિ પૃથુપૂર્વં શ‍ૃણુષ્વ તત્ ॥ ૧૬॥

અરિષ્ટઃ પુરુષો વીરઃ કૃષ્ણો જિષ્ણુઃ પ્રજાપતિઃ ।
પર્જન્યસ્તુ ધનાધ્યક્ષસ્તસ્ય સર્વમિદં જગત્ ॥ ૧૭॥

ભૂતસર્ગમિમં સમ્યગવોચં તે મહામુને ।
વિભાગં શ‍ૃણુ રાજ્યાનાં ક્રમશસ્તં બ્રુવેઽધુના ॥ ૧૮॥

અભિષિચ્યાધિરાજ્યે તુ પૃથું વૈન્યં પિતામહઃ ।
તતઃ ક્રમેણ રાજ્યાનિ વ્યાદેષ્ટુમુપચક્રમે ॥ ૧૯॥

દ્વિજાનાં વીરુધાં ચૈવ નક્ષત્રગ્રહયોસ્તથા ।
યજ્ઞાનાં તપસાં ચૈવ સોમં રાજ્યેઽભ્યષેચયત્ ॥ ૫.૩૩.૨૦॥

અપાં તુ વરુણં રાજ્યે રાજ્ઞાં વૈશ્રવણં પ્રભુમ્ ।
આદિત્યાનાં તથા વિષ્ણું વસૂનામથ પાવકમ્ ॥ ૨૧॥

પ્રજાપતીનાં દક્ષં તુ મરુતામથ વાસવમ્ ।

દૈત્યાનાં દાનવાનાં ચ પ્રહ્લાદમમિતૌજસમ્ ॥ ૨૨॥

વૈવસ્વતં પિતૃણાં ચ યમં રાજ્યેઽભ્યષેચયત્ ।
માતૃણાં ચ વ્રતાનાં ચ મન્ત્રાણાં ચ તથા ગવામ્ ॥ ૨૩॥

યક્ષાણાં રાક્ષસાનાં ચ પાર્થિવાનાં તથૈવ ચ ।
સર્વભૂતપિશાચાનાં ગિરિશં શૂલપાણિનમ્ ॥ ૨૪॥

શૈલાનાં હિમવન્તં ચ નદીનામથ સાગરમ્ ।
મૃગાણામથ શાર્દૂલં ગોવૃષં તુ ગવામપિ ॥ ૨૫॥

વનસ્પતીનાં વૃક્ષાણાં વટં રાજ્યેઽભ્યષેચયત્ ।
ઇતિ દત્તં પ્રજેશેન રાજ્યં સર્વત્ર વૈ ક્રમાત્ ॥ ૨૬॥

પૂર્વસ્યાં દિશિ પુત્રં તુ વૈરાજસ્ય પ્રજાપતેઃ ।
સ્થાપયામાસ સર્વાત્મા રાજ્યે વિશ્વપતિર્વિભુઃ ॥ ૨૭॥

તથૈવ મુનિશાર્દૂલ કર્દમસ્ય પ્રજાપતેઃ ।
દક્ષિણસ્યાં તથા પુત્રં સુધન્વાનમચીક્લૃપત્ ॥ ૨૮॥

પશ્ચિમાયાં દિશિ તથા રજસઃ પુત્રમચ્યુતમ્ ।
કેતુમન્તં મહાત્માનં રાજાનં વ્યાદિશત્પ્રભુઃ ॥ ૨૯॥

તથા હિરણ્યરોમાણં પર્જન્યસ્ય પ્રજાપતેઃ ।
ઉદીચ્યાં દિશિ રાજાનં દુર્ધર્ષં સોઽભ્યષેચયત્ ॥ ૫.૩૩.૩૦॥

તસ્ય વિસ્તારમાખ્યાતં પૃથોર્વૈન્યસ્ય શૌનક ।
મહર્ધ્યૈ તદધિષ્ઠાનં પુરાણં પરિકીર્તિતમ્ ॥ ૩૧॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં કશ્યપવંશવર્ણનં નામ ત્રયસ્ત્રિંશત્તમોઽધ્યાયઃ ॥ ૫.૩૩॥

૫.૩૪
॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૩૪. ચતુસ્ત્રિંશોઽધ્યાયઃ । સર્વમન્વતરાનુર્કાર્તનમ્ ।

શૌનક ઉવાચ ।
મન્વન્તરાણિ સર્વાણિ વિસ્તરેણાનુકીર્તય ।

યાવન્તો મનવશ્ચૈવ શ્રોતુમિચ્છામિ તાનહમ્ ॥ ૧॥

સૂત ઉવાચ ।
સ્વાયમ્ભુવો મનુશ્ચૈવ તતઃ સ્વારોચિષસ્તથા ।
ઉત્તમસ્તામસશ્ચૈવ રૈવતશ્ચાક્ષુષસ્તથા ॥ ૨॥

એતે ચ મનવઃ ષટ્ તે સમ્પ્રોક્તા મુનિપુઙ્ગવ ।
વૈવસ્વતો મુનિશ્રેષ્ઠ સામ્પ્રતં મનુરુચ્યતે ॥ ૩॥

સાવર્ણિશ્ચ મનુશ્ચૈવ તતો રૌચ્યસ્તથા પરઃ ।
તથૈવ બ્રહ્મસાવર્ણિશ્ચત્વારો મનવસ્તથા ॥ ૪॥

તથૈવ ધર્મસાવર્ણી રુદ્રસાવર્ણિરેવ ચ ।
દેવસાવર્ણિરાખ્યાત ઇન્દ્રસાવર્ણિરેવ ચ ॥ ૫॥

અતીતા વર્તમાનાશ્ચ તથૈવાનાગતાશ્ચ યે ।
કીર્તિતા મનવશ્ચાપિ મયૈવૈતે યથા શ્રુતાઃ ॥ ૬॥

મુને ચતુર્દશૈતાનિ ત્રિકાલાનુગતાનિ તે ।
પ્રોક્તાનિ નિર્મિતઃ કલ્પો યુગસાહસ્રપર્યયઃ ॥ ૭॥

ઋષીંસ્તેષાં પ્રવક્ષ્યામિ પુત્રાન્ દેવગણાંસ્તથા ।
શ઼ૃણુ શૌનક સુપ્રીત્યા ક્રમશસ્તાન્યશસ્વિનઃ ॥ ૮॥

મરીચિરત્રિર્ભગવાનઙ્ગિરાઃ પુલહઃ ક્રતુઃ ।
પુલસ્ત્યશ્ચ વસિષ્ઠશ્ચ સપ્તૈતે બ્રહ્મણઃ સુતાઃ ॥ ૯॥

ઉત્તરસ્યાં દિશિ તથા મુને સપ્તર્ષયસ્તથા ।
યામા નામ તથા દેવા આસન્સ્વાયમ્ભુવેઽન્તરે ॥ ૫.૩૪.૧૦॥

આગ્નીધ્રશ્ચાગ્નિબાહુશ્ચ મેધા મેધાતિથિર્વસુઃ ।
જ્યોતિષ્માન્ધૃતિમાન્હવ્યઃ સવનઃ શુભ્ર એવ ચ ॥ ૧૧॥

સ્વાયમ્ભુવસ્ય પુત્રાસ્તે મનોર્દશ મહાત્મનઃ ।
કીર્તિતા મુનિશાર્દૂલ તત્રેન્દ્રો યજ્ઞ ઉચ્યતે ॥ ૧૨॥

પ્રથમં કથિતં તાત દિવ્યં મન્વતરં તથા ।
દ્વિતીયં તે પ્રવક્ષ્યામિ તન્નિબોધ યથાતથમ્ ॥ ૧૩॥

ઊર્જસ્તમ્ભઃ પરસ્તમ્ભ ઋષભો વસુમાંસ્તથા ।
જ્યોતિષ્માન્ દ્યુતિમાંશ્ચૈવ રોચિષ્માન્ સપ્તમસ્તથા ॥ ૧૪॥

એતે મહર્ષયો જ્ઞેયાસ્તત્રેન્દ્રો રોચનસ્તથા ।
દેવાશ્ચ તુષિતા નામ સ્મૃતાઃ સ્વારોચિષેંઽતરે ॥ ૧૫॥

હરિઘ્નઃ સુકૃતિર્જ્યોતિરયોમૂર્તિરયસ્મયઃ ।
પ્રથિતશ્ચ મનસ્યુશ્ચ નભઃ સૂર્યસ્તથૈવ ચ ॥ ૧૬॥

સ્વારોચિષસ્ય પુત્રાસ્તે મનોર્દશ મહાત્મનઃ ।
કીર્તિતા મુનિશાર્દૂલ મહાવીર્યપરાક્રમાઃ ॥ ૧૭॥

દ્વિતીયમેતત્કથિતં મુને મન્વન્તરં મયા ।
તૃતીયં તવ વક્ષ્યામિ તન્નિબોધ યથાતથમ્ ॥ ૧૮॥

વસિષ્ઠપુત્રાઃ સપ્તાસન્વાસિષ્ઠા ઇતિ વિશ્રુતાઃ ।
હિરણ્યગર્ભસ્ય સુતા ઊર્જા નામ મહૌજસઃ ॥ ૧૯॥

ઋષયોઽત્ર સમાખ્યાતાઃ કીર્ત્યમાનાન્નિબોધ મે ।
ઔત્તમેયા ઋષિશ્રેષ્ઠ દશ પુત્રા મનોઃ સ્મૃતાઃ ॥ ૫.૩૪.૨૦॥

ઇષ ઊર્જિત ઊર્જશ્ચ મધુર્માધવ એવ ચ ।
શુચિઃ શુક્રવહશ્ચૈવ નભસો નભ એવ ચ ॥ ૨૧॥

ઋષભસ્તત્ર દેવાશ્ચ સત્યવેદશ્રુતાદયઃ ।
તત્રેન્દ્રઃ સત્યજિન્નામ ત્રૈલોક્યાધિપતિર્મુને ॥ ૨૨॥

તૃતીયમેતત્પરમં મન્વતરમુદાહૃતમ્ ।
મન્વતરં ચતુર્થં તે કથયામિ મુને શ ૃણુ ॥ ૨૩॥

ગાર્ગ્યઃ પૃથુસ્તથા વાગ્મી જયો ધાતા કપીનકઃ ।
કપીવાન્ સપ્ત ઋષયઃ સત્યા દેવગણાસ્તથા ॥ ૨૪॥

તત્રેન્દ્રસ્ત્રિશિખો જ્ઞેયો મનુપુત્રાન્મુને શ ૃણુ ।
દ્યૂતિપોતઃ સૌતપસ્યસ્તપઃ શૂલશ્ચ તાપનઃ ॥ ૨૫॥

તપોરતિરકલ્માષો ધન્વી ખડ્ગી મહાનૃષિઃ ।
તામસસ્ય સ્મૃતા એતે દશ પુત્રા મહાવ્રતાઃ ॥ ૨૬॥

તામસસ્યાન્તરં ચૈવ મનોર્મે કથિતં તવ ।
ચતુર્થં પઞ્ચમં તાત શ ૃણુ મન્વન્તરં પરમ્ ॥ ૨૭॥

દેવબાહુર્જયશ્ચૈવ મુનિર્વેદશિરાસ્તથા ।

હિરણ્યરોમા પર્જન્ય ઊર્ધ્વબાહુશ્ચ સોમપાઃ ॥ ૨૮॥

સત્યનેત્રરતાશ્ચાન્યે એતે સપ્તર્ષયોઽપરે ।
દેવાશ્ચ ભૂતરજસસ્તપઃપ્રકૃતયસ્તથા ॥ ૨૯॥

તત્રેન્દ્રો વિભુનામા ચ ત્રૈલોક્યાધિપતિસ્તથા ।
રૈવતાખ્યો મનુસ્તત્ર જ્ઞેયસ્તામસસોદરઃ ॥ ૫.૩૪.૩૦॥

અર્જુનઃ પઙ્ક્તિવિન્ધ્યો વા દયાયાસ્તનયામુને ।
મહતા તપસા યુક્તા મેરુપૃષ્ઠે વસન્તિ હિ ॥ ૩૧॥

રુચેઃ પ્રજાપતિઃ પુત્રો રૌચ્યો નામ મનુઃ સ્મૃતઃ ।
ભૂત્યા ચોત્પાદિતો દેવ્યાં ભૌત્યો નામાભવત્સુતઃ ॥ ૩૨॥

અનાગતાશ્ચ સપ્તૈતે કલ્પેઽસ્મિન્ મનવઃ સ્મૃતાઃ ।
અનાગતાશ્ચ સપ્તૈવ સ્મૃતા દિવિ મહર્ષયઃ ॥ ૩૩॥

કશ્યપોઽત્રિર્વસિષ્ટશ્ચ વિશ્વામિત્રોઽથ ગૌતમઃ ।
જમદગ્નીભરદ્વાજઃ સત્રૈતે ઋષ્યઃ સ્મૃતાઃ ॥ ૩૪॥

રામો વ્યાસસ્તથાત્રેયો દીપ્તિમાન્સુબહુશ્રુતઃ ।
ભરદ્વાજસ્તથા દ્રૌણિરશ્વત્થામા મહાદ્યુતિઃ ॥ ૩૫॥

ગૌતમસ્યાત્મજશ્ચૈવ શરદ્વાન્ ગૌતમઃ કૃપઃ ।
કૌશિકો ગાલવશ્ચૈવ રુરુઃ કશ્યપ એવ ચ ॥ ૩૬॥

એતે સપ્ત મહાત્માનો ભવિષ્યા મુનિસત્તમાઃ ।
દેવાશ્ચાનાગતાસ્તત્ર ત્રયઃ પ્રોક્તાઃ સ્વયમ્ભુવા ॥ ૩૭॥

મારીચેશ્ચૈવ પુત્રાસ્તે કશ્યપસ્ય મહાત્મનઃ ।
તેષાં વિરોચનસુતો બલિરિન્દ્રો ભવિષ્યતિ ॥ ૩૮॥

વિષાંઙ્ગશ્ચાવનીવાંશ્ચ સુમન્તો ધૃતિમાન્વસુઃ ।
સૂરિઃ સુરાખ્યો વિષ્ણુશ્ચ રાજા સુમતિરેવ ચ ॥ ૩૯॥

સાવર્ણેશ્ચ મનોઃ પુત્રા ભવિષ્યા દશ શૌનક ।
ઇહાષ્ટમં હિ કથિતં નવમં ચાન્તરં શ‍ૃણુ ॥ ૫.૩૪.૪૦॥

પ્રથમં દક્ષસાવર્ણિં પ્રવક્ષ્યામિ મનું શ‍ૃણુ ।
મેધાતિથિશ્ચ પૌલસ્ત્યો વસુઃ કશ્યપ એવ ચ ॥ ૪૧॥

જ્યોતિષ્માન્ ભાર્ગવશ્ચૈવ ધૃતિમાનઙ્ગિરાસ્તથા ।
સવનશ્ચૈવ વાસિષ્ઠ આત્રેયો હવ્ય એવ ચ ॥ ૪૨॥

પુલહઃ સપ્ત ઇત્યેતે ઋષયો રૌહિતેઽન્તરે ।
દેવતાનાં ગણાસ્તત્ર ત્રય એવ મહામુને ॥ ૪૩॥

દક્ષપુત્રસ્ય પુત્રાસ્તે રોહિતસ્ય પ્રજાપતેઃ ।
ધૃષ્ટકેતુર્દીપ્તકેતુઃ પઞ્ચહસ્તો નિરાકૃતિઃ ॥ ૪૪॥

પૃથુશ્રવા ભૂરિદ્યુમ્નો ઋચીકો બૃહતો ગયઃ ।
પ્રથમસ્ય તુ સાવર્ણેર્નવ પુત્રા મહૌજસઃ ॥ ૪૫॥

દશમે ત્વથ પર્યાયે દ્વિતીયસ્યાન્તરે મનોઃ ।
હવિષ્માન્ પૌલહશ્ચૈવ પ્રકૃતિશ્ચૈવ ભાર્ગવઃ ॥ ૪૬॥

આપોમુક્તિસ્તથાત્રેયો વાસિષ્ઠશ્ચાવ્યયઃ સ્મૃતઃ ।
પૌલસ્ત્યઃ પ્રયતિશ્ચૈવ ભામારશ્ચૈવ કાશ્યપઃ ॥ ૪૭॥

અઙ્ગિરાનેનસઃ સત્યઃ સપ્તૈતે પરમર્ષયઃ ।
દેવતાનાં ગણાશ્ચાપિ દ્વિષિમન્તશ્ચ યે સ્મૃતાઃ ॥ ૪૮॥

તેષામિન્દ્રઃ સ્મૃતઃ શમ્ભુસ્ત્વયમેવ મહેશ્વરઃ ।
અક્ષત્વાનુત્તમૌજાશ્ચ ભૂરિષેણશ્ચ વીર્યવાન્ ॥ ૪૯॥

શતાનીકો નિરામિત્રો વૃષસેનો જયદ્રથઃ ।
ભૂરિદ્યુમ્નઃ સુવર્ચાર્ચિર્દશ ત્વેતે મનોઃ સુતાઃ ॥ ૫.૩૪.૫૦॥

એકાદશે તુ પર્યાયે તૃતીયસ્યાન્તરે મનોઃ ।
તસ્યાપિ સપ્ત ઋષયઃ કીર્ત્યમાનાન્નિબોધ મે ॥ ૫૧॥

હવિષ્માન્ કશ્યપશ્ચાપિ વપુષ્માંશ્ચૈવ વારુણઃ ।
આત્રેયોઽથ વસિષ્ઠશ્ચ હ્યનયસ્ત્વઙ્ગિરાસ્તથા ॥ ૫૨॥

ચારુધૃષ્યશ્ચ પૌલસ્ત્યો નિઃસ્વરોઽગ્નિસ્તુ તૈજસઃ ।
સપ્તૈતે ઋષયઃ પ્રોક્તાસ્ત્રયો દેવગણાઃ સ્મૃતાઃ ॥ ૫૩॥

બ્રહ્મણસ્તુ સુતાસ્તે હિ ત ઇમે વૈધૃતાઃ સ્મૃતાઃ ।
સર્વગશ્ચ સુશર્મા ચ દેવાનીકસ્તુ ક્ષેમકઃ ॥ ૫૪॥

દૃઢેષુઃ ખણ્ડકો દર્શઃ કુહુર્બાહુર્મનોઃ સ્મૃતાઃ ।
સાવર્ણસ્ય તુ પુત્રા વૈ તૃતીયસ્ય નવ સ્મૃતાઃ ॥ ૫૫॥

ચતુર્થસ્ય તુ સાવર્ણેરૃષીન્સપ્ત નિબોધ મે ।
દ્યુતિર્વસિષ્ઠપુત્રશ્ચ આત્રેયઃ સુતપાસ્તથા ॥ ૫૬॥

અઙ્ગિરાસ્તપસો મૂર્તિસ્તપસ્વી કશ્યપસ્તથા ।
તપોધનશ્ચ પૌલસ્ત્યઃ પુલહશ્ચ તપોરતિઃ ॥ ૫૭॥

ભાર્ગવઃ સપ્તમસ્તેષાં વિજ્ઞેયઃ તપસો નિધિઃ ।
પઞ્ચ દેવગણાઃ પ્રોક્તા માનસા બ્રહ્મણઃ સુતાઃ ॥ ૫૮॥

ઋતધામા તદિન્દ્રો હિ ત્રિલોકી રાજ્યકૃત્સુખી ।
દ્વાદશે ચૈવ પર્યાયે ભાવ્યે રૌચ્યાન્તરે મુને ॥ ૫૯॥

અઙ્ગિરાશ્ચૈવ ધૃતિમાન્ પૌલસ્ત્યો હવ્યવાંસ્તુ યઃ ।
પૌલહસ્તત્ત્વદર્શી ચ ભાર્ગવશ્ચ નિરુત્સવઃ ॥ ૫.૩૪.૬૦॥

નિષ્પ્રપઞ્ચસ્તથાત્રેયો નિર્દેહઃ કશ્યપસ્તથા ।
સુતપાશ્ચૈવ વાસિષ્ઠઃ સપ્તૈવૈતે મહર્ષયઃ ॥ ૬૧॥

ત્રય એવ ગણાઃ પ્રોક્તા દેવતાનાં સ્વયમ્ભુવા ।
દિવસ્પતિસ્તમિન્દ્રો વૈ વિચિત્રશ્ચિત્ર એવ ચ ॥ ૬૨॥

નયો ધર્મો ધૃતોન્ધ્રશ્ચ સુનેત્રઃ ક્ષત્રવૃદ્ધકઃ ।
નિર્ભયઃ સુતપા દ્રોણો મનો રૌચ્યસ્ય તે સુતાઃ ॥ ૬૩॥

મનુસ્ત્રયોદશો ભાવ્યો દેવસાવર્ણિરાત્મવાન્
ચિત્રસેનવિચિત્રાદ્યા દેવસાવર્ણિદેહજાઃ ॥ ૬૪॥

દેવાઃ સુકર્મસુત્રામસંજ્ઞા ઇન્દ્રો દિવસ્પતિઃ
નિર્મોકતત્ત્વદર્શાદ્યા ભવિષ્યન્ત્યુષયસ્તદા ॥ ૬૫॥

ચતુર્દશે તુ પર્યાયે ભૌત્યસ્યૈવાન્તરે મનોઃ ।
આગ્નીધ્રઃ કાશ્યપશ્ચૈવ પૌલસ્ત્યો માગધશ્ચ યઃ ॥ ૬૬॥

ભાર્ગવોઽપ્યતિવાહ્યશ્ચ શુચિરાઙ્ગિરસસ્તથા ।
યુક્તશ્ચૈવ તથાત્રેયઃ શુક્રો વાશિષ્ઠ એવ ચ ॥ ૬૭॥

અજિતઃ પુલહશ્ચૈવ હ્યન્ત્યાઃ સપ્તર્ષયશ્ચ તે ।
પવિત્રાશ્ચાક્ષુષા દેવાઃ શુચિરિન્દ્રો ભવિષ્યતિ ॥ ૬૮॥

એતેષાં કલ્ય ઉત્થાય કીર્તનાત્સુખમેધતે ।

અતીતાનાગતાનાં વૈ મહર્ષીણાં નરૈઃ સદા ॥ ૬૯॥

દેવતાનાં ગણાઃ પ્રોક્તાઃ શ‍ૃણુ પઞ્ચ મહામુને ।
તુરઙ્ગભીરુર્બુધ્નશ્ચ તનુગ્રોઽનુગ્ર એવ ચ ॥ ૫.૩૪.૭૦॥

અતિમાની પ્રવીણશ્ચ વિષ્ણુઃ સઙ્ક્રન્દનસ્તથા ।
તેજસ્વી સબલશ્ચૈવ ભૌત્યસ્ત્વેતે મનોઃ સુતા ॥ ૭૧॥

ભૌમસ્યૈવાધિકારે વૈ પૂર્ણે કલ્પસ્તુ પૂર્યતે ।
ઇત્યેતેઽનાગતાતીતા મનવઃ કીર્તિતા મયા ॥ ૭૨॥

ઉક્તાઃ સનત્કુમારેણ વ્યાસાયામિતતેજસા ।
પૂર્ણે યુગસહસ્રાન્તે પરિપાલ્ય સ્વધર્મતઃ ॥ ૭૩॥

પ્રજાભિસ્તપસા યુક્તા બ્રહ્મલોકં વ્રજન્તિ તે ।
યુગાનિ સપ્રતિસ્ત્વેકં સાગ્રાણ્યન્તરમુચ્યતે ॥ ૭૪॥

ચતુર્દશૈતે મનવઃ કીર્તિતાઃ કીર્તિવર્ધનાઃ ।
મન્વન્તરેષુ સર્વેષુ સંહારાન્તે પુનર્ભવઃ ॥ ૭૫॥

ન શક્યમન્તરં તેષાં વક્તું વર્ષશતૈરપિ ।
પૂર્ણે શતસહસ્રે તુ કલ્પો નિઃશેષ ઉચ્યતે ॥ ૭૬॥

તત્ર સર્વાણિ ભૂતાનિ દગ્ધાન્યાદિત્યરશ્મિભિઃ ।
બ્રહ્માણમગ્રતઃ કૃત્વા સદાદિત્યગણૈર્મુને ॥ ૭૭॥

પ્રવિશન્તિ સુરશ્રેષ્ઠ હરિં નારાયણં પરમ્ ।
સ્રષ્ટારં સર્વભૂતાનાં કલ્પાન્તેષુ પુનઃપુનઃ ॥ ૭૮॥

ભૂયોઽપિ ભગવાન્ રુદ્રઃ સંહર્તા કાલ એવ હિ ।
કલ્પાન્તે તત્પ્રવક્ષ્યામિ મનોર્વૈવસ્વતસ્ય વૈ ॥ ૭૧॥

ઇતિ તે કથિતં સર્વં મન્વન્તરસમુદ્ભવમ્ ।
વિસર્ગં પુણ્યમાખ્યાનં ધન્યં કુલવિવર્દ્ધનમ્ ॥ ૫.૩૪.૮૦॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં સર્વમન્વતરાનુકીર્તનં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૫.૩૪॥

૫.૩૫

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

# ૫.૩૫. પઞ્ચત્રિંશોઽધ્યાયઃ । મન્વન્તરકીર્તને વૈવસ્વતવર્ણનમ્ ।

સૂત ઉવાચ ।
વિવસ્વાન્ કશ્યપાજ્જજ્ઞે દાક્ષાયણ્યાં મહાઋષેઃ ।
તસ્ય ભાર્યાભવત્સંજ્ઞા ત્વાષ્ટ્રી દેવી સુરેણુકા ॥ ૧॥

મુનેઽસહિષ્ણુના તેન તેજસા દુસ્સહેન ચ ।
ભર્તૃરૂપેણ નાતુષ્યદ્રૂપયૌવનશાલિની ॥ ૨॥

આદિત્યસ્ય હિ તદ્રૂપમસહિષ્ણુઃ સુતેજસઃ ।
દહ્યમાના તદોદ્વેગમકરોદ્વરવર્ણિની ॥ ૩॥

ઋષેઽસ્યાં ત્રીણ્યપત્યાનિ જનયામાસ ભાસ્કરઃ ।
સંજ્ઞાયાં તુ મનુઃ પૂર્વં શ્રાદ્ધદેવઃ પ્રજાપતિઃ ॥ ૪॥

યમશ્ચ યમુના ચૈવ યમલૌ સમ્બભૂવતુઃ ।
એવં હિ ત્રીણ્યપત્યાનિ તસ્યાં જાતાનિ સૂર્યતઃ ॥ ૫॥

સંવર્તુલં તુ તદ્રૂપં દૃષ્ટ્વા સંજ્ઞા વિવસ્વતઃ ।
અસહન્તી તતશ્છાયામાત્મનઃ સાસૃજચ્છુભામ્ ॥ ૬॥

માયામયી તુ સા સંજ્ઞામવોચદ્ભક્તિતઃ સુભે ।
કિં કરોમીહ કાર્યં તે કથયસ્વ શુચિસ્મિતે ॥ ૭॥

સંજ્ઞોવાચ
અહં યાસ્યામિ ભદ્રં તે મમૈવ ભવનં પિતુઃ ।
ત્વયૈતદ્ભવને સત્યં વસ્તવ્યં નિર્વિકારતઃ ॥ ૮॥

ઇમૌ મે બાલકૌ સાધૂ કન્યા ચેયં સુમધ્યમા ।
પાલનીયાઃ સુખેનૈવ મમ ચેદિચ્છસિ પ્રિયમ્ ॥ ૯॥

છાયોવાચ ।
આકેશગ્રહણાદ્દેવિ સહિષ્યેઽહં સુદુષ્કૃતમ્ ।
નાખ્યાસ્યામિ મતં તુભ્યં ગચ્છ દેવિ યથાસુખમ્ ॥ ૫.૩૫.૧૦॥

સૂત ઉવાચ ।
ઇત્યુક્તા સાઽગમદ્દેવી વ્રીડિતા સન્નિધૌ પિતુઃ ।
પિત્રા નિર્ભર્ત્સિતા તત્ર નિયુક્તા સા પુનઃ પુનઃ ॥ ૧૧॥

અગચ્છદ્વડવા ભૂત્વાચ્છાદ્ય રૂપં તતઃ સ્વકમ્ ।
કુરુંસ્તદોત્તરાન્ પ્રાપ્ય નૃણાન્યેવ ચચાર હ ॥ ૧૨॥

સંજ્ઞાં તાં તુ રવિર્મત્વા છાયાયાં સુસુતં તદા ।
જનયામાસ સાવર્ણિં મનું વૈ સવિતા કિલ ॥ ૧૩॥

સંજ્ઞાનુ પ્રાર્થિતા છાયા સા સ્વપુત્રેઽપિ નિત્યશઃ ।
ચકારાભ્યધિકં સ્નેહં ન તથા પૂર્વજે સુતે ॥ ૧૪॥

મનુસ્તસ્યાક્ષમત્તં યમસ્તં નૈવ ચક્ષમે ।
સ સરોષસ્તુ બાલ્યાચ્ચ ભાવિનોઽર્થસ્ય ગૌરવાત્ ॥ ૧૫॥

છાયાં સન્તર્જયામાસ પદા વૈવસ્વતો યમઃ ।
તં શશાપ તતઃ ક્રોધાચ્છાયા તુ કલુષીકૃતા ॥ ૧૬॥

ચરણઃ પતતામેષ તવેતિ ભૃશરોષતઃ ।
યમસ્તતઃ પિતુઃ સર્વં પ્રાઞ્જલિઃ પ્રત્યવેદયત્ ॥ ૧૭॥

ભૃશં શાપભયોદ્વિગ્નઃ સંજ્ઞાવાક્યૈર્વિચેષ્ટિતઃ ।
માત્રા સ્નેહેન સર્વેષુ વર્તિતવ્યં સુતેષુ વૈ ॥ ૧૮॥

સ્નેહમસ્માસ્વપાકૃત્ય કનીયાંસં બિભર્તિ સા ।
તસ્માન્મયોદ્યતઃ પાદસ્તદ્ભવાન્ ક્ષન્તુમર્હતિ ॥ ૧૯॥

શપ્તોઽહમસ્મિ દેવેશ જનન્યા તપતાંવર ।
તવ પ્રસાદાચ્ચરણો ન પતેન્મમ ગોપતે ॥ ૫.૩૫.૨૦॥

સવિતોવાચ ।
અસંશયં પુત્ર મહદ્ભવિષ્યત્યત્ર કારણમ્ ।
યેન ત્વામાવિશત્ક્રોધો ધર્મજ્ઞં સત્યવાદિનમ્ ॥ ૨૧॥

ન શક્યતે તન્મિથ્યા વૈ કર્તું માતૃવચસ્તવ ।
કૃમયો માંસમાદાય ગમિષ્યન્તિ મહીતલે ॥ ૨૨॥

તદ્વાક્યં ભવિતા સત્યં ત્વં ચ ત્રાતૌ ભવિષ્યસિ ।
કુરુ તાત ન સન્દેહં મનશ્ચાશ્વાસ્ય સ્વં પ્રભો ॥ ૨૩॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વા તનયં સૂર્યો યમસંજ્ઞં મુનીશ્વર ।
આદિત્યશ્ચાબ્રવીત્તાન્તુ છાયાં ક્રોધસમન્વિતઃ ॥ ૨૪॥

સૂર્ય ઉવાચ ।
હે પ્રિયે કુમતે ચણ્ડિ કિં ત્વયાચરિતં કિલ ।
કિન્તુ મેઽભ્યધિકઃ સ્નેહ એતદાખ્યાતુમર્હસિ ॥ ૨૫॥

સૂત ઉવાચ ।
સા રવેર્વચનં શ્રુત્વા યથાતથ્યં ન્યવેદયત્ ।
નિર્દગ્ધા કામરવિણા સાન્ત્વયામાસ વૈ તદા ॥ ૨૬॥

તસ્યાસ્તદ્ વચનં શ્રુત્વા સૂર્યાઽગાત્તવષ્ટુરન્તિકમ્
પપ્રચ્છ તં ક્વ સંજ્ઞેતિ ત્વષ્ટા સૂર્યમથાબ્રવીત્ ॥ ૨૭॥

ત્વષ્ટોવાચ ।
તવાતિતેજસા દગ્ધા ઇદં રૂપં ન શોભતે ।
અસહન્તી ચ તત્સંજ્ઞા વને વસતિ શાદ્વલે ॥ ૨૮॥

શ્લાઘ્યા યોગબલોપેતા યોગમાસાદ્ય ગોપતે ।
અનુકૂલસ્તુ દેવેશ સન્દિશ્યાત્મમયં મતમ્ ॥ ૨૯॥

રૂપં નિવર્તયામ્યદ્ય તવ કાન્તં કરોમ્યહમ્ ।
સૂત ઉવાચ ।
તચ્છ્રુત્વાપગતઃ ક્રોધો માર્તણ્ડસ્ય વિવસ્વતઃ ॥ ૫.૩૫.૩૦॥

ભ્રમિમારોપ્ય તત્તેજઃ શાતયામાસ વૈ મુનિઃ ।
તતો વિભ્રાજિતં રૂપં તેજસા સંવૃતેન ચ ॥ ૩૧॥

કૃતં કાન્તતરં રૂપં ત્વષ્ટ્રા તચ્છુશુભે તદા ।
તતોઽધિયોગમાસ્થાય સ્વાં ભાર્યાં હિ દદર્શ હ ॥ ૩૨॥

અધૃષ્યાં સર્વભૂતાનાં તેજસા નિયમેન ચ ।
સોઽશ્વરૂપં સમાસ્થાય ગત્વા તાં મૈથુનેચ્છયા ॥ ૩૩॥

મૈથુનાય વિચેષ્ટન્તીં પરપુંસોઽભિશઙ્કયા ।
મુખતો નાસિકાયાં તુ શુક્રં તદ્વ્યદધાન્મુને ॥ ૩૪॥

દેવૌ તતઃ પ્રજાયેતામશ્વિનૌ ભિષજાં વરૌ ।
નાસત્યૌ તૌ ચ દસ્રૌ ચ સ્મૃતૌ દ્વાવશ્વિનાવપિ ॥ ૩૫॥

તાં તુ કાન્તેન રૂપેણ દર્શયામાસ ભાસ્કરઃ ।
આત્માનં સા તુ તં દૃષ્ટ્વા પ્રહૃષ્ટા પતિમાદરાત્ ॥ ૩૬॥

પત્યા તેન ગૃહં પ્રાગાત્સ્વં સતી મુદિતાનના ।
મુમુદાતેઽથ તૌ પ્રીત્યા દમ્પતી પૂર્વતોધિકમ્ ॥ ૩૭॥

યમસ્તુ કર્મણા તેન ભૃશં પીડિતમાનસઃ ।
ધર્મેણ રઞ્જયામાસ ધર્મરાજ ઇમા પ્રજાઃ ॥ ૩૮॥

લેભે સ કર્મણા તેન ધર્મરાજો મહાદ્યુતિઃ ।
પિતૃણામાધિપત્યં ચ લોકપાલત્વમેવ ચ ॥ ૩૯॥

મનુઃ પ્રજાપતિસ્ત્વાસીત્સાવર્ણિઃ સ તપોધનઃ ।
ભાવ્યઃ સ કર્મણા તેન મનોઃ સાવર્ણિકેઽન્તરે ॥ ૫.૩૫.૪૦॥

મેરુપૃષ્ઠે તપો ઘોરમદ્યાપિ ચરતે પ્રભુઃ ।
યવીયસી તયોર્યા તુ યમી કન્યા યશસ્વિની ॥ ૪૧॥

અભવત્સા સરિચ્છ્રેષ્ઠા યમુના લોકપા વની ।
મનુરિત્યુચ્યતે લોકે સાવર્ણિરિતિ ચોચ્યતે ॥ ૪૨॥

ય ઇદં જન્મ દેવાનાં શૃણુયાદ્ધારયેત્તુ વા ।
આપદં પ્રાપ્ય મુચ્યેત પ્રાપ્નુયાત્સુમહદ્યશઃ ॥ ૪૩॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં મન્વન્તરકીર્તને વૈવસ્વતવર્ણનં નામ પચત્રિંશોઽધ્યાયઃ ॥ ૫.૩૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૩૬. ષટ્ત્રિંશોઽધ્યાયઃ । મનુનવપુત્રવંશવર્ણનમ્ ।

સૂત ઉવાચ ।
મનોર્વૈવસ્વતસ્યાસન્પુત્રા વૈ નવ તત્સમાઃ ।
પશ્ચાન્મહોન્નતા ધીરાઃ ક્ષત્રધર્મપરાયણાઃ ॥ ૧॥

ઇક્ષ્વાકુઃ શિબિનાભાગૌ ધૃષ્ટઃ શર્યાતિરેવ ચ ।
નરિષ્યન્તોઽથ નાભાગઃ કરૂષશ્ચ પ્રિયવ્રતઃ ॥ ૨॥

અકરોત્પુત્રકામસ્તુ મનુરિષ્ટિં પ્રજાપતિઃ ।
અનુત્પન્નેષુ પુત્રેષુ તત્રેષ્ટ્યાં મુનિપુઙ્ગવઃ ॥ ૩॥

સા હિ દિવ્યામ્બરધરા દિવ્યાભરણભૂષિતા ।

દિવ્યસંહનના ચૈવમિલા જજ્ઞે હિ વિશ્રુતા ॥ ૪॥

તામિડેત્યેવ હોવાચ મનુર્દણ્ડધરસ્તથા ।
અનુગચ્છસ્વ મામેતિ તમિડા પ્રત્યુવાચ હ ॥ ૫॥

ધર્મયુક્તમિદં વાક્યં પુત્રકામં પ્રજાપતિમ્ ।
ઇડોવાચ ।
મિત્રાવરુણયોરંશૈર્જાતાસ્મિ વદતાં વર ॥ ૬॥

તયોઃ સકાશં યાસ્યામિ ન મેઽધર્મે રુચિર્ભવેત્ ।
એવમુક્ત્વા સતી સા તુ મિત્રાવરુણયોસ્તતઃ ॥ ૭॥

ગત્વાન્તિકં વરારોહા પ્રાઞ્જલિર્વાક્યમબ્રવીત્ ।
અંશૈસ્તુ યુવયોર્જાતા મનુયજ્ઞે મહામુની ॥ ૮॥

આગતા ભવતોરન્તિ બ્રૂતં કિં કરવાણિ વામ્ ।
અન્યાન્ પુત્રાન્ સૃજ વિભો તૈર્વંશસ્તે ભવિષ્યતિ ॥ ૯॥

સૂત ઉવાચ ।
તાં તથાવાદિનીં સાધ્વીમિડાં મન્વધ્વરોદ્ભવામ્ ।
મિત્રાવરુણનામાનૌ મુની ઊચતુરાદરાત્ ॥ ૧૦॥

મિત્રાવરુણાવૂચતુઃ ।
અનેન તવ ધર્મજ્ઞે પ્રશ્રયેણ દમેન ચ ।
સત્યેન ચૈવ સુશ્રોણિ પ્રીતૌ દ્વૌ વરવર્ણિનિ ॥ ૧૧॥

આવયોસ્ત્વં મહાભાગે ખ્યાતિં ચૈવ ગમિષ્યસિ ।
મનોર્વંશકરઃ પુત્રસ્ત્વમેવ ચ ભવિષ્યસિ ॥ ૧૨॥

સુદ્યુમ્ન ઇતિ વિખ્યાતસ્ત્રિષુ લોકેષુ વિશ્રુતઃ ।
જગત્પ્રિયો ધર્મશીલૌ મનુવંશવિવર્ધનઃ ॥ ૧૩॥

સૂત ઉવાચ ।
નિવૃત્તા સા તુ તચ્છ્રુત્વા ગચ્છન્તી પિતુરન્તિકે ।
બુધેનાન્તરમાસાદ્ય મૈથુનાયોપમન્ત્રિતા ॥ ૧૪॥

સોમપુત્રાત્તતો જજ્ઞે તસ્યાં રાજા પુરૂરવાઃ ।
પુત્રોઽતિસુન્દરઃ પ્રાજ્ઞ ઉર્વશીપતિરુન્નતઃ ॥ ૧૫॥

જનયિત્વા ચ સા તત્ર પુરૂરવસમાદરાત્ ।

પુત્રં શિવપ્રસાદાત્તુ પુનઃ સુદ્યુમ્નતાં ગતઃ ॥ ૧૬॥

સુદ્યુમ્નસ્ય તુ દાયાદાસ્ત્રયઃ પરમધાર્મિકાઃ ।
ઉત્કલશ્ચ ગયશ્ચાપિ વિનતાશ્વશ્ચ વીર્યવાન્ ॥ ૧૭॥

ઉત્કલસ્યોત્કલા વિપ્રા વિનતાશ્વસ્ય પશ્ચિમા ।
દિક્પૂર્વા મુનિશાર્દૂલ ગયસ્ય તુ ગયા સ્મૃતા ॥ ૧૮॥

પ્રવિષ્ટે તુ મનૌ તાત દિવાકરતનું તદા ।
દશધા તત્ર તત્ક્ષેત્રમકરોત્પૃથિવીમિમામ્ ॥ ૧૯॥

ઇક્ષ્વાકુઃ શ્રેષ્ઠદાયાદો મધ્યદેશમવાપ્તવાન્ ।
વસિષ્ઠવચનાદાસીત્પ્રતિષ્ઠાનં મહાત્મનઃ ॥ ૨૦॥

પ્રતિષ્ઠાં ધર્મરાજ્યસ્ય સુદ્યુમ્નોઽથ તતો દદૌ ।
તત્પુરૂરવસે પ્રાદાદ્ રાજ્યં પ્રાપ્ય મહાયશાઃ ॥ ૨૧॥

માનવો યો મુનિશ્રેષ્ઠાઃ સ્ત્રીપુંસોર્લક્ષણઃ પ્રભુઃ ।
નરિષ્યન્તાચ્છકાઃ પુત્રા નભગસ્ય સુતોઽભવત્ ॥ ૨૨॥

અમ્બરીષસ્તુ બાહ્લિયો બાહ્લકં ક્ષેત્રામામપ્તવાન્ ।
શર્યાતેર્મિથુનં ત્વાસીદાનર્તો નામ વિશ્રુતઃ ॥ ૨૩॥

પુત્રઃ સુકન્યા કન્યા ચ યા પત્ની ચ્યવનસ્ય હિ ।
આનર્તસ્ય હિ દાયાદો રૈભ્યો નામ સ રૈવતઃ ॥ ૨૪॥

આનર્તવિષયે યસ્ય પુરી નામ કુશસ્થલી ।
મહાદિવ્યા સપ્તપુરીમધ્યે યા સપ્તમી મતા ॥ ૨૫॥

તસ્ય પુત્રશતં ત્વાસીત્કકુદ્મી જ્યેષ્ઠ ઉત્તમઃ ।
તેજસ્વી સુબલઃ પારો ધર્મિષ્ઠો બ્રહ્મપાલકઃ ॥ ૨૬॥

કકુદ્મિનસ્તુ સઞ્જાતા રેવતી નામ કન્યકા ।
મહાલાવણ્યસંયુક્તા દિવ્યલક્ષ્મીરિવાપરા ॥ ૨૭॥

પ્રષ્ટું કન્યાવરં રાજા કકુદ્મી કન્યયા સહ ।
બ્રહ્મલોકે વિધેઃ સમ્યક્સર્વાધીશો જગામ હ ॥ ૨૮॥

આવર્તમાને ગાન્ધર્વે સ્થિતો લબ્ધક્ષણઃ ક્ષણમ્ ।
શુશ્રાવ તત્ર ગાન્ધર્વં નર્તને બ્રહ્મણોઽન્તિકે ॥ ૨૯॥

મુહૂર્તભૂતં તત્કાલે ગતં બહુયુગં તદા ।
ન કિઞ્ચિદ્ બુબુધે રાજા કકુદ્મી મુનયઃ સ તુ ॥ ૩૦॥

તદાસૌ વિધિમાનમ્ય સ્વાભિપ્રાયં કૃતાઞ્જલિઃ ।
ન્યવેદયદ્વિનીતાત્મા બ્રહ્મણે પરમાત્મને ॥ ૩૧॥

તદભિપ્રાયમાકર્ણ્ય સ પ્રહસ્ય પ્રજાપતિઃ ।
કકુદ્મિનં મહારાજં સમાભાષ્ય સમબ્રવીત્ ॥ ૩૨॥

બ્રહ્મોવાચ ।
શ‍ૃણુ રાજન્ રૈભ્યસુત કકુદ્મિન્ પૃથિવીપતે ।
મદ્વચઃ પ્રીતિતઃ સત્યં પ્રવક્ષ્યામિ વિશેષતઃ ॥ ૩૩॥

કાલેન સંહૃતાસ્તે વૈ વરા યે તે કૃતા હૃદિ ।
ન તદ્ગોત્રં હિ તત્રાસ્તિ કાલઃ સર્વસ્ય ભક્ષકઃ ॥ ૩૪॥

ત્વત્પુર્યપિ હતા પુણ્યજનૈઃ સા રાક્ષસૈર્નૃપ ।
અષ્ટાવિંશદ્દ્વાપરેઽદ્ય કૃષ્ણેન નિર્મિતા પુનઃ ॥ ૩૫॥

કૃતા દ્વારાવતી નામ્ના બહુદ્વારા મનોરમા ।
ભોજવૃષ્ણ્યન્ધકૈર્ગુપ્તા વાસુદેવપુરોગમૈઃ ॥ ૩૬॥

તદ્ગચ્છ તત્ર પ્રીતાત્મા વાસુદેવાય કન્યકામ્ ।
બલદેવાય દેહિ ત્વમિમાં સ્વતનયાં નૃપ ॥ ૩૭॥

સૂત ઉવાચ ।
ઇત્યાદિષ્ટો નૃપોઽયં તં નત્વા તાં ચ પુરીં ગતઃ ।
ગતાન્ બહૂન્યુગાન્ જ્ઞાત્વા વિસ્મિતઃ કન્યયા યુતઃ ॥ ૩૮॥

તતસ્તુ યુવતીં કન્યાં તાં ચ સ્વાં સુવિધાનતઃ ।
કૃષ્ણભ્રાત્રે બલાયાશુ પ્રાદાત્તત્ર સ રેવતીમ્ ॥ ૩૯॥

તતો જગામ શિખરં મેરોર્દિવ્યં મહાપ્રભુઃ ।
શિવમારાધયામાસ સ નૃપસ્તપસિ સ્થિતઃ ॥ ૪૦॥

ઋષય ઊચુઃ ।
તત્ર સ્થિતો બહુયુગં બ્રહ્મલોકે સ રેવતઃ ।
યુવૈવાગાન્મર્ત્યલોકમેતન્નઃ સંશયો મહાન્ ॥ ૪૧॥

સૂત ઉવાચ ।

ન જરા ક્ષુત્પિપાસા વા વિકારાસ્તત્ર સન્તિ વૈ ।
અપમૃત્યુર્ન કેષાઞ્ચિન્મુનયો બ્રહ્મણોઽતિકે ॥ ૪૨॥

અતો ન રાજા સમ્પ્રાપ જરાં મૃત્યું ચ સા સુતા ।
સ યુવૈવાગતસ્તત્ર સમ્મન્ત્ર્ય તનયાવરમ્ ॥ ૪૩॥

ગત્વા દ્વારાવતીં દિવ્યાં પુરીં કૃષ્ણવિનિર્મિતામ્ ।
વિવાહં કારયામાસ કન્યાયાઃ સ બલેન હિ ॥ ૪૪॥

તસ્ય પુત્રશતં ત્વાસીદ્ધાર્મિકસ્ય મહાપ્રભોઃ ।
કૃષ્ણસ્યાપિ સુતા જાતા બહુસ્ત્રીભ્યોઽમિતાસ્તતઃ ॥ ૪૫॥

અન્વવાયો મહાંસ્તત્ર દ્વયોરપિ મહાત્મનોઃ ।
ક્ષત્રિયા દિક્ષુ સર્વાસુ ગતા હૃષ્ટાઃ સુધાર્મિકાઃ ॥ ૪૬॥

ઇતિ પ્રોક્તો હિ શર્યાતિર્વંશોઽન્યેષાં વદામ્યહમ્ ।
માનવાનાં હિ સઙ્ક્ષેપાચ્છૃણુતાદરતો દ્વિજાઃ ॥ ૪૭॥

નાભાગો દિષ્ટપુત્રોઽભૂત્સ તુ બ્રાહ્મણતાં ગતઃ ।
સ્વક્ષત્રવંશં સંસ્થાપ્ય બ્રહ્મકર્મભિરાવૃતઃ ॥ ૪૮॥

ધૃષ્ટાદ્ધાર્ષ્ટમભૂત્ક્ષત્રં બ્રહ્મભૂયં ગતં ક્ષિતૌ ।
કરૂષસ્ય તુ કારૂષાઃ ક્ષત્રિયા યુદ્ધદુર્મદાઃ ॥ ૪૯॥

નૃગો યો મનુપુત્રસ્તુ મહાદાતા વિશેષતઃ ।
નાનાવસૂનાં સુપ્રીત્યા વિપ્રેભ્યશ્ચ ગવાં તથા ॥ ૫૦॥

ગોદાનવ્યત્યયાદ્યસ્તુ સ્વકુબુદ્ધ્યા સ્વપાપતઃ ।
કૃકલાસત્વમાપન્નઃ શ્રીકૃષ્ણેન સમુદ્ધૃતઃ ॥ ૫૧॥

તસ્યૈકોઽભૂત્સુતઃ શ્રેષ્ઠઃ પ્રયાતિર્ધર્મવિત્તથા ।
ઇતિ શ્રુતં મયા વ્યાસાત્તત્પ્રોક્તં હિ સમાસતઃ ॥ ૫૨॥

વૃષધ્રસ્તુ મનોઃ પુત્રો ગોપાલો ગુરુણા કૃતઃ ।
પાલયામાસ ગા યત્તો રાત્ર્યાં વીરાસનવ્રતઃ ॥ ૫૩॥

સ એકદાગતં ગોષ્ઠે વ્યાઘ્રં ગા હિંસિતું બલી ।
શ્રુત્વા ગોક્રન્દનં બુદ્ધો હન્તું તં ખડ્ગધૃગ્યયૌ ॥ ૫૪॥

અજાનન્નહનદ્બભ્રોઃ શિરઃ શાર્દૂલશઙ્કયા ।
નિશ્ચક્રામ સભીર્વ્યાઘ્રો દૃષ્ટ્વા તં ખડ્ગિનં પ્રભુમ્ ॥ ૫૫॥

મન્યમાનો હતં વ્યાઘ્રં સ્વસ્થાનં સ જગામ હ ।
રાત્ર્યાં તસ્યાં ભ્રમાપન્નો વર્ષવાતવિનષ્ટધીઃ ॥ ૫૬॥

વ્યુષ્ટાયાં નિશિ ચોત્થાય પ્રગે તત્ર ગતો હિ સઃ ।
અદ્રાક્ષીત્સ હતાં બભ્રું ન વ્યાઘ્રં દુઃખિતોઽભવત્ ॥ ૫૭॥

શ્રુત્વા તદ્વૃત્તમાજ્ઞાય તં શશાપ કૃતાગસમ્ ।
અકામતો વિચાર્યેતિ શૂદ્રો ભવ ન ક્ષત્રિયઃ ॥ ૫૮॥

એવં શપ્તસ્તુ ગુરુણા કુલાચાર્યેણ કોપતઃ ।
નિઃસૃતશ્ચ પૃષધ્રસ્તુ જગામ વિપિનં મહત્ ॥ ૫૯॥

નિર્વિણ્ણઃ સ તુ કષ્ટેન વિરક્તોઽભૂત્સ યોગવાન્ ।
વનાગ્નૌ દગ્ધદેહશ્ચ જગામ પરમાં ગતિમ્ ॥ ૬૦॥

કવિઃ પુત્રો મનોઃ પ્રાજ્ઞઃ શિવાનુગ્રહતોઽભવત્ ।
ઇહ ભુક્ત્વા સુખં દિવ્યં મુક્તિં પ્રાપ સુદુર્લભામ્ ॥ ૬૧॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં મનુનવપુત્રવંશવર્ણનં નામ ષટ્ત્રિંશોઽધ્યાયઃ ॥ ૫.૩૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૩૭. સપ્તત્રિંશોઽધ્યાયઃ । મનુવંશવર્ણનમ્ ।

સૂત ઉવાચ ।
પૂર્વતસ્તુ મનોર્જજ્ઞે ઇક્ષ્વાકુર્ઘ્રાણતઃ સુતઃ ।
તસ્ય પુત્રશતં ત્વાસીદિક્ષ્વાકોર્ભૂરિદક્ષિણમ્ ॥ ૧॥

તેષાં પુરસ્તાદભવન્નાર્યાવર્તે નૃપા દ્વિજાઃ ।
તેષાં વિકુક્ષિર્જ્યેષ્ઠસ્તુ સોઽયોધ્યાયાં નૃપોઽભવત્ ॥ ૨॥

તત્કર્મ શ ૃણુ તત્પ્રીત્યા યજ્જાતં વંશતો વિધેઃ ।
શ્રાદ્ધકર્મણિ ચોદ્દિષ્ટો હ્યકૃતે શ્રાદ્ધકર્મણિ ॥ ૩॥

ભક્ષયિત્વા શશં શીઘ્રં શશાદત્વમતો ગતઃ ।
ઇક્ષ્વાકુણા પરિત્યક્તઃ શશાદો વનમાવિશત્ ॥ ૪॥

ઇક્ષ્વાકૌ સંસ્થિતે રાજા વસિષ્ઠવચનાદભૂત્ ।
શકુનિપ્રમુખાસ્તસ્ય પુત્રાઃ પઞ્ચદશ સ્મૃતાઃ ॥ ૫॥

ઉત્તરાપથદેશસ્ય રક્ષિતારો મહીક્ષિતઃ ।
અયોધસ્ય તુ દાયાદઃ કકુત્સ્થો નામ વીર્યવાન્ ॥ ૬॥

અરિનાભઃ કકુત્સ્થસ્ય પૃથુરેતસ્ય વૈ સુતઃ ।
વિષ્ટરાશ્વઃ પૃથોઃ પુત્રસ્તસ્માદિન્દ્રઃ પ્રજાપતિઃ ॥ ૭॥

ઇન્દ્રસ્ય યુવનાશ્વસ્તુ શ્રાવસ્તસ્ય પ્રજાપતિઃ ।
જજ્ઞે શ્રાવસ્તકઃ પ્રાજ્ઞઃ શ્રાવસ્તી યેન નિર્મિતા ।
શ્રાવસ્તસ્ય તુ દાયાદો બૃહદશ્વો મહાયશાઃ ॥ ૮॥

યુવનાશ્વઃ સુતસ્તસ્ય કુવલાશ્વશ્ચ તત્સુતઃ ।
સ હિ ધુન્ધુવધાદ્ભૂતો ધુન્ધુમારો નૃપોત્તમઃ ॥ ૯॥

કુવલાશ્વસ્ય પુત્રાણાં શતમુત્તમધન્વિનામ્ ।
બભૂવાથ પિતા રાજ્યે કુવલાશ્વં ન્યયોજયત્ ॥ ૧૦॥

પુત્રસઙ્ક્રામિતશ્રીકો વનં રાજા સમાવિશત્ ।
તમુત્તઙ્કોઽથ રાજર્ષિઃ પ્રયાન્તં પ્રત્યવારયત્ ॥ ૧૧॥

ઉત્તઙ્ક ઉવાચ ।
ભવતા રક્ષણં કાર્યં પૃથિવ્યા ધર્મતઃ શ઼ૃણુ ।
ત્વયા હિ પૃથિવી રાજન્ રક્ષ્યમાણા મહાત્મના ॥ ૧૨॥

ભવિષ્યતિ નિરુદ્વિગ્ના નારણ્યં ગન્તુમર્હસિ ।
મમાશ્રમસમીપે તુ સમેષુ મરુધન્વસુ ॥ ૧૩॥

સમુદ્રવાલુકાપૂર્ણે દાનવો બલદર્પિતઃ ।
દેવતાનામવધ્યો હિ મહાકાયો મહાબલઃ ॥ ૧૪॥

અન્તર્ભૂમિગતસ્તત્ર વાલુકાન્તર્હિતઃ સ્થિતઃ ।
રાક્ષસસ્ય મધોઃ પુત્રો ધુન્ધુનામા સુદારુણઃ ॥ ૧૫॥

શેતે લોકવિનાશાય તપ આસ્થાય દારુણમ્ ।
સંવત્સરસ્ય પર્યન્તે સ નિશ્વાસં વિમુઞ્ચતિ ॥ ૧૬॥

યદા તદા ભૂશ્ચલતિ સશૈલવનકાનના ।
સવિસ્ફુલિઙ્ગં સાઙ્ગારં સધૂમમતિદારુણમ્ ॥ ૧૭॥

તેન રાયન્ન શક્નોમિ તસ્મિન્ સ્થાતું સ્વ આશ્રમે ।
તં મારય મહાબાહો લોકાનાં હિતકામ્યયા ॥ ૧૮॥

લોકાઃ સ્વસ્થા ભવન્ત્વદ્ય તસ્મિન્ વિનિહતે ત્વયા ।
ત્વં હિ તસ્ય વધાયૈવ સમર્થઃ પૃથિવીપતે ॥ ૧૯॥

વિષ્ણુના ચ વરો દત્તો મહ્યં પૂર્વયુગેઽનઘ ।
તેજસા સ્વેન તે વિષ્ણુસ્તેજ આપ્યાયયિષ્યતિ ॥ ૨૦॥

પાલને હિ મહાન્ ધર્મઃ પ્રજાનામિહ દૃશ્યતે ।
ન તથા દૃશ્યતેઽરણ્યે મા તેઽભૂદ્ બુદ્ધિરીદૃશી ॥ ૨૧॥

ઈદૃશો ન હિ રાજેન્દ્ર ક્વચિદ્ધર્મઃ પ્રવિદ્યતે ।
પ્રજાનાં પાલને યાદૃક્ પુરા રાજર્ષિભિઃ કૃતઃ ॥ ૨૨॥

સ એવમુક્તો રાજર્ષિરુત્તઙ્કેન મહાત્મના ।
કુવલાશ્વં સુતં પ્રાદાત્તસ્મૈ ધુન્ધુનિવારણે ॥ ૨૩॥

ભગવન્ન્યસ્તશસ્ત્રોઽહમયં તુ તનયો મમ ।
ભવિષ્યતિ દ્વિજશ્રેષ્ઠ ધુન્ધુમારો ન સંશયઃ ॥ ૨૪॥

ઇત્યુક્ત્વા પુત્રમાદિશ્ય યયૌ સ તપસે નૃપઃ ।
કુવલાશ્વશ્ચ સોત્તઙ્કો યયૌ ધુન્ધુવિનિગ્રહે ॥ ૨૫॥

તમાવિશત્તદા વિષ્ણુર્ભગવાંસ્તેજસા પ્રભુઃ ।
ઉત્તઙ્કસ્ય નિયોગાદ્વૈ લોકાનાં હિતકામ્યયા ॥ ૨૬॥

તસ્મિન્પ્રયાતે દુર્ધર્ષે દિવિ શબ્દો મહાનભૂત્ ।
એષ શ્રીમાન્નૃપસુતો ધુન્ધુમારો ભવિષ્યતિ ॥ ૨૭॥

દિવ્યૈર્માલ્યૈશ્ચ તં દેવાઃ સમન્તાત્સમવારયન્ ।
પ્રશંસાં ચક્રિરે તસ્ય જય જીવેતિ વાદિનઃ ॥ ૨૮॥

સ ગત્વા જયતાં શ્રેષ્ઠસ્તનયૈઃ સહ પાર્થિવઃ ।
સમુદ્રં ખનયામાસ વાલુકાર્ણવમધ્યતઃ ॥ ૨૯॥

નારાયણસ્ય વિપ્રર્ષેસ્તેજસાપ્યાયિતસ્તુ સઃ ।
બભૂવ સુમહાતેજા ભૂયો બલસમન્વિતઃ ॥ ૩૦॥

તસ્ય પુત્રૈઃ ખનદ્ભિસ્તુ વાલુકાન્તર્ગતસ્તુ સઃ ।
ધુન્ધુરાસાદિતો બ્રહ્મન્ દિશમાશ્રિત્ય પશ્ચિ મામ્ ॥ ૩૧॥

મુખજેનાગ્નિના ક્રોધાલ્લોકાન્ સંવર્તયન્નિવ ।
વારિ સુસ્રાવ વેગેન વિધોઃ કધિરિવોદયે ॥ ૩૨॥

તતોઽનલૈરભિહતં દગ્ધં પુત્રશતં હિ તત્ ।
ત્રય એવાવશિષ્ટાશ્ચ તેષુ મધ્યે મુનીશ્વર ॥ ૩૩॥

તતઃ સ રાજા વિપ્રેન્દ્ર રાક્ષસં તં મહાબલમ્ ।
આસસાદ મહાતેજા ધુન્ધું વિપ્રવિનાશનમ્ ॥ ૩૪॥

તસ્ય વારિમયં વેગમાપીય સ નરાધિપઃ ।
વહ્નિબાણેન વહ્નિં તુ શમયામાસ વારિણા ॥ ૩૫॥

તં નિહત્ય મહાકાયં બલેનોદકરાક્ષસમ્ ।
ઉત્તઙ્કસ્યેક્ષયામાસ કૃતં કર્મ નરાધિપઃ ॥ ૩૬॥

ઉત્તઙ્કસ્તુ વરં પ્રાદાત્તસ્મૈ રાજ્ઞે મહામુને ।
અદદચ્ચાક્ષયં વિત્તં શત્રુભિશ્ચાપરાજયમ્ ॥ ૩૭॥

ધર્મે મતિં ચ સતતં સ્વર્ગે વાસં તથાક્ષયમ્ ।
પુત્રાણાં ચાક્ષયં લોકં રક્ષસા યે તુ સંહતાઃ ॥ ૩૮॥

તસ્ય પુત્રાસ્ત્રયઃ શિષ્ટાઃ દૃઢાશ્વઃ શ્રેષ્ઠ ઉચ્યતે ।
હંસાશ્વકપિલાશ્વૌ ચ કુમારૌ તત્કનીયસૌ ॥ ૩૯॥

ધૌન્ધુમારિર્દૃઢાશ્વો યો હર્યશ્વસ્તસ્ય ચાત્મજઃ ।
હર્યશ્વસ્ય નિકુમ્ભોઽભૂત્પુત્રો ધર્મરતઃ સદા ॥ ૪૦॥

સંહતાશ્વો નિકુમ્ભસ્ય પુત્રો રણવિશારદઃ ।
અક્ષાશ્વશ્ચ કૃતાશ્વશ્ચ સંહતાશ્વસુતૌ દ્વિજાઃ ॥ ૪૧॥

તસ્ય હૈમવતી ભાર્યા સતાં માન્યા દૃષદ્વતી ।
વિખ્યાતા ત્રિષુ લોકેષુ પુત્રસ્તસ્યાઃ પ્રસેનજિત્ ॥ ૪૨॥

લેભે પ્રસેનજિદ્ભાર્યાં ગૌરીં નામ પતિવ્રતામ્ ।
અભિશપ્તા તુ સા ભર્ત્રા નદી સા બાહુદા કૃતા ॥ ૪૩॥

તસ્ય પુત્રો મહાનાસીદ્યુવનાશ્વો મહીપતિઃ ।
માન્ધાતા યુવનાશ્વસ્ય ત્રિષુ લોકેષુ વિશ્રુતઃ ॥ ૪૪॥

તસ્ય ચૈત્રરથી ભાર્યા શશબિન્દુસુતાઽભવત્ ।

પતિવ્રતા ચ જ્યેષ્ઠા ચ ભ્રાતૃણામયુતસ્ય સા ॥ ૪૫॥

તસ્યામુત્પાદયામાસ માન્ધાતા દ્વૌ સુતૌ તદા ।
પુરુકુત્સં ચ ધર્મજ્ઞં મુચુકુન્દં ચ ધાર્મિકમ્ ॥ ૪૬॥

પુરુકુત્સસુતસ્ત્વાસીદ્વિદ્વાંસ્ત્રય્યારુણિઃ કવિઃ ।
તસ્ય સત્યવ્રતો નામ કુમારોઽભૂન્મહાબલી ॥ ૪૭॥

પાણિગ્રહણમન્ત્રાણાં વિઘ્નં ચક્રે મહાત્મભિઃ ।
યેન ભાર્યા હૃતા પૂર્વં કૃતોદ્વાહઃ પરસ્ય વૈ ॥ ૪૮॥

બલાત્કામાચ્ચ મોહાચ્ચ સંહર્ષાચ્ચ યદોત્કટાત્ ।
જહાર કન્યાં કામાચ્ચ કસ્યચિત્પુરવાસિનઃ ॥ ૪૯॥

અધર્મસઙ્ગિનં તં તુ રાજા ત્રય્યારુણિસ્ત્યજન્ ।
અપધ્વંસેતિ બહુશોઽવદત્ક્રોધસમન્વિતઃ ॥ ૫૦॥

પિતરં સોઽબ્રવીન્દ્ દુષ્ટઃ ક્વ ગચ્છામીતિ વૈ તદા ।
વસ શ્વપાકનિકટે રાજા પ્રાહેતિ તં તદા ॥ ૫૧॥

સ હિ સત્યવ્રતસ્તેન શ્વપાકવસથાન્તિકે ।
પિત્રા ત્યક્તોઽવસદ્વીરો ધર્મપાલેન ભૂભુજા ॥ ૫૨॥

તતસ્ત્રય્યારુણી રાજા વિરક્તઃ પુત્રકર્મણા ।
સ શઙ્કરતપઃ કર્તું સર્વં ત્યક્ત્વા વનં યયૌ ॥ ૫૩॥

તતસ્તસ્ય સ્વવિષયે નાવર્ષત્પાકશાસનઃ ।
સમા દ્વાદશ વિપ્રર્ષે તેનાધર્મેણ વૈ તદા ॥ ૫૪॥

દારાંસ્તસ્ય તુ વિષયે વિશ્વામિત્રો મહાતપાઃ ।
સન્ત્યજ્ય સાગરાનૂપે ચચાર વિપુલં તપઃ ॥ ૫૫॥

તસ્ય પત્ની ગલે બદ્ધ્વા મધ્યમં પુત્રમૌરસમ્ ।
શેષસ્ય ભરણાર્થાય વ્યક્રીણાદ્ગોશતેન ચ ॥ ૫૬॥

તાં તુ દૃષ્ટ્વા ગલે બદ્ધં વિક્રીણન્તીં સ્વમાત્મજમ્ ।
મહર્ષિપુત્રં ધર્માત્મા મોચયામાસ તં તદા ॥ ૫૭॥

સત્યવ્રતો મહાબાહુર્ભરણં તસ્ય ચાકરોત્ ।
વિશ્વામિત્રસ્ય તુષ્ટ્યર્થમનુક્રોશાર્થમેવ ચ ॥ ૫૮॥

તદારભ્ય સ પુત્રસ્તુ વિશ્વામિત્રસ્ય વૈ મુનેઃ ।
અભવદ્ગાલવો નામ ગલબન્ધાન્મહાતપાઃ ॥ ૫૯॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં મનુવંશવર્ણનન્નામ સપ્તત્રિંશોઽધ્યાયઃ ॥ ૫.૩૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૩૮. અષ્ટાત્રિંશોઽધ્યાયઃ । સત્યવ્રતાદિસગરપર્યન્તવંશવર્ણનમ્ ।

સૂત ઉવાચ ।
સત્યવ્રતસ્તુ તદ્ભક્ત્યા કૃપયા ચ પ્રતિજ્ઞયા ।
વિશ્વામિત્રકલત્રં ચ પોષયામાસ વૈ તદા ॥ ૧॥

હત્વા મૃગાન્વરાહાંશ્ચ મહિષાંશ્ચ વનેચરાન્ ।
વિશ્વામિત્રાશ્રમાભ્યાશે તન્માંસં ચાક્ષિપન્મુને ॥ ૨॥

તીર્થં ગાં ચૈવ ગાત્રં ચ તથૈવાન્તઃપુરં મુનિઃ ।
યાજ્યોપાધ્યાયસંયોગાદ્વસિષ્ઠઃ પર્યરક્ષત ॥ ૩॥

સત્યવ્રતસ્ય વાક્યાદ્વા ભાવિનોઽર્થસ્ય વૈ બલાત્ ।
વસિષ્ઠોઽભ્યધિકં મન્યું ધારયામાસ નિત્યશઃ ॥ ૪॥

પિત્રા તુ તં તદા રાષ્ટ્રાત્પરિત્યક્તં સ્વમાત્મજમ્ ।
ન વારયામાસ મુનિર્વસિષ્ઠઃ કારણેન ચ ॥ ૫॥

પાણિગ્રહણમન્ત્રાણાં નિષ્ઠા સ્યાત્સપ્તમે પદે ।
ન ચ સત્યવ્રતસ્તસ્ય તમુપાંશુમબુદ્ધ્યત ॥ ૬॥

તસ્મિન્સ પરિતોષાય પિતુરાસીન્મહાત્મનઃ ।
કુલસ્ય નિષ્કૃતિર્વિપ્ર કૃતા સા વૈ ભવેદિતિ ॥ ૭॥

ન તં વસિષ્ઠો ભગવાન્પિત્રા ત્યક્તં ન્યવારયત્ ।
અભિષેક્ષ્યામ્યહં પુત્રમસ્ય નૈવાબ્રવીન્મુનિઃ ॥ ૮॥

સ તુ દ્વાદશ વર્ષાણિ દીક્ષાં તામુદ્વહદ્ બલી ।
અવિદ્યમાને માંસે તુ વસિષ્ઠસ્ય મહાત્મનઃ ॥ ૯॥

સર્વકામદુહાં દોગ્ધ્રીં દદર્શ સ નૃપાત્મજઃ ।

તાં વૈ ક્રોધાચ્ચ લોભાચ્ચ શ્રમાદ્વૈ ચ ક્ષુધાન્વિતઃ ॥ ૧૦॥

દાશધર્મગતો રાજા તાં જઘાન સ વૈ મુને ।
સ તં માંસં સ્વયં ચૈવ વિશ્વામિત્રસ્ય ચાત્મજમ્ ॥ ૧૧॥

ભોજયામાસ તચ્છ્રુત્વા વસિષ્ઠો હ્યસ્ય ચુક્રુધે ।
ઉવાચ ચ મુનિશ્રેષ્ઠસ્તં તદા ક્રોધસંયુતઃ ॥ ૧૨॥

વસિષ્ઠ ઉવાચ ।
પાતયેયમહં ક્રૂર તવ શઙ્કુમશંસયમ્ ।
યદિ તે દ્વાવિમૌ શઙ્કૂ નસ્યાતાં વૈ કૃતૌ પુરા ॥ ૧૩॥

પિતુશ્ચાપરિતોષેણ ગુરોર્દોગ્ધ્રીવધેન ચ ।
અપ્રોક્ષિતોપયોગાચ્ચ ત્રિવિધસ્તે વ્યતિક્રમઃ ॥ ૧૪॥

ત્રિશઙ્કુરિતિ હોવાચ ત્રિશઙ્કુરિતિ સ સ્મૃતઃ ।
વિશ્વામિત્રસ્તુ દારાણામાગતો ભરણે કૃતે ॥ ૧૫॥

તેન તસ્મૈ વરં પ્રાદાન્મુનિઃ પ્રીતસ્ત્રિશઙ્કવે ।
છન્દ્યમાનો વરેણાથ વરં વવ્રે નૃપાત્મજઃ ॥ ૧૬॥

અનાવૃષ્ટિભયે ચાસ્મિઞ્જાતે દ્વાદશવાર્ષિકે ।
અભિષિચ્ય પિતૂ રાજ્યે યાજયામાસ તં મુનિઃ ॥ ૧૭॥

મિષતાં દેવતાનાં ચ વસિષ્ઠસ્ય ચ કૌશિકઃ ।
સશરીરં તદા તં તુ દિવમારોહયત્પ્રભુઃ ॥ ૧૮॥

તસ્ય સત્યરથા નામ ભાર્યા કેકયવંશજા ।
કુમારં જનયામાસ હરિશ્ચન્દ્રમકલ્મષમ્ ॥ ૧૯॥

સ વૈ રાજા હરિશ્ચન્દ્રો ત્રૈશઙ્કવ ઇતિ સ્મૃતઃ ।
આહર્તા રાજસૂયસ્ય સમ્રાડિતિ હ વિશ્રુતઃ ॥ ૨૦॥

હરિશ્ચન્દ્રસ્ય હિ સુતો રોહિતો નામ વિશ્રુતઃ ।
રોહિતસ્ય વૃકઃ પુત્રો વૃકાદ્ બાહુસ્તુ જજ્ઞિવાન્ ॥ ૨૧॥

હૈહયાસ્તાલજઙ્ઘાશ્ચ નિરસ્યન્તિ સ્મ તં નૃપમ્ ।
નાત્યર્થં ધાર્મિકો વિપ્રાઃ સ હિ ધર્મયુગેઽભવત્ ॥ ૨૨॥

સગરં સ સુતં બાહુર્જજ્ઞે સહ ગરેણ વૈ ।
ઔર્વસ્યાશ્રમમાસાદ્ય ભાર્ગવેણાભિરક્ષિતઃ ॥ ૨૩॥

આગ્નેયમસ્ત્રં લબ્ધ્વા ચ ભાર્ગવાત્સગરો નૃપઃ ।
જિગાય પૃથિવીં હત્વા તાલજઙ્ઘાન્સ હૈહયાન ॥ ૨૪॥

શકાન્બહૂદકાંશ્ચૈવ પારદાન્સગણાન્ખશાન્ ।
સુધર્મં સ્થાપયામાસ શશાસ વૃષતઃ ક્ષિતિમ્ ॥ ૨૫॥

શૌનક ઉવાચ ।
સ વૈ ગરેણ સહિતઃ કથં જાતસ્તુ ક્ષત્રિયાત્ ।
જિતવાનેતદાચક્ષ્વ વિસ્તરેણ હિ સૂતજ ॥ ૨૬॥

સૂત ઉવાચ ।
પારીક્ષિતેન સમ્પૃષ્ટો વૈશમ્પાયન એવ ચ ।
યદાચષ્ટ સ્મ તદ્વક્ષ્યે શ૒ૃણુષ્વૈકમના મુને ॥ ૨૭॥

પરીક્ષિતોવાચ ।
કથં સ સગરો રાજા ગરેણ સહિતો મુને ।
જાતઃ સ જઘ્નિવાન્ભૂપાનેતદાખ્યાતુમર્હસિ ॥ ૨૮॥

વૈશમ્પાયન ઉવાચ ।
બાહોર્વ્યસનિનસ્તાતહૃતં રાજ્યમભૂત્કિલ ।
હૈહયૈસ્તાલજઙ્ઘૈશ્ચ શકૈઃ સાર્ધં વિશામ્પતે ॥ ૨૯॥

યવનાઃ પારદાશ્ચૈવ કામ્બોજાઃ પાહ્લવાસ્તથા ।
બહૂદકાશ્ચ પઞ્ચૈવ ગણાઃ પ્રોક્તાશ્ચ રક્ષસામ્ ॥ ૩૦॥

એતે પઞ્ચ ગણા રાજન્ હૈહયાર્થેષુ રક્ષસામ્ ।
કૃત્વા પરાક્રમાન્ બાહો રાજ્યં તેભ્યો દદુર્બલાત્ ॥ ૩૧॥

હતરાજ્યસ્તતો રાજા સ વૈ બાહુર્વનં યયૌ ।
પત્ન્યા ચાનુગતો દુઃખી સ વૈ પ્રાણાનવાસૃજત્ ॥ ૩૨॥

પત્ની યા યાદવી તસ્ય સગર્ભા પૃષ્ઠતો ગતા ।
સપત્ન્યા ચ ગરસ્તસ્યૈ દત્તઃ પૂર્વસુતેર્ષ્યયા ॥ ૩૩॥

સા તુ ભર્તુશ્ચિતાં કૃત્વા જ્વલનં ચાવરોહત ।
ઔર્વસ્તાં ભાર્ગવો રાજન્કારુણ્યાત્સમવારયત્ ॥ ૩૪॥

તસ્યાશ્રમે સ્થિતા રાજ્ઞી ગર્ભરક્ષણહેતવે ।

સિષેવે મુનિવર્યં તં સ્મરન્તી શઙ્કરં હૃદા ॥ ૩૫॥

એકદા ખલુ તદ્ ગર્ભો ગરેણૈવ સહ ચ્યુતઃ ।
સુમુહૂર્ત્તે સુલગ્ને ચ પઞ્ચોચ્ચગ્રહસંયુતે ॥ ૩૬॥

તસ્મિઁલ્લગ્ને ચ બલિનિ સર્વથા મુનિસત્તમ ।
વ્યજાયત મહાબાહુઃ સગરો નામ પાર્થિવઃ ॥ ૩૭॥

ઔર્વસ્તુ જાતકર્માદિ તસ્ય કૃત્વા મહાત્મનઃ ।
અધ્યાપ્ય વેદશાસ્ત્રાણિ તતોઽસ્ત્રં પ્રત્યપાદયત્ ॥ ૩૮॥

આગ્નેયં તં મહાભાગો હ્યમરૈરપિ દુઃસહમ્ ।
જગ્રાહ વિધિના પ્રીત્યા સગરોઽસૌ નૃપોત્તમઃ ॥ ૩૯॥

સ તેનાસ્ત્રબલેનૈવ બલેન ચ સમન્વિતઃ ।
હૈહયાન્વિજઘાનાશુ સઙ્ક્રુદ્ધોઽસ્ત્રબલેન ચ ॥ ૪૦॥

આજહાર ચ લોકેષુ કીર્તિં કીર્તિમતાં વરઃ ।
ધર્મં સંસ્થાપયામાસ સગરોઽસૌ મહીતલે ॥ ૪૧॥

તતઃ શકાઃ સયવનાઃ કામ્બોજાઃ પાહ્લવાસ્તથા ।
હન્યમાનાસ્તદા તે તુ વસિષ્ઠં શરણં યયુઃ ॥ ૪૨॥

વસિષ્ઠો વઞ્ચનાં કૃત્વા સમયેન મહાદ્યુતિઃ ।
સગરં વારયામાસ તેષાં દત્વાભયં નૃપમ્ ॥ ૪૩॥

સગરઃ સ્વાં પ્રતિજ્ઞાં તુ ગુરોર્વાક્યં નિશમ્ય ચ ।
ધર્મં જઘાન તેષાં વૈ કેશાન્યત્વં ચકાર હ ॥ ૪૪॥

અર્ધં શકાનાં શિરસો મુણ્ડં કૃત્વા વ્યસર્જયત્ ।
યવનાનાં શિરઃ સર્વં કામ્બોજાનાં તથૈવ ચ ॥ ૪૫॥

પારદા મુણ્ડકેશાશ્ચ પાહ્લવાશ્શ્મશ્રુધારિણઃ ।
નિઃસ્વાધ્યાયવષટ્કારાઃ કૃતાસ્તેન મહાત્મના ॥ ૪૬॥

જિતા ચ સકલા પૃથ્વી ધર્મતસ્તેન ભૂભુજા ।
સર્વે તે ક્ષત્રિયાસ્તાત ધર્મહીનાઃ કૃતાઃ પુરા ॥ ૪૭॥

સ ધર્મવિજયી રાજા વિજિત્વેમાં વસુન્ધરામ્ ।
અશ્વં સંસ્કારયામાસ વાજિમેધાય પાર્થિવઃ ॥ ૪૮॥

તસ્ય ચારયતઃ સોઽશ્વઃ સમુદ્રે પૂર્વદક્ષિણે ।
ગતઃ ષષ્ટિસહસ્રૈસ્તુ તત્પુત્રૈરન્વિતો મુને ॥ ૪૯॥

દેવરાજેન શક્રેણ સોઽશ્વો હિ સ્વાર્થસાધિના ।
વેલાસમીપેઽપહૃતો ભૂમિં ચૈવ પ્રવેશિતઃ ॥ ૫૦॥

મહારાજોઽથ સગરસ્તદ્ધયાન્વેષણાય ચ ।
સ તં દેશં તદા પુત્રૈઃ ખાનયામાસ સર્વતઃ ॥ ૫૧॥

આસેદુસ્તે તતસ્તત્ર ખન્યમાને મહાર્ણવે ।
તમાદિપુરુષં દેવં કપિલં વિશ્વરૂપિણમ્ ॥ ૫૨॥

તસ્ય ચક્ષુઃસમુત્થેન વહ્નિના પ્રતિબુધ્યતઃ ।
દગ્ધાઃ ષષ્ટિસહસ્રાણિ ચત્વારસ્ત્વવશેષિતાઃ ॥ ૫૩॥

હર્ષકેતુઃ સુકેતુશ્ચ તથા ધર્મરથોપરઃ ।
શૂરઃ પઞ્ચજનશ્ચૈવ તસ્ય વંશકરા નૃપાઃ ॥ ૫૪॥

પ્રાદાચ્ચ તસ્મૈ ભગવાન્ હરિઃ પઞ્ચ વરાન્સ્વયમ્ ।
વંશં મેધાં ચ કીર્તિં ચ સમુદ્રં તનયં ધનમ્ ॥ ૫૫॥

સાગરત્વં ચ લેભે સ કર્મણા તસ્ય તેન વૈ ।
તં ચાશ્વમેધિકં સોઽશ્વં સમુદ્રાદુપલબ્ધવાન્ ॥ ૫૬॥

આજહારાશ્વમેધાનાં શતં સ તુ મહાયશાઃ ।
ઈજે શમ્ભુવિભૂતીશ્ચ દેવતાસ્તત્ર સુવ્રતાઃ ॥ ૫૭॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં સત્યવ્રતાદિસગરપર્યન્તવંશવર્ણનં નામાષ્ટત્રિંશોઽધ્યાયઃ ॥ ૫.૩૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૩૯. એકોનચત્વારિંશોઽધ્યાયઃ । વૈવસ્વતવંશોદ્ભવરાજવર્ણનમ્ ।

શૌનક ઉવાચ ।
સગરસ્યાત્મજા વીરાઃ કથં જાતા મહાબલાઃ ।
વિક્રાન્તાઃ ષષ્ટિસાહસ્રા વિધના કેન વા વદ ॥ ૧॥

સૂત ઉવાચ ।
દ્વે પત્ન્યૌ સગરસ્યાસ્તાં તપસા દગ્ધકિલ્વિષે ।
ઔર્વસ્તયોર્વરં પ્રાદાત્તોષિતો મુનિસત્તમઃ ॥ ૨॥

ષષ્ટિપુત્રસહસ્રાણિ એકા વવ્રે તરસ્વિનામ્ ।
એકં વંશકરં ત્વેકા યથેષ્ટં વરશાલિની ॥ ૩॥

તત્રૈવાગત્ય તાંલ્લબ્ધ્વા પુત્રાન્ શૂરાન્બહૂંસ્તદા ।
સા ચૈવ સુષુવે તુમ્બં બીજપૂર્ણં પૃથક્ કૃતમ્ ॥ ૪॥

તે સર્વે હિ સ્વધાત્રીભિર્વવૃધુશ્ચ યથાક્રમમ્ ।
ઘૃતપૂર્ણેષુ કુમ્ભેષુ કુમારાઃ પ્રીતિવર્દ્ધનાઃ ॥ ૫॥

કપિલાગ્નિપ્રદગ્ધાનાં તેષાં તત્ર મહાત્મનામ્ ।
એકઃ પઞ્ચજનો નામ પુત્રો રાજા બભૂવ હ ॥ ૬॥

તતઃ પઞ્ચજનસ્યાસીદંશુમાન્નામ વીર્યવાન્ ।
દિલીપસ્તનયસ્તસ્ય પુત્રો યસ્ય ભગીરથઃ ॥ ૭॥

યસ્તુ ગઙ્ગા સરિચ્છ્રેષ્ઠામવાતારયત પ્રભુઃ ।
સમુદ્રમાનયચ્ચેમાં દુહિતૃત્વમકલ્પયત્ ॥ ૮॥

ભગીરથસુતો રાજા શ્રુતસેન ઇતિ શ્રુતઃ ।
નાભાગસ્તુ સુતસ્તસ્ય પુત્રઃ પરમધાર્મિકઃ ॥ ૯॥

અમ્બરીષસ્તુ નાભાગિઃ સિન્ધુદ્વીપસ્તતોઽભવત્ ।
અયુતાજિત્તુ દાયાદઃ સિન્ધુદ્વીપસ્ય વીર્યવાન્ ॥ ૧૦॥

આયુતાજિત્સુતસ્ત્વાસીદ્ ઋતુપર્ણો મહાયશાઃ ।
દિવ્યાક્ષહૃદયજ્ઞોઽસૌ રાજા નલસખોઽભવત્ ॥ ૧૧॥

ઋતુપર્ણસુતસ્ત્વાસીદનુપર્ણો મહાદ્યુતિઃ ।
તસ્ય કલ્માષપાદો વૈ નામ્ના મિત્રસહસ્તથા ॥ ૧૨॥

કલ્માષપાદસ્ય સુતઃ સર્વકર્મેતિ વિશ્રુતઃ ।
અનરણ્યસ્તુ પુત્રોઽભૂદ્વિશ્રુતઃ સર્વશર્મણઃ ॥ ૧૩॥

અનરણ્યસુતો રાજા વિદ્વાન્મુણ્ડિદ્રુહોઽભવત્ ।
નિષધસ્તસ્ય તનયો રતિઃ ખટ્વાઙ્ગ ઇત્યપિ ॥ ૧૪॥

યેન સ્વર્ગાદિહાગત્ય મુહૂર્તં પ્રાપ્ય જીવિતમ્ ।

ત્રયોઽપિ સઞ્ચિતા લોકા બુદ્ધ્યા સત્યેન ચાનઘ ॥ ૧૫॥

દીર્ઘબાહુઃ સુતસ્તસ્ય રઘુસ્તસ્યાભવત્સુતઃ ।
અજસ્તસ્ય તુ પુત્રોઽભૂત્તસ્માદ્દશરથોઽભવત્ ॥ ૧૬॥

રામો દશરથાજ્જજ્ઞે ધર્માત્મા યો મહાયશાઃ ।
સ વિષ્ણ્વંશો મહાશૈવઃ પૌલસ્ત્યો યેન ઘાતિતઃ ॥ ૧૭॥

તચ્ચરિત્રં ચ બહુધા પુરાણેષુ પ્રવર્ણિતમ્ ।
રામાયણે પ્રસિદ્ધં હિ નાતઃ પ્રોક્તં તુ વિસ્તરાત્ ॥ ૧૮॥

રામસ્ય તનયો જજ્ઞે કુશ ઇત્યપિ વિશ્રુતઃ ।
અતિથિસ્તુ કુશાજ્જજ્ઞે નિષધસ્તસ્ય ચાત્મજઃ ॥ ૧૯॥

નિષધસ્ય નલઃ પુત્રો નભઃ પુત્રો નલસ્ય તુ ।
નભસઃ પુણ્ડરીકશ્ચ ક્ષેમધન્વા તતઃ સ્મૃતઃ ॥ ૨૦॥

ક્ષેમધન્વસુતસ્ત્વાસીદ્દેવાનીકઃ પ્રતાપવાન્ ।
આસીદહીનગુર્નામ દેવાનીકાત્મજઃ પ્રભુઃ ॥ ૨૧॥

અહીનગોસ્તુ દાયાદઃ સહસ્વાન્નામ વીર્યવાન્ ।
વીરસેનાત્મજસ્તસ્ય યશ્ચેક્ષ્વાકુકુલોદ્ભવઃ ॥ ૨૨॥

વીરસેનસ્ય દાયાદઃ પારિયાત્રો બભૂવ હ ।
તતો બલાખ્યસ્તનયઃ સ્થલસ્તસ્માદભૂત્સુતઃ ॥ ૨૩॥

અર્કાંશસમ્ભવસ્તસ્માત્પુત્રો યક્ષઃ પ્રતાપવાન્ ।
તત્સુતસ્ત્વગુણસ્ત્વાસીત્તસ્માદ્વિધૃતિરાત્મજઃ ॥ ૨૪॥

હિરણ્યનાભસ્તત્પુત્રો યોગાચાર્યો બભૂવ હ ।
સ શિષ્યો જૈમિનિમુનેર્હ્યાત્મવિદ્યાવિશારદઃ ॥ ૨૫॥

કૌશલ્યો યાજ્ઞવલ્ક્યોઽથ યોગમધ્યાત્મસંજ્ઞકમ્ ।
યતોઽધ્યગાન્નૃપવરાદ્ હૃદયગ્રન્થિભેદનમ્ ॥ ૨૬॥

તત્સુતો પુષ્યનામા હિ ધ્રુવસંજ્ઞસ્તદાત્મજઃ ।
અગ્નિવર્ણઃ સુતસ્તસ્ય શીઘ્રનામા સુતસ્તતઃ ॥ ૨૭॥

મરુન્નામા સુતસ્તસ્ય યોગસિદ્ધો બભૂવ હ ।
અસાવાસ્તેઽદ્યાપિ પ્રભુઃ કલાપગ્રામસંજ્ઞકે ॥ ૨૮॥

તદ્વાસિભિશ્ચ મુનિભિઃ કલેસ્ન્તે સ એવ હિ ।
પુનર્ભાવયિતા નષ્ટં સૂર્યવંશં વિશેષતઃ ॥ ૨૯॥

પૃથુશ્રુતશ્ચ તત્પુત્રઃ સન્ધિસ્તસ્ય સુતઃ સ્મૃતઃ ।
અમર્ષણઃ સુતસ્તસ્ય મરુત્વાંસ્તત્સુતોઽભવત્ ॥ ૩૦॥

વિશ્વસાહ્વઃ સુતસ્તસ્ય તત્સુતોઽભૂત્પ્રસેનજિત્ ।
તક્ષકસ્તસ્ય તનયઃ તત્સુતો હિ બૃહદ્બલઃ ॥ ૩૧॥

એત ઇક્ષ્વાકુવંશીયા અતીતાઃ સમ્પ્રકીર્તિતાઃ ।
શ઼ૃણુતાનાગતાન્ભૂપાંસ્તદ્વંશ્યાન્ધર્મવિત્તમાન્ ॥ ૩૨॥

બૃહદ્બલસ્ય તનયો ભવિતા હિ બૃહદ્રણઃ ।
બૃહદ્રણસુતસ્તસ્યોરુક્રિયો હિ ભવિષ્યતિ ॥ ૩૩॥

વત્સવૃદ્ધઃ સુતસ્તસ્ય પ્રતિવ્યોમા સુતસ્તતઃ ।
ભાનુસ્તત્તનયો ભાવી દિવાકો વાહિનીપતિઃ ॥ ૩૪॥

સહદેવઃ સુતસ્તસ્ય મહાવીરો ભવિષ્યતિ ।
તત્સુતો બૃહદશ્વો હિ ભાનુમાંસ્તત્સુતો બલી ॥ ૩૫॥

સુતો ભાનુમતો ભાવી પ્રતીકાશ્વશ્ચ વીર્યવાન્ ।
સુપ્રતીકઃ સુતસ્તસ્ય ભવિષ્યતિ નૃપોત્તમઃ ॥ ૩૬॥

મરુદેવઃ સુતસ્તસ્ય સુનક્ષત્રો ભવિષ્યતિ ।
તત્સુતઃ પુષ્કરસ્તસ્યાન્તરિક્ષસ્તત્સુતો દ્વિજાઃ ॥ ૩૭॥

સુતપાસ્તત્સુતો વીરો મિત્રચિત્તસ્ય ચાત્મજઃ ।
બૃહદ્ભાજઃ સુતસ્તસ્ય બર્હિનામા તદાત્મજઃ ॥ ૩૮॥

કૃતઞ્જયઃ સુતસ્તસ્ય તત્સુતો હિ રણઞ્જયઃ ।
સઞ્જયસ્તુ મયસ્તસ્ય તસ્ય શાક્યો હિ ચાત્મજઃ ॥ ૩૯॥

શુદ્ધોદસ્તનયસ્તસ્ય લાઙ્ગલસ્તુ તદાત્મજઃ ।
તસ્ય પ્રસેનજિત્પુત્રસ્તત્સુતઃ શૂદ્રકાહ્વયઃ ॥ ૪૦॥

રુણકો ભવિતા તસ્ય સુરથસ્તત્સુતઃ સ્મૃતઃ ।
સુમિત્રસ્તત્સુતો ભાવી વંશનિષ્ઠાન્ત એવ હિ ॥ ૪૧॥

સુમિત્રાન્તોઽન્વયોઽયં વૈ ઇક્ષ્વાકૂણાં ભવિષ્યતિ ।
રાજ્ઞાં વૈચિત્રવીર્યાણાં ધર્મિષ્ઠાનાં સુકર્મણામ્ ॥ ૪૨॥

સુમિત્રં પ્રાપ્ય રાજાનં સ તદ્વંશઃ શુભઃ કલૌ ।
સંસ્થાં પ્રાપ્સ્યતિ તદ્બ્રાહ્મે વર્ધિષ્યતિ પુનઃ કૃતે ॥ ૪૩॥

એતદ્વૈવસ્વતે વંશે રાજાનો ભૂરિદક્ષિણાઃ ।
ઇક્ષ્વાકુવંશપ્રભવાઃ પ્રાધાન્યેન પ્રકીર્તિતાઃ ॥ ૪૪॥

પુણ્યેયં પરમા સૃષ્ટિરાદિત્યસ્ય વિવસ્વતઃ ।
શ્રાદ્ધદેવસ્ય દેવસ્ય પ્રજાનાં પુષ્ટિદસ્ય ચ ॥ ૪૫॥

પઠન્ શ઼ૃણ્વન્નિમાં સૃષ્ટિમાદિત્યસ્ય ચ માનવઃ ।
પ્રજાવાનેતિ સાયુજ્યમિહ ભુક્ત્વા સુખં પરમ્ ॥ ૪૬॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં વૈવસ્વતવંશોદ્ભવરાજવર્ણનં નામૈકોનચત્વારિંશોઽધ્યાયઃ ॥ ૫.૩૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૪૦. ચત્વારિંશોઽધ્યાયઃ । પિતૃપ્રભાવવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
ઇત્યાકર્ણ્ય શ્રાદ્ધદેવસૂર્યાન્વયમનુત્તમમ્ ।
પર્યપૃચ્છન્મુનિશ્રેષ્ઠઃ શૌનકઃ સૂતમાદરાત્ ॥ ૧॥

શૌનક ઉવાચ ।
સૂત સૂત ચિરઞ્જીવ વ્યાસશિષ્ય નમોઽસ્તુ તે ।
શ્રાવિતા પરમા દિવ્યા કથા પરમપાવની ॥ ૨॥

ત્વયા પ્રોક્તઃ શ્રાદ્ધદેવઃ સૂર્યઃ સદ્વંશવર્ધનઃ ।
સંશયસ્તત્ર મે જાતસ્તં બ્રવીમિ ત્વદગ્રતઃ ॥ ૩॥

કુતો વૈ શ્રાદ્ધદેવત્વમાદિત્યસ્ય વિવસ્વતઃ ।
શ્રોતુમિચ્છામિ તત્પ્રીત્યા છિન્ધિ મે સંશયં ત્વિમમ્ ॥ ૪॥

શ્રાદ્ધસ્યાપિ ચ માહાત્મ્યં તત્ફલં ચ વદ પ્રભો ।
પ્રીતાશ્ચ પિતરો યેન શ્રેયસા યોજયન્તિ તમ્ ॥ ૫॥

એતચ્ચ શ્રોતુમિચ્છામિ પિતૃણાં સર્ગમુત્તમમ્ ।
કથય ત્વં વિશેષેણ કૃપાં કુરુ મહામતે ॥ ૬॥

સૂત ઉવાચ ।
વચ્મિ તત્તેઽખિલં પ્રીત્યા પિતૃસર્ગં તુ શૌનક ।
માર્કણ્ડેયેન કથિતં ભીષ્માય પરિપૃચ્છતે ॥ ૭॥

ગીતં સનત્કુમારેણ માર્કણ્ડેયાય ધીમતે ।
તત્તેઽહં સમ્પ્રવક્ષ્યામિ સર્વકામફલપ્રદમ્ ॥ ૮॥

યુધિષ્ઠિરેણ સમ્પૃષ્ટો ભીષ્મો ધર્મભૃતાં વરઃ ।
શરશય્યાસ્થિતઃ પ્રોચે તચ્છૃણુષ્વ વદામિ તે ॥ ૯॥

યુધિષ્ઠિર ઉવાચ ।
પુષ્ટિકામેન પુંસાં વૈ કથં પુષ્ટિરવાપ્યતે ।
એતચ્છ્રોતું સમિચ્છામિ કિં કુર્વાણો ન સીદતિ ॥ ૧૦॥

સૂત ઉવાચ ।
યુધિષ્ઠિરેણ સમ્પૃષ્ટં પ્રશ્નં શ્રુત્વા સ ધર્મવિત્ ।
ભીષ્મઃ પ્રોવાચ સુપ્રીત્યા સર્વેષાં શ◌ૃણ્વતાં વચઃ ॥ ૧૧॥

ભીષ્મ ઉવાચ ।
યે કુર્વન્તિ નરાઃ શ્રાદ્ધાન્યપિ પ્રીત્યા યુધિષ્ઠિર ।
શ્રાદ્ધૈઃ પ્રીણાતિ તત્સર્વં પિતૃણાં હિ પ્રસાદતઃ ॥ ૧૨॥

શ્રાદ્ધાનિ ચૈવ કુર્વન્તિ ફલકામાઃ સદા નરાઃ ।
અભિસન્ધાય પિતરં પિતુશ્ચ પિતરં તથા ॥ ૧૩॥

પિતુઃ પિતામહઞ્ચૈવ ત્રિષુ પિણ્ડેષુ નિત્યદા ।
પિતરો ધર્મકામસ્ય પ્રજાકામસ્ય ચ પ્રજામ્ ॥ ૧૪॥

પુષ્ટિકામસ્ય પુષ્ટિં ચ પ્રયચ્છન્તિ યુધિષ્ઠિર ॥ ૧૫॥

યુધિષ્ઠિર ઉવાચ ।
વર્તન્તે પિતરઃ સ્વર્ગે કેષાઞ્ચિન્નરકે પુનઃ ।
પ્રાણિનાં નિયતં ચાપિ કર્મજં ફલમુચ્યતે ॥ ૧૬॥

તાનિ શ્રાદ્ધાનિ દત્તાનિ કથં ગચ્છન્તિ વૈ પિતૄન્ ।
કથં શક્તાસ્તમાહર્તું નરકસ્થાઃ ફલં પુનઃ ॥ ૧૭॥

દેવા અપિ પિતૄન્સ્વર્ગે યજન્ત ઇતિ મે શ્રુતમ્ ।
એતદિચ્છામ્યહં શ્રોતું વિસ્તરેણ બ્રવીહિ મે ॥ ૧૮॥

ભીષ્મ ઉવાચ ।
અત્ર તે કીર્તયિષ્યામિ યથા શ્રુતમરિન્દમ ।
પિત્રા મમ પુરા ગીતં લોકાન્તરગતેન વૈ ॥ ૧૯॥

શ્રાદ્ધકાલે મમ પિતુર્મયા પિણ્ડઃ સમુદ્યતઃ ।
મત્પિતા મમ હસ્તેન ભિત્ત્વા ભૂમિમયાચત ॥ ૨૦॥

નૈષ કલ્પવિધિર્દૃષ્ટ ઇતિ નિશ્ચિત્ય ચાપ્યહમ્ ।
કુશેષ્વેવ તતઃ પિણ્ડં દત્તવાનવિચારયન્ ॥ ૨૧॥

તતઃ પિતા મે સન્તુષ્ટો વાચા મધુરયા તદા ।
ઉવાચ ભરતશ્રેષ્ઠ પ્રીયમાણો મયાનઘ ॥ ૨૨॥

ત્વયા દાયાદવાનસ્મિ ધર્મજ્ઞેન વિપશ્ચિતા ।
તારિતોઽહં તુ જિજ્ઞાસા કૃતા મે પુરુષોત્તમ ॥ ૨૩॥

પ્રમાણં યદ્ધિ કુરુતે ધર્માચારેણ પાર્થિવઃ ।
પ્રજાસ્તદનુવર્તન્તે પ્રમાણાચરિતં સદા ॥ ૨૪॥

શ઼ૃણુ ત્વં ભરતશ્રેષ્ઠ વેદધર્માંશ્ચ શાશ્વતાન્ ।
પ્રમાણં વેદધર્મસ્ય પુત્ર નિર્વર્ત્તિતં ત્વયા ॥ ૨૫॥

તસ્માત્તવાહં સુપ્રીતઃ પ્રીત્યા વરમનુત્તમમ્ ।
દદામિ ત્વં પ્રતીચ્છસ્વ ત્રિષુ લોકેષુ દુર્લભમ્ ॥ ૨૬॥

ન તે પ્રભવિતા મૃત્યુર્યાવજ્જીવિતુમિચ્છસિ ।
ત્વત્તોઽભ્યનુજ્ઞાં સમ્પ્રાપ્ય મૃત્યુઃ પ્રભવિતા પુનઃ ॥ ૨૭॥

કિં વા તે પ્રાર્થિતં ભૂયો દદામિ વરમુત્તમમ્ ।
તદ્ બ્રૂહિ ભરતશ્રેષ્ઠ યત્તે મનસિ વર્તતે ॥ ૨૮॥

ઇત્યુક્તવતિ તસ્મિંસ્તુ અભિવાદ્ય કૃતાઞ્જલિઃ ।
અવોચં કૃતકૃત્યોઽહં પ્રસન્ને ત્વયિ માનદ ।
પ્રશ્નં પૃચ્છામિ વૈ કઞ્ચિદ્વાચ્યઃ સ ભવતા સ્વયમ્ ॥ ૨૯॥

સ મામુવાચ તદ્ બ્રૂહિ યદીચ્છસિ વદામિ તે ।
ઇત્યુક્તેન મયા તત્ર પૃષ્ટઃ પ્રોવાચ તં નૃપઃ ॥ ૩૦॥

શન્તનુરુવાચ ।
શ‍ૃણુ તાત પ્રવક્ષ્યામિ પ્રશ્નં તેઽહં યથાર્થતઃ ।
પિતૃકલ્પં ચ નિખિલં માર્કણ્ડેયેન મે શ્રુતમ્ ॥ ૩૧॥

યત્ત્વં પૃચ્છસિ માં તાત તદેવાહં મહામુનિમ્ ।
માર્કણ્ડેયમપૃચ્છં હિ સ માં પ્રોવાચ ધર્મવિત્ ॥ ૩૨॥

માર્કણ્ડેય ઉવાચ ।
શ‍ૃણુ રાજન્મયા દૃષ્ટં કદાચિત્પશ્યતા દિવમ્ ।
વિમાનં મહદાયાન્તમન્તરેણ ગિરેસ્તદા ॥ ૩૩॥

તસ્મિન્વિમાને પર્યઙ્કં જ્વલિતાઙ્ગારવર્ચસમ્ ।
મહાતેજઃ પ્રજ્વલન્તં નિર્વિશેષં મનોહરમ્ ॥ ૩૪॥

અપશ્યં ચૈવ તત્રાહં શયાનં દીપ્તતેજસમ્ ।
અઙ્ગુષ્ઠમાત્રં પુરુષમગ્નાવગ્નિમિવાહિતમ્ ॥ ૩૫॥

સોઽહં તસ્મૈ નમઃ કૃત્વા પ્રણમ્ય શિરસા પ્રભુમ્ ।
અપૃચ્છં ચૈવ તમહં વિધામ ત્વાં કથં વિભો ॥ ૩૬॥

સ મામુવાચ ધર્માત્મા તે ન તદ્વિધતે તપઃ ।
યેન ત્વં બુધ્યસે માં હિ મુને વૈ બ્રહ્મણઃ સુતમ્ ॥ ૩૭॥

સનત્કુમારમિતિ માં વિદ્ધિ કિં કરવાણિ તે ।
યે ત્વન્યે બ્રહ્મણઃ પુત્રાઃ કનીયાંસસ્તુ તે મમ ॥ ૩૮॥

ભ્રાતરઃ સપ્ત દુર્ધર્ષા યેષાં વંશાઃ પ્રતિષ્ઠિતાઃ ।
વયં તુ યતિધર્માણઃ સંયમ્યાત્માનમાત્મનિ ॥ ૩૯॥

યથોત્પન્નસ્તથૈવાહં કુમાર ઇતિ વિશ્રુતઃ ।
તસ્માત્સનત્કુમારં મે નામૈતત્કથિતં મુને ॥ ૪૦॥

યદ્ભક્ત્યા તે તપશ્ચીર્ણં મમ દર્શનકાઙ્ક્ષયા ।
એષ દૃષ્ટોઽસ્મિ ભદ્રં તે કં કામં કરવાણિ તે ॥ ૪૧॥

ઇત્યુક્તવન્તં તં ચાહં પ્રાવોચં ત્વં શ‍ૃણુ પ્રભો ।
પિતૃણામાદિસર્ગં ચ કથયસ્વ યથાતથમ્ ॥ ૪૨॥

ઇત્યુક્તઃ સ તુ માં પ્રાહ શ‍ૃણુ સર્વં યથાતથમ્ ।
વચ્મિ તે તત્ત્વતસ્તાત પિતૃસર્ગં શુભાવહમ્ ॥ ૪૩॥

સનત્કુમાર ઉવાચ ।
દેવાન્પુરાસૃજદ્બ્રહ્મા માં યક્ષ્ધ્વં સ ચાહ તાન્ ।
તમુત્સૃજ્ય તમાત્માનમયજંસ્તે ફલાર્થિનઃ ॥ ૪૪॥

તે શપ્તા બ્રહ્મણા મૂઢા નષ્ટસંજ્ઞા ભવિષ્યથ ।
તસ્માત્કિઞ્ચિદજાનન્તો નષ્ટસંજ્ઞાઃ પિતામહમ્ ॥ ૪૫॥

પ્રોચુસ્તં પ્રણતાઃ સર્વે કુરુષ્વાનુગ્રહં હિ નઃ ।
ઇત્યુક્તસ્તાનુવાચેદં પ્રાયશ્ચિત્તાર્થમેવ હિ ॥ ૪૬॥

પુત્રાન્સ્વાન્પરિપૃચ્છધ્વં તતો જ્ઞાનમવાપ્સ્યથ ।
ઇત્યુક્તા નષ્ટસંજ્ઞાસ્તે પુત્રાન્પપ્રચ્છુરોજસા ॥ ૪૭॥

પ્રાયશ્ચિત્તાર્થમેવાધિલબ્ધસંજ્ઞા દિવૌકસઃ ।
ગમ્યતાં પુત્રકા એવં પુત્રૈરુક્તાશ્ચ તેઽનઘ ॥ ૪૮॥

અભિશપ્તાસ્તુ તે દેવાઃ પુત્રકામેન વેધસમ્ ।
પપ્રચ્છુરુક્તાઃ પુત્રૈસ્તે ગતાસ્તે પુત્રકા ઇતિ ॥ ૪૯॥

તતસ્તાનબ્રવીદ્દેવો દેવાન્બ્રહ્મા સસંશયાન્ ।
શ‍ૃણુધ્વં નિર્જરાઃ સર્વે યૂયં ન બ્રહ્મવાદિનઃ ॥ ૫૦॥

તસ્માદ્યદુક્તં યુષ્માકં પુત્રૈસ્તૈર્જ્ઞાનિસત્તમૈઃ ।
મન્તવ્યં સંશયં ત્યક્ત્વા તથા ન ચ તદન્યથા ॥ ૫૧॥

દેવાશ્ચ પિતરશ્ચૈવ યજધ્વં ત્રિદિવૌકસઃ ।
પરસ્પરં મહાપ્રીત્યા સર્વકામફલપ્રદાઃ ॥ ૫૨॥

સનત્કુમાર ઉવાચ ।
તતસ્તે છિન્નસન્દેહાઃ પ્રીતિમન્તઃ પરસ્પરમ્ ।
બભૂવુર્મુનિશાર્દૂલ બ્રહ્મવાક્યાત્સુખપ્રદાઃ ॥ ૫૩॥

તતો દેવા હિ પ્રોચુસ્તાન્યદુક્તાઃ પુત્રકા વયમ્ ।
તસ્માદ્ભવન્તઃ પિતરો ભવિષ્યથ ન સંશયઃ ॥ ૫૪॥

પિતૃશ્રાદ્ધે ક્રિયાં કશ્ચિત્કરિષ્યતિ ન સંશયઃ ।
શ્રાદ્ધૈરાપ્યાયિતઃ સોમો લોકાનાપ્યાયયિષ્યતિ ॥ ૫૫॥

સમુદ્રં પર્વતવનં જઙ્ગમાજઙ્ગમૈર્વૃતમ્ ।
શ્રાદ્ધાનિ પુષ્ટિકામાશ્ચ યે કરિષ્યન્તિ માનવાઃ ॥ ૫૬॥

તેભ્યઃ પુષ્ટિપ્રદાશ્ચૈવ પિતરઃ પ્રીણિતાઃ સદા ।
શ્રાદ્ધે યે ચ પ્રદાસ્યન્તિ ત્રીન્પિણ્ડાન્નામગોત્રતઃ ॥ ૫૭॥

સર્વત્ર વર્તમાનાસ્તે પિતરઃ પ્રપિતામહાઃ ।
ભાવયિષ્યન્તિ સતતં શ્રાદ્ધદાનેન તર્પિતાઃ ॥ ૫૮॥

ઇતિ તદ્વચનં સત્યં ભવત્વથ દિવૌકસઃ ।
પુત્રાશ્ચ પિતરશ્ચૈવ વયં સર્વે પરસ્પરમ્ ॥ ૫૯॥

એવં તે પિતરો દેવા ધર્મતઃ પુત્રતાં ગતાઃ ।
અન્યોઽન્યં પિતરો વૈ તે પ્રથિતાઃ ક્ષિતિમણ્ડલે ॥ ૬૦॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં શ્રાદ્ધકલ્પે પિતૃપ્રભાવવર્ણનં નામ ચત્વારિંશોઽધ્યાયઃ ॥ ૫.૪૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૪૧. એકચત્વારિંશોઽધ્યાયઃ । સપ્તવ્યાધગતિવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
સપ્ત તે તપતાં શ્રેષ્ઠ સ્વર્ગે પિતૃગણાઃ સ્મૃતાઃ ।
ચત્વારો મૂર્ત્તિમન્તો વૈ ત્રયશ્ચૈવ હ્યમૂર્તયઃ ॥ ૧॥

તાન્યજન્તે દેવગણા આદ્યા વિપ્રાદયસ્તથા ।
આપ્યાયયન્તિ તે પૂર્વં સોમં યોગબલેન વૈ ॥ ૨॥

તસ્માચ્છ્રાદ્ધાનિ દેયાનિ યોગિનાં તુ વિશેષતઃ ।
સર્વેષાં રાજતં પાત્રમથવા રજતાન્વિતમ્ ॥ ૩॥

દત્તં સ્વધાં પુરોધાય શ્રાદ્ધં પ્રીણાતિ વૈ પિતૄન્ ।
વહ્નેરાપ્યાયનં કૃત્વા સોમસ્ય તુ યમસ્ય વૈ ॥ ૪॥

ઉદગાયનમપ્યગ્નાવગ્ન્યભાવેઽપ્સુ વા પુનઃ ।
પિતૄન્પ્રીણાતિ યો ભક્ત્યા પિતરઃ પ્રીણયન્તિ તમ્ ॥ ૫॥

યચ્છન્તિ પિતરઃ પુષ્ટિં પ્રજાશ્ચ વિપુલાસ્તથા ।
સ્વર્ગમારોગ્યવૃદ્ધિં ચ યદન્યદપિ ચેપ્સિતમ્ ॥ ૬॥

દેવકાર્યાદપિ મુને પિતૃકાર્યં વિશિષ્યતે ।

પિતૃભક્તોऽસિ વિપ્રર્ષે તેન ત્વમજરામરઃ ॥ ૭॥

ન યોગેન ગતિઃ સા તુ પિતૃભક્તસ્ય યા મુને ।
પિતૃભક્તિર્વિશેષેણ તસ્માત્કાર્યા મહામુને ॥ ૮॥

માર્કણ્ડેય ઉવાચ ।
એવમુક્ત્વાશુ દેવેશો દેવાનામપિ દુર્લભમ્ ।
ચક્ષુર્દત્ત્વા સવિજ્ઞાનં જગામ યૌગિકીં ગતિમ્ ॥ ૯॥

શ◌ૃણુ ભીષ્મ પુરા ભૂયો ભારદ્વાજાત્મજા દ્વિજાઃ ।
યોગધર્મમનુપ્રાપ્ય ભ્રષ્ટા દુશ્ચરિતેન વૈ ॥ ૧૦॥

વાગ્દુષ્ટઃ ક્રોધનો હિંસ્રઃ પિશુનઃ કવિરેવ ચ ।
ખસૃષઃ પિતૃવર્તી ચ નામભિઃ કર્મભિસ્તથા ॥ ૧૧॥

કૌશિકસ્ય સુતાસ્તાત શિષ્યા ગર્ગસ્ય ચાભવન્ ।
પિતર્યુપરતે સર્વે પ્રવસન્તસ્તદાભવન્ ॥ ૧૨॥

વિનિયોગાદ્ ગુરોસ્તસ્ય ગાં દોગ્ધ્રીં સમકાલયન્ ।
સમાનવત્સાં કપિલાં સર્વેऽન્યાયાગતાસ્તદા ॥ ૧૩॥

તેષાં પથિ ક્ષુધાર્તાનાં બાલ્યાન્મોહાચ્ચ ભારત ।
ક્રૂરા બુદ્ધિઃ સમુત્પન્ના તાં ગાં વૈ હિંસિતું તદા ॥ ૧૪॥

તાં કવિઃ ખસૃપશ્ચૈવ યાચેતે નૈતિ વૈ તદા ।
ન ચાશક્યાસ્તુ તાભ્યાં વા તદા વારયિતું નિજાઃ ॥ ૧૫॥

પિતૃવર્તી તુ યસ્તેષાં નિત્યં શ્રાદ્ધાહ્નિકો દ્વિજઃ ।
સ સર્વાનબ્રવીત્કોપાત્ પિતૃભક્તિસમન્વિતઃ ॥ ૧૬॥

યદ્યશક્યં પ્રકર્તવ્યં પિતૃનુદ્દિશ્ય સાધ્યતામ્ ।
પ્રકુર્વન્તો હિ શ્રાદ્ધં તુ સર્વ એવ સમાહિતાઃ ॥ ૧૭॥

એવમેષા ચ ગૌર્ધર્મં પ્રાપ્સ્યતે નાત્ર સંશયઃ ।
પિતૃનભ્યર્ચ્ય ધર્મેણ નાધર્મો નો ભવિષ્યતિ ॥ ૧૮॥

એવમુક્તાશ્ચ તે સર્વે પ્રોક્ષયિત્વા ચ ગાં તદા ।
પિતૃભ્યઃ કલ્પયિત્વા તુ હ્યુપાયુઞ્જત ભારત ॥ ૧૯॥

ઉપયુજ્ય ચ ગાં સર્વે ગુરોસ્તસ્ય ન્યવેદયન્ ।
શાર્દૂલેન હતા ધેનુર્વત્સા વૈ ગૃહ્યતામિતિ ॥ ૨૦॥

આર્જવાત્સ તુ તં વત્સં પ્રતિજગ્રાહ વૈ દ્વિજઃ ।
મિથ્યોપચારતઃ પાપમભૂત્તેષાં ચ ગોઘ્નતામ્ ॥ ૨૧॥

તતઃ કાલેન કિયતા કાલધર્મમુપાગતાઃ ।
તે સપ્ત ભ્રાતરસ્તાત બભૂવુઃ સ્વાયુષઃ ક્ષયે ॥ ૨૨॥

તે વૈ ક્રૂરતયા હૈંસ્ર્યાત્સ્વાનાર્યત્વાદ્ ગુરોસ્તથા ।
ઉગ્રહિંસાવિહારાશ્ચ જાતાઃ સપ્ત સહોદરાઃ ॥ ૨૩॥

લુબ્ધકસ્ય સુતાસ્તાવદ્ બલવન્તો મનસ્વિનઃ ।
જાતા વ્યાધા દશાર્ણેષુ સપ્ત ધર્મવિચક્ષણાઃ ॥ ૨૪॥

સ્વધર્મનિરતાઃ સર્વે મૃગા મોહવિવર્જિતાઃ ।
આસન્નુદ્વેગસંવિગ્ના રમ્યે કાલઞ્જરે ગિરૌ ॥ ૨૫॥

તમેવાર્થમનુધ્યાય જ્ઞાતિસ્મરણસમ્ભવમ્ ।
આસન્વનચરાઃ ક્ષાન્તા નિર્દ્વન્દ્વા નિષ્પરિગ્રહાઃ ॥ ૨૬॥

તે સર્વે શુભકર્માણઃ સદ્ધર્માણો વનેચરાઃ ।
વિધર્માચરણૈર્હીના જાતિસ્મરણસિદ્ધયઃ ॥ ૨૭॥

પૂર્વજાતિષુ યો ધર્મઃ શ્રુતો ગુરુકુલેષુ વૈ ।
તથૈવ ચાસ્થિતા બુદ્ધિઃ સંસારેઽપિ નિવર્તને ॥ ૨૮॥

ગિરિમધ્યે જહુઃ પ્રાણાઁલ્લબ્ધાહારાસ્તપસ્વિનઃ ।
તેષાં તુ પતિતાનાં ચ યાનિ સ્થાનાનિ ભારત ॥ ૨૯॥

તથૈવાદ્યાપિ દૃશ્યન્તે ગિરૌ કાલઞ્જરે નૃપ ।
કર્મણા તેન તે જાતાઃ શુભાશુભવિવર્જકાઃ ॥ ૩૦॥

શુભાચ્છુભતરાં યોનિં ચક્રવાકત્વમાગતાઃ ।
શુભે દેશે શરદ્વીપે સપ્તૈવાસઞ્જલૌકસઃ ॥ ૩૧॥

ત્યક્ત્વા સહચરીધર્મં મુનયો ધર્મધારિણઃ ।
નિઃસઙ્ગો નિર્મમશ્શાન્તો નિર્દ્વન્દ્વો નિષ્પરિગ્રહઃ ॥ ૩૨॥

નિવૃત્તિનિર્વૃતશ્ચૈવ શકુના નામતઃ સ્મૃતાઃ ।
તે બ્રહ્મચારિણઃ સર્વે શકુના ધર્મચારિણઃ ॥ ૩૩॥

જાતિસ્મરાઃ સુસંવૃદ્ધાઃ સપ્તૈવ બ્રહ્મચારિણઃ ।

સ્થિતા એકત્ર સદ્ધર્મા વિકારરહિતાઃ સદા ॥ ૩૪॥

વિપ્રયોનૌ તુ યન્મોહાન્મિથ્યાપચરિતં ગુરૌ ।
તિર્યગ્યોનૌ તથા જન્મ શ્રાદ્ધાજ્જ્ઞાનં ચ લેભિરે ॥ ૩૫॥

તથા તુ પિતૃકાર્યાર્થં કૃતં શ્રાદ્ધં વ્યવસ્થિતૈઃ ।
તદા જ્ઞાનં ચ જાતિં ચ ક્રમાત્પ્રાપ્તં ગુણોત્તરમ્ ॥ ૩૬॥

પૂર્વજાતિષુ યદ્બ્રહ્મ શ્રુતં ગુરુકુલેષુ વૈ ।
તથૈવ સંસ્થિત જ્ઞાનં તસ્માજ્જ્ઞાનં સમભ્યસેત્ ॥ ૩૭॥

સુમનાશ્ચ સુવાક્છુદ્ધઃ પઞ્ચમશ્છિદ્રદર્શકઃ ।
સ્વતન્ત્રશ્ચ સુયજ્ઞશ્ચ કુલીઙ્ગા નામતઃ સ્મૃતાઃ ॥ ૩૮॥

તેષાં તત્ર વિહઙ્ગાનાં ચરતાં ધર્મચારિણામ્ ।
સુવૃત્તમભવત્તત્ર તચ્છૃણુષ્વ મહામુને ॥ ૩૯॥

નીપાનામીશ્વરો રાજા પ્રભાવેણ સમન્વિતઃ ।
શ્રીમાનન્તઃપુરવૃતો વનં તત્રાવિવેશ હ ॥ ૪૦॥

સ્વતન્ત્રશ્ચક્રવાકઃ સ સ્પૃહયામાસ તં નૃપમ્ ।
દૃષ્ટ્વા યાન્તં સુખોપેતં રાજ્યશોભાસમન્વિતમ્ ॥ ૪૧॥

યદ્યસ્તિ સુકૃતં કિઞ્ચિત્તપો વા નિયમોઽપિ વા ।
ખિન્નોઽહમુપવાસેન તપસા નિશ્ચલેન ચ ॥ ૪૨॥

તસ્ય સર્વસ્ય પૂર્ણેન ફલેનાપિ કૃતેન હિ ।
સર્વસૌભાગ્યપાત્રશ્ચ ભવેયમહમીદૃશઃ ॥ ૪૩॥

માર્કણ્ડેય ઉવાચ ।
તતસ્તુ ચક્રવાકૌ દ્વાવાસતુઃ સહચારિણૌ ।
આવાં વૈ સચિવૌ સ્યાવ તવ પ્રિયહિતૈષિણૌ ॥ ૪૪॥

તથેત્યુક્ત્વા તુ તસ્યાસીત્તદા યોગાત્મનો ગતિઃ ।
એવં તૌ ચક્રવાકૌ ચ સ્વવાક્યં પ્રત્યભાષતામ્ ॥ ૪૫॥

યસ્માત્કર્મ બ્રુવાણસ્ત્વં યોગધર્મમવાપ્ય તમ્ ।
એવં વરં પ્રાર્થયસે તસ્માદ્વાક્યં નિબોધ મે ॥ ૪૬॥

રાજા ત્વં ભવિતા તાત કામ્પિલ્યે નગરોત્તમે ।
એતૌ તે સચિવૌ સ્યાતાં વ્યભિચારપ્રધર્ષિતૌ ॥ ૪૭॥

ન તાનૂચુસ્ત્રયો રાજ્યં ચતુરઃ સહચારિણઃ ।
સ પ્રસાદં પુનશ્ચક્રે તન્મધ્યે સુમનાબ્રવીત્ ॥ ૪૮॥

અન્તવાન્ ભવિતા શાપઃ પુનર્યોગમવાપ્સ્યથ ।
સર્વસત્ત્વરુતજ્ઞશ્ચ સ્વતન્ત્રોઽયં ભવિષ્યતિ ॥ ૪૯॥

પિતૃપ્રસાદાદ્યુષ્માભિઃ સમ્પ્રાપ્તં સુકૃતં ભવેત્ ।
ગાં પ્રોક્ષયિત્વા ધર્મેણ પિતૃભ્યશ્ચોપકલ્પિતાઃ ॥ ૫૦॥

અસ્માકં જ્ઞાનસંયોગઃ સર્વેષાં યોગસાધનમ્ ।
ઇદં ચ વાક્યં સંરબ્ધં શ્લોકમેકમુદાહૃતમ્ ॥ ૫૧॥

પુરુષાન્તરિતં શ્રુત્વા તતો યોગમવાપ્સ્યથ ।
ઇત્યુક્ત્વા સ તુ મૌનોઽભૂદ્વિહઙ્ગઃ સુમના બુધઃ ॥ ૫૨॥

માર્કણ્ડેય ઉવાચ ।
લોકાનાં સ્વસ્તયે તાત શન્તનુપ્રવરાત્મજ ।
ઇત્યુક્તં તચ્ચરિત્રં મે કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૫૩॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં પિતૃસર્ગવર્ણનં સપ્તવ્યાધગતિવર્ણનં નામૈકચત્વારિંશોઽધ્યાયઃ ॥ ૫.૪૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૪૨. દ્વિચત્વારિંશોઽધ્યાયઃ । પિતૃપ્રભાવવર્ણનમ્ ।

ભીષ્મ ઉવાચ ।
માર્કણ્ડેય મહાપ્રાજ્ઞ પિતૃભક્તિભૃતાં વર ।
કિં જાતં તુ તતો બ્રૂહિ કૃપયા મુનિસત્તમ ॥ ૧॥

માર્કણ્ડેય ઉવાચ ।
તે ધર્મયોગનિરતાઃ સપ્ત માનસચારિણઃ ।
વાય્વમ્બુભક્ષાઃ સતતં શરીરમુપશોષયન્ ॥ ૨॥

સ રાજાન્તઃપુરવૃતો નન્દને મઘવા ઇવ ।

ક્રીડિત્વા સુચિરં તત્ર સભાર્યઃ સ્વપુરં યયૌ ॥ ૩॥

અનૂહો નામ તસ્યાસીત્પુત્રઃ પરમધાર્મિકઃ ।
તં વિભ્રાજઃ સુતં રાજ્યે સ્થાપયિત્વા વનં યયૌ ॥ ૪॥

તપઃ કર્તું સમારેભે યત્ર તે સહચારિણઃ ।
સ વૈ તત્ર નિરાહારો વાયુભક્ષો મહાતપાઃ ॥ ૫॥

તતો વિભ્રાજિતં તેન વૈભ્રાજં નામ તદ્વનમ્ ।
બભૂવ સુપ્રસિદ્ધં હિ યોગસિદ્ધિપ્રદાયકમ્ ॥ ૬॥

તત્રૈવ તે હિ શકુનાશ્ચત્વારો યોગધર્મિણઃ ।
યોગભ્રષ્ટાસ્ત્રયશ્ચૈવ દેહત્યાગકૃતોઽભવન્ ॥ ૭॥

કામ્પિલ્યે નગરે તે તુ બ્રહ્મદત્તપુરોગમાઃ ।
જાતાઃ સપ્ત મહાત્માનઃ સર્વે વિગતકલ્મષાઃ ॥ ૮॥

સ્મૃતિમન્તોઽત્ર ચત્વારસ્ત્રયસ્તુ પરિમોહિતાઃ ।
સ્વતન્ત્રસ્ત્વણુહાજ્જાતો બ્રહ્મદત્તો મહૌજસઃ ॥ ૯॥

છિદ્રદર્શી સુનેત્રસ્તુ વેદવેદાઙ્ગપારગૌ ।
જાતૌ શ્રોત્રિયદાયાદૌ પૂર્વજાતિસહોષિતૌ ॥ ૧૦॥

પઞ્ચાલો બહ્વૃચસ્ત્વાસીદાચાર્યત્વં ચકાર હ ।
દ્વિવેદઃ પુણ્ડરીકશ્ચ છન્દોગોઽધ્વર્યુરેવ ચ ॥ ૧૧॥

તતો રાજા સુતં દૃષ્ટ્વા બ્રહ્મદત્તમકલ્મષમ્ ।
અભિષિચ્ય સ્વરાજ્યે તુ પરાં ગતિમવાપ્તવાન્ ॥ ૧૨॥

પઞ્ચાલઃ પુણ્ડરીકસ્તુ પુત્રૌ સંસ્થાપ્ય મન્દિરે ।
વિવિશતુર્વનં તત્ર ગતૌ પરમિકાં ગતિમ્ ॥ ૧૩॥

બ્રહ્મદત્તસ્ય ભાર્યા તુ સન્નિતિર્નામ ભારત ।
સા ત્વેકભાવસંયુક્તા રેમે ભર્ત્રા સહૈવ તુ ॥ ૧૪॥

શેષાસ્તુ ચક્રવાકા વૈ કામ્પિલ્યે સહચારિણઃ ।
જાતાઃ શ્રોત્રિયદાયાદા દરિદ્રસ્ય કુલે નૃપ ॥ ૧૫॥

ધૃતિમાન્સુમહાત્મા ચ તત્ત્વદર્શી નિરુત્સુકઃ ।
વેદાધ્યયન સમ્પન્નાશ્ચત્વારશ્છિદ્રદર્શિનઃ ॥ ૧૬॥

તે યોગનિરતાઃ સિદ્ધાઃ પ્રસ્થિતાઃ સર્વ એવ હિ ।
આમન્ત્ર્ય ચ મિથઃ શમ્ભોઃ પદામ્ભોજં પ્રણમ્ય તુ ॥ ૧૭॥

તે તમૂચુર્દ્વિજાઃ સર્વે પિતરં પુનરેવ ચ ।
કરિષ્યામો વિધાનં તે યેન ત્વં વર્તયિષ્યસિ ॥ ૧૮॥

ઇમં શ્લોકં મહાર્થં ત્વં રાજાનં સહમન્ત્રિણમ્ ।
શ્રાવયેથાઃ સમાગમ્ય બ્રહ્મદત્તમકલ્મષમ્ ॥ ૧૯॥

પ્રીતાત્મા દાસ્યતિ સ તે ગ્રામાન્ ભોગાંશ્ચ પુષ્કલાન્ ।
એતાવદુક્ત્વા તે સર્વે પૂજયિત્વા ચ તં ગુરુમ્ ।
યોગધર્મમનુપ્રાપ્ય પરાં નિર્વૃતિમાયયુઃ ॥ ૨૦॥

ચતુર્ણાં તુ પિતા યોઽસૌ બ્રાહ્મણાનાં મહાત્મનામ્ ।
શ્લોકં સોઽધીત્ય પુત્રેભ્યઃ કૃતકૃત્ય ઇવાભવત્ ॥ ૨૧॥

શ્રાવયામાસ રાજાનં સ્લોકં તં સચિવૌ ચ તૌ ।
સપ્તવ્યાધા દશાર્ણેષુ મૃગાઃ કાલઞ્જરે ગિરૌ ॥ ૨૨॥

ચક્રવાકાઃ શરદ્વીપે હંસાઃ સરસિ માનસે ।
તેઽભિજાતાઃ કુરુક્ષેત્રે બ્રાહ્મણા વેદપારગાઃ ॥ ૨૩॥

પ્રસ્થિતા દિર્ઘમધ્વાનં યુયં કિમવસીદથ ।
તચ્છ્રુત્વા મોહમગમદ્બ્રહ્મદત્તો નરાધિપઃ ॥ ૨૪॥

સચિવશ્ચાસ્ય પાઞ્ચાલઃ પુણ્ડરીકશ્ચ ભારત ।
તતસ્તે તત્સરઃ સ્મૃત્વા યોગં તમુપલભ્ય ચ ॥ ૨૫॥

બ્રાહ્મણં વિપુલૈરર્થૈર્ભોગૈશ્ચ સમયોજયન્ ।
અભિષિચ્ય સ્વરાજ્યે તુ વિષ્વક્સેનમરિન્દમમ્ ॥ ૨૬॥

જગામ બ્રહ્મદત્તો હિ સદારો વનમેવ હ ।
પ્રાપ્ય યોગં બલાદેવ ગતિં પ્રાપ સુદુર્લભામ્ ॥ ૨૭॥

પુણ્ડરીકોઽપિ ધર્માત્મા સાઙ્ખ્યયોગમનુત્તમમ્ ।
પ્રાપ્ય યોગગતિઃ સિદ્ધો વિશુદ્ધસ્તેન કર્મણા ॥ ૨૮॥

ક્રમં પ્રણીય પાઞ્ચાલ્યઃ શિક્ષાં ચોત્પાદ્ય કેવલામ્ ।
યોગાચાર્યગતિં પ્રાપ યશશ્ચાગ્ર્યં મહાતપાઃ ॥ ૨૯॥

શૂરા યે સમ્પ્રપદ્યન્તે અપુનર્ભવકાઙ્ક્ષિણઃ ।

પાપં પ્રણાશયન્ત્વદ્ય તચ્છમ્ભોઃ પરમં પદમ્ ॥ ૩૦॥

શારીરે માનસે ચૈવ પાપે વાગ્જે મહામુને ।
કૃતે સમ્યગિદં ભક્ત્યા પઠેચ્છ્રદ્ધાસમન્વિતઃ ॥ ૩૧॥

મુચ્યતે સર્વપાપેભ્યઃ શિવનામાનુકીર્તનાત્ ।
ઉચ્ચાર્યમાણ એતસ્મિન્દેવદેવસ્ય તસ્ય વૈ ॥ ૩૨॥

વિલયં પાપમાયાતિ હ્યામભાણ્ડમિવામ્ભસિ ।
તસ્માત્તત્સઞ્ચિતે પાપે સમાનાન્તરમેવ ચ ॥ ૩૩॥

જપ્તવ્યમેતત્પાપસ્ય પ્રશમાય મહામુને ।
નરૈઃ શ્રદ્ધાલુભિર્ભૂયઃ સર્વકામફલાપ્તયે ॥ ૩૪॥

પુષ્ટ્યર્થમિમમધ્યાયં પઠેદેનં શ‍ૃણોતિ વા ।
મુચ્યતે સર્વપાપેભ્યો મોક્ષં યાતિ ન સંશયઃ ॥ ૩૫॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં પિતૃકલ્પે પિતૃપ્રભાવવર્ણનં નામ દ્વિચત્વારિંશોઽધ્યાયઃ ॥ ૫.૪૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૪૩. ત્રિચત્વારિંશોઽધ્યાયઃ । વ્યાસપૂજનપ્રકારઃ ।

શૌનક ઉવાચ ।
આચાર્યપૂજનં બ્રૂહિ સૂત વ્યાસગુરોઽધુના ।
ગ્રન્થસ્ય શ્રવણાન્તે હિ કિં કર્તવ્યં તદપ્યહો ॥ ૧॥

સૂત ઉવાચ ।
પૂજયેદ્વિધિવદ્ભક્ત્યાચાર્યં શ્રુત્વા કથાં પરામ્ ।
ગ્રન્થાન્તે વિધિવદ્દ્યાદાચાર્યાય પ્રસન્નધીઃ ॥ ૨॥

તતો વક્તારમાનમ્ય સમ્પૂજ્ય ચ યથાવિધિ ।
ભૂષણૈર્હસ્તકર્ણાનાં વસ્ત્રૈઃ સૌમ્યાદિભિઃ સુધીઃ ॥ ૩॥

શિવપૂજાસમાપ્તૌ તુ દદ્યાદ્ધેનું સવત્સિકામ્ ।
કૃત્વાસનં સુવર્ણસ્ય પલમાનસ્ય સામ્બરમ્ ॥ ૪॥

તત્રાસ્થાપ્ય શુભં ગ્રન્થં લિખિતં લલિતાક્ષરૈઃ ।
આચાર્યાય સુધીર્દદ્યાન્મુક્તઃ સ્યાદ્ભવબન્ધનૈઃ ॥ ૫॥

ગ્રામો ગજો હયશ્ચાપિ યથાશક્ત્યપરાણિ ચ ।
મુને સર્વાણિ દેયાનિ વાચકાય મહાત્મને ॥ ૬॥

વિધાનસહિતં સમ્યક્ શ્રુતં હિ સફલં સ્મૃતમ્ ।
પુરાણં શૌનકમુને સત્યમેવોદિતં મયા ॥ ૭॥

તસ્માદ્વિધાનયુક્તં તુ શ‍ૃણુયાદ્ભક્તિતો મુને ।
પુરાણં નિગમાર્થાઢ્યં પુણ્યદં હૃદયં શ્રુતેઃ ॥ ૮॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં વ્યાસપૂજનપ્રકારો નામ ત્રિચત્વારિંશોઽધ્યાયઃ ॥ ૫.૪૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૪૪. ચતુશ્ચત્વારિંશોઽધ્યાયઃ । વ્યાસોત્પત્તિવર્ણનમ્ ।

મુનય ઊચુઃ ।
વ્યાસોત્પત્તિં મહાબુદ્ધે બ્રૂહિ સૂત દયાનિધે ।
કૃપયા પરયા સ્વામિન્ કૃતાર્થાન્નઃ કુરુ પ્રભો ॥ ૧॥

વ્યાસસ્ય જનની પ્રોક્તા નામ્ના સત્યવતી શુભા ।
વિવાહિતા તુ સા દેવી રાજ્ઞા શન્તનુના કિલ ॥ ૨॥

તસ્યાં જાતો મહાયોગી કથં વ્યાસઃ પરાશરાત્ ।
સન્દેહોઽત્ર મહાઞ્જાતસ્તં ભવાઞ્છેત્તુમર્હતિ ॥ ૩॥

સૂત ઉવાચ ।
એકદા તીર્થયાત્રાયાં વ્રજન્યોગી પરાશરઃ ।
યદૃચ્છયાગતો રમ્યં યમુનાયાસ્તટં શુભમ્ ॥ ૪॥

નિષાદમાહ ધર્માત્મા કુર્વન્તં ભોજનં તદા ।
નયસ્વ યમુનાપારં જલયાનેન મામરમ્ ॥ ૫॥

ઇત્યુક્તો મુનિના તેન નિષાદઃ સ્વસુતાં જગૌ ।
મત્સ્યગન્ધામમું બાલે પારં નાવા નય દ્રુતમ્ ॥ ૬॥

તાપસોઽયં મહાભાગે દૃશ્યન્તીગર્ભસમ્ભવઃ ।
તિતીર્ષુરસ્તિ ધર્માબ્ધિશ્ચતુરામ્નાયપારગઃ ॥ ૭॥

ઇતિ વિજ્ઞાપિતા પિત્રા મત્સ્યગન્ધા મહામુનિમ્ ।
સંવાહયતિ નૌકાયામાસીનં સૂર્યરોચિષમ્ ॥ ૮॥

કાલયોગાન્મહાયોગી તસ્યાં કામાતુરોઽભવત્ ।
દૃષ્ટ્વા યોઽપ્સરસાં રૂપં ન કદાપિ વિમોહિતઃ ॥ ૯॥

ગ્રહીતુકામઃ સ મુનિર્દાશકન્યાં મનોહરામ્ ।
દક્ષિણેન કરેણૈતામસ્પૃશદ્દક્ષિણે કરે ॥ ૧૦॥

તમુવાચ વિશાલાક્ષી વચનં સ્મિતપૂર્વકમ્ ।
કિમિદં ક્રિયતે કર્મ વાચંયમવિગર્હિતમ્ ॥ ૧૧॥

વસિષ્ઠસ્ય કુલે રમ્યે ત્વં જાતોઽસિ મહામતે ।
નિષાદજા ત્વહં બ્રહ્મન્ કથં સઙ્ગો ઘટેત નૌ ॥ ૧૨॥

દુર્લભં માનુષં જન્મ બ્રાહ્મણત્વં વિશેષતઃ ।
તત્રાપિ તાપસત્વં ચ દુર્લભં મુનિસત્તમ ॥ ૧૩॥

વિદ્યયા વપુષા વાચા કુલશીલેન ચાન્વિતઃ ।
કામબાણવશં યાતો મહદાશ્ચર્યમત્ર હિ ॥ ૧૪॥

પ્રવૃત્તમપ્યસત્કર્મ કર્તુમેનં ન કોઽપિ હ ।
ભુવિ વારયિતું શક્તઃ શાપભીત્યાસ્ય યોગિનઃ ॥ ૧૫॥

ઇતિ સઞ્ચિન્ત્ય હૃદયે નિજગાદ મહામુનિમ્ ।
તાવદ્ધૈર્યં કુરુ સ્વામિન્યાવત્ત્વાં પારયામિ ન ॥ ૧૬॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્યા યોગિરાજઃ પરાશરઃ ।
તત્યાજ પાણિં તરસા સિન્ધોઃ પારં ગતઃ પુનઃ ॥ ૧૭॥

પુનર્જગ્રાહ તાં બાલાં મુનિઃ કામપ્રપીડિતઃ ।
કમ્પમાના તુ સા બાલા તમુવાચ દયાનિધિમ્ ॥ ૧૮॥

દુર્ગન્ધાહં મુનિશ્રેષ્ઠ કૃષ્ણવર્ણા નિષાદજા ।
ભવાંસ્તુ પરમોદારવિચારો યોગિસત્તમઃ ॥ ૧૯॥

નાવયોર્ઘટતે સઙ્ગો કાચકાઞ્ચનયોરિવ ।

તુલ્યજાત્યાકૃતિકયોઃ સઙ્ગઃ સૌખ્યપ્રદો ભવેત્ ॥ ૨૦॥

ઇત્યુક્તેન તયા તેન ક્ષણમાત્રેણ કામિની ।
કૃતા યોજનગન્ધા તુ રમ્યરૂપા મનોરમા ॥ ૨૧॥

પુનર્જગ્રાહ તાં બાલાં સ મુનિઃ કામપીડિતઃ ।
ગ્રહીતુકામં તં દૃષ્ટ્વા પુનઃ પ્રોવાચ વાસવી ॥ ૨૨॥

રાત્રૌ વ્યવાયઃ કર્તવ્યો ન દિવેતિ શ્રુતિર્જગૌ ।
દિવાસઙ્ગે મહાન્દોષો નિન્દા ચાપિ દુરાસદા ॥ ૨૩॥

તસ્માત્તાવત્પ્રતીક્ષસ્વ યાવદ્ભવતિ યામિની ।
પશ્યન્તિ માનવાશ્ચાત્ર પિતા મે ચ તટે સ્થિતઃ ॥ ૨૪॥

તયોક્તમિદમાકર્ણ્ય વચનં મુનિપુઙ્ગવઃ ।
નીહારં કલ્પયામાસ સદ્યઃ પુણ્યબલેન વૈ ॥ ૨૫॥

નીહારે ચ સમુત્પન્ને તમસા રાત્રિસન્નિભે ।
વ્યવાયચકિતા બાલા પુનઃ પ્રોવાચ તં મુનિમ્ ॥ ૨૬॥

યોગિન્નમોઘવીર્યસ્ત્વં ભુક્ત્વા ગન્તાસિ માં યદિ ।
સગર્ભા સ્યાં તદા સ્વામિન્કા ગતિર્મે ભવેદિતિ ॥ ૨૭॥

કન્યાવ્રતં મહાબુદ્ધે મમ નષ્ટં ભવિષ્યતિ ।
હસિષ્યન્તિ તદા લોકાઃ પિતરં કિં બ્રવીમ્યહમ્ ॥ ૨૮॥

પરાશર ઉવાચ ।
રમ બાલે મયા સાર્ધં સ્વચ્છન્દં કામજૈ રસૈઃ ।
સ્વીયાભિલાષમાખ્યાહિ પૂરયામ્યધુના પ્રિયે ॥ ૨૯॥

મદાજ્ઞાસત્યકરણાન્નામ્ના સત્યવતી ભવ ।
વન્દનીયા તથાશેષૈર્યોગિભિસ્ત્રિદશૈરપિ ॥ ૩૦॥

સત્યવત્યુવાચ ।
જાનતે ન પિતા માતા ન વાન્યે ભુવિ માનવાઃ ।
કન્યાધર્મો ન મે હન્યાદ્યદિ સ્વીકુરુ માં તદા ॥ ૩૧॥

પુત્રશ્ચ ત્વત્સમો નાથ ભવેદદ્ભુતશક્તિમાન્ ।
સૌગન્ધ્યં સર્વદાઙ્ગે મે તારુણ્યં ચ નવં નવમ્ ॥ ૩૨॥

પરાશર ઉવાચ ।

શ઼ૃણુ પ્રિયે તવાભીષ્ટં સર્વં પૂર્ણં ભવિષ્યતિ ।
વિષ્ણ્વંશસમ્ભવઃ પુત્રો ભવિતા તે મહાયશાઃ ॥ ૩૩॥

કિઞ્ચિદ્વૈ કારણં વિદ્ધિ યતોઽહં કામપીડિતઃ ।
દૃષ્ટ્વા ચાપ્સરસાં રૂપં નામુહ્યન્મે મનઃ ક્વચિત્ ॥ ૩૪॥

મીનગન્ધાં સમાલક્ષ્ય ત્વાં મોહવશગોઽભવમ્ ।
ન બાલે ભાલપટ્ટસ્થો બ્રહ્મલેખોઽન્યથા ભવેત્ ॥ ૩૫॥

પુરાણકર્તા પુત્રસ્તે વેદશાખાવિભાગકૃત્ ।
ભવિષ્યતિ વરારોહે ખ્યાતકીર્તિર્જગત્ત્રયે ॥ ૩૬॥

ઇત્યુક્ત્વા તાં સુરમ્યાઙ્ગીં ભુક્ત્વા યોગવિશારદઃ ।
વવ્રાજ શીઘ્રં યમુનાજલે સ્નાત્વા મહામુને ॥ ૩૭॥

સાપિ ગર્ભં દધારાશુ દ્વાદશાત્મસમપ્રભમ્ ।
અસૂત સૂર્યજાદ્વીપે કામદેવમિવાત્મજમ્ ॥ ૩૮॥

વામે કમણ્ડલું બિભ્રદ્દક્ષિણે દણ્ડમુત્તમમ્ ।
પિશઙ્ગીભિર્જટાભિશ્ચ રાજિતો મહસાં ચયઃ ॥ ૩૯॥

જાતમાત્રસ્તુ તેજસ્વી માતરં પ્રત્યભાષત ।
ગચ્છ માતર્યથાકામં ગચ્છામ્યહમતઃ પરમ્ ॥ ૪૦॥

માતર્યદા ભવેત્કાર્યં તવ કિઞ્ચિદ્ હૃદીપ્સિતમ્ ।
સંસ્મૃતશ્ચાગમિષ્યામિ ત્વદિચ્છાપૂર્તિહેતવે ॥ ૪૧॥

ઇત્યુક્ત્વા માતૃચરણાવભિવાદ્ય તપોનિધિઃ ।
જગામ ચ તપઃ કર્તું તીર્થં પાપવિશોધનમ્ ॥ ૪૨॥

સાપિ પિત્રન્તિકં યાતા પુત્રસ્નેહાકુલા સતી ।
સ્મરન્તી ચરિતં સૂનોર્વર્ણયન્તી સ્વભાગ્યકમ્ ॥ ૪૩॥

દ્વીપે જાતો યતો બાલસ્તેન દ્વૈપાયનોઽભવત્ ।
વેદશાખાવિભજનાદ્વેદવ્યાસઃ પ્રકીર્તિતઃ ॥ ૪૪॥

તીર્થરાજં પ્રથમતો ધર્મકામાર્થમોક્ષદમ્ ।
નૈમિષં ચ કુરુક્ષેત્રં ગઙ્ગાદ્વારમવન્તિકામ્ ॥ ૪૫॥

અયોધ્યાં મથુરાં ચૈવ દ્વારકામમરાવતીમ્ ।
સરસ્વતીં સિન્ધુસઙ્ગં ગઙ્ગાસાગરસઙ્ગમમ્ ॥ ૪૬॥

કાઞ્ચીં ચ ત્ર્યમ્બકં ચાપિ સપ્તગોદાવરીતટમ્ ।
કાલઞ્જરં પ્રભાસં ચ તથા બદરિકાશ્રમમ્ ॥ ૪૭॥

મહાલયં તથોઙ્કારક્ષેત્રં વૈ પુરુષોત્તમમ્ ।
ગોકર્ણં ભૃગુકચ્છં ચ ભૃગુતુઙ્ગં ચ પુષ્કરમ્ ॥ ૪૮॥

શ્રીપર્વતાદિતીર્થાનિ ધારાતીર્થં તથૈવ ચ ।
ગત્વાવગાહ્ય વિધિના ચચાર પરમં તપઃ ॥ ૪૯॥

એવં તીર્થાન્યનેકાનિ નાનાદેશસ્થિતાનિ હ ।
પર્યટન્કાલિકાસૂનુઃ પ્રાપદ્વારાણસીં પુરીમ્ ॥ ૫૦॥

યત્ર વિશ્વેશ્વરઃ સાક્ષાદન્નપૂર્ણા મહેશ્વરી ।
ભક્તાનામમૃતં દાતું વિરાજેતે કૃપાનિધી ॥ ૫૧॥

પ્રાપ્ય વારાણસીતીર્થં દૃષ્ટ્વાથ મણિકર્ણિકામ્ ।
કોટિજન્માર્જિતં પાપં તત્યાજ સ મુનીશ્વરઃ ॥ ૫૨॥

દૃષ્ટ્વા લિઙ્ગાનિ સર્વાણિ વિશ્વેશપ્રમુખાનિ ચ ।
સ્નાત્વા સર્વેષુ કુણ્ડેષુ વાપીકૂપસરઃસુ ચ ॥ ૫૩॥

નત્વા વિનાયકાન્સર્વાન્ગૌરીઃ સર્વાઃ પ્રણમ્ય ચ ।
સમ્પૂજ્ય કાલરાજં ચ ભૈરવં પાપભક્ષણમ્ ॥ ૯૪॥

દણ્ડનાયકમુખ્યાંશ્ચ ગણાન્સ્તુત્વા પ્રયત્નતઃ ।
આદિકેશવમુખ્યાંશ્ચ કેશવાન્પરિતોષ્ય ચ ॥ ૫૫॥

લોલાર્કમુખ્યસૂર્યાંશ્ચ પ્રણમ્ય ચ પુનઃપુનઃ ।
કૃત્વા પિણ્ડપ્રદાનાનિ સર્વતીર્થેષ્વતન્દ્રિતઃ ॥ ૫૬॥

સ્થાપયામાસ પુણ્યાત્મા લિઙ્ગં વ્યાસેશ્વરાભિધમ્ ।
યદ્દર્શનાદ્ભવેદ્વિપ્રા નરો વિદ્યાસુ વાક્પતિઃ ॥ ૫૭॥

લિઙ્ગાન્યભ્યર્ચ્ય વિશ્વેશપ્રમુખાનિ સુભક્તિતઃ ।
અસકૃચ્ચિન્તયામાસ કિં લિઙ્ગં ક્ષિપ્રસિદ્ધિદમ્ ॥ ૫૮॥

યમારાધ્ય મહાદેવં વિદ્યાઃ સર્વા લભેમહિ ।
પુરાણકર્તૃતાશક્તિર્મમાસ્તુ યદનુગ્રહાત્ ॥ ૫૯॥

શ્રીમદોઙ્કારનાથં વા કૃત્તિવાસેશ્વરં કિમુ ।

કેદારેશં તુ કામેશં ચન્દ્રેશં વા ત્રિલોચનમ્ ॥ ૬૦॥

કાલેશં વૃદ્ધકાલેશં કલશેશ્વરમેવ વા ।
જ્યેષ્ઠેશં જમ્બુકેશં વા જૈગીષવ્યેશ્વરં તુ વા ॥ ૬૧॥

દશાશ્વમેધમીશાનં દ્રુમચણ્ડેશમેવ વા ।
દૃક્કેશં ગરુડેશં વા ગોકર્ણેશં ગણેશ્વરમ્ ॥ ૬૨॥

પ્રસન્નવદનેશં વા ધર્મેશં તારકેશ્વરમ્ ।
નન્દિકેશં નિવાસેશં પત્રીશં પ્રીતિકેશ્વરમ્ ॥ ૬૩॥

પર્વતેશં પશુપતિં હાટકેશ્વરમેવ વા ।
બૃહસ્પતીશ્વરં વાથ તિલભાણ્ડેશમેવ વા ॥ ૬૪॥

ભારભૂતેશ્વરં કિં વા મહાલક્ષ્મીશ્વરં તુ વા ।
મરુતેશં તુ મોક્ષેશં ગઙ્ગેશં નર્મદેશ્વરમ્ ॥ ૬૫॥

કૃષ્ણેશં પરમેશાનં રત્નેશ્વરમથાપિ વા ।
યામુનેશં લાઙ્ગલીશં શ્રીમદ્વિશ્વેશ્વરં વિભુમ્ ॥ ૬૬॥

અવિમુક્તેશ્વરં વાથ વિશાલાક્ષીશમેવ વા ।
વ્યાઘ્રેશ્વરં વરાહેશં વિદ્યેશ્વરમથાપિ વા ॥ ૬૭॥

વરુણેશં વિધીશં વા હરિકેશેશ્વરં તુ વા ।
ભવાનીશં કપર્દીશં કન્દુકેશમજેશ્વરમ્ ॥ ૬૮॥

વિશ્વકર્મેશ્વરં વાથ વીરેશ્વરમથાપિ વા ।
નાદેશં કપિલેશં ચ ભુવનેશ્વરમેવ વા ॥ ૬૯॥

વાષ્કુલીશં મહાદેવં સિદ્ધીશ્વરમથાપિ વા ।
વિશ્વેદેવેશ્વરં વીરભદ્રેશં ભૈરવેશ્વરમ્ ॥ ૭૦॥

અમૃતેશં સતીશં વા પાર્વતીશ્વરમેવ વા ।
સિદ્ધેશ્વરં મતઙ્ગેશં ભૂતીશ્વરમથાપિ વા ॥ ૭૧॥

આષાઢીશં પ્રકાશેશં કોટિરુદ્રેશ્વરં તથા ।
મદાલસેશ્વરં ચૈવ તિલપર્ણેશ્વરં કિમુ ॥ ૭૨॥

કિં વા હિરણ્યગર્ભેશં કિં વા શ્રીમધ્યમેશ્વરમ્ ।
ઇત્યાદિ કોટિલિઙ્ગાનાં મધ્યેઽહં કિમુપાશ્રયે ॥ ૭૩॥

ઇતિ ચિન્તાતુરો વ્યાસઃ શિવભક્તિરતાત્મવાન્ ।
ક્ષણં વિચારયામાસ ધ્યાનસુસ્થિરચેતસા ॥ ૭૪॥

આં જ્ઞાતં વિસ્મૃતં તાવન્નિષ્પન્નો મે મનોરથઃ ।
સિદ્ધૈઃ સમ્પૂજિતં લિઙ્ગં ધર્મકામાર્થમોક્ષદમ્ ॥ ૭૫॥

દર્શનાત્સ્પર્શનાદ્યસ્ય ચેતો નિર્મલતામિયાત્ ।
ઉદ્ઘાટિતં સદૈવાસ્તિ દ્વારં સ્વર્ગસ્ય યત્ર હિ ॥ ૭૬॥

અવિમુક્તે મહાક્ષેત્રે સિદ્ધક્ષેત્રે હિ તત્પરમ્ ।
યત્રાસ્તે પરમં લિઙ્ગં મધ્યમેશ્વરસંજ્ઞકમ્ ॥ ૭૭॥

ન મધ્યમેશ્વરાદન્યાલ્લિઙ્ગં કાશ્યાં હિ વિદ્યતે ।
યદ્દર્શનાર્થમાયાન્તિ દેવાઃ પર્વણિ પર્વણિ ॥ ૭૮॥

અતઃ સેવ્યો મહાદેવો મધ્યમેશ્વરસંજ્ઞકઃ ।
અસ્યારાધનતો વિપ્રા બહવઃ સિદ્ધિમાગતાઃ ॥ ૭૯॥

યઃ પ્રધાનતયા કાશ્યાં મધ્યે તિષ્ઠતિ શઙ્કરઃ ।
સ્વપુરીજન સૌખ્યાર્થમતોઽસૌ મધ્યમેશ્વરઃ ॥ ૮૦॥

તુમ્બુરુર્નામ ગન્ધર્વો દેવર્ષિર્નારદસ્તથા ।
અમુમારાધ્ય સમ્પન્નો ગાનવિદ્યાવિશારદૌ ॥ ૮૧॥

અમુમેવ સમારાધ્ય વિષ્ણુર્મોક્ષપ્રદોઽભવત્ ।
બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ સૃષ્ટિપાલકહારકાઃ ॥ ૮૨॥

ધનાધીશઃ કુબેરોઽપિ વામદેવો હિ શૈવરાટ્ ।
ખટ્વાઙ્ગો નામ ભૂપાલોઽનપત્યોઽપત્યવાનભૂત્ ॥ ૮૩॥

અપ્સરાશ્ચન્દ્રભામાખ્યા નૃત્યન્તી નિજભાવતઃ ।
સદેહા કોકિલાલાપા લિઙ્ગમધ્યે લયં ગતા ॥ ૮૪॥

શ્રીકરો ગોપિકાસૂનુઃ સેવિત્વા મધ્યમેશ્વરમ્ ।
ગાણપત્યં સમાલેભે શિવસ્ય કરુણાત્મનઃ ॥ ૮૫॥

ભાર્ગવો ગીષ્પતિશ્ચોભૌ દેવૌ દૈત્યસુરાર્ચિતૌ ।
વિદ્યાપારઙ્ગતૌ જાતૌ પ્રસાદાન્મધ્યમેશિતુઃ ॥ ૮૬॥

અહમપ્યત્ર સમ્પૂજ્ય મધ્યમેશ્વરમીશ્વરમ્ ।
પુરાણકર્તૃતાશક્તિં પ્રાપ્સ્યામિ તરસા ધ્રુવમ્ ॥ ૮૭॥

ઇતિ કૃત્વા મતિં ધીરો વ્યાસઃ સત્યવતીસુતઃ ।
ભાગીરથ્યમ્ભસિ સ્નાત્વા જગ્રાહ નિયમં વ્રતી ॥ ૮૮॥

ક્વચિત્પર્ણાશનો ભૂત્વા ફલશાકાશનઃ ક્વચિત્ ।
વાતભુગ્જલભુક્ ક્વાપિ ક્વચિન્નિરશનવ્રતી ॥ ૮૯॥

ઇત્યાદિનિયમૈર્યોગી ત્રિકાલં મધ્યમેશ્વરમ્ ।
પૂજયામાસ ધર્માત્મા નાનાવૃક્ષોદ્ભવૈઃ ફલૈઃ ॥ ૯૦॥

ઇત્થં બહુતિથે કાલે વ્યતીતે કાલિકાસુતઃ ।
સ્નાત્વા ત્રિપથગાતોયે યાવદાયાતિ સ પ્રગે ॥ ૯૧॥

મધ્યમેશ્વરમીશાનં ભક્તાભીષ્ટવરપ્રદમ્ ।
તાવદ્દદર્શ પુણ્યાત્મા મધ્યે લિઙ્ગં મહેશ્વરમ્ ॥ ૯૨॥

ઉમાભૂષિતવામાઙ્ગં વ્યાઘ્રચર્મોત્તરીયકમ્ ।
જટાજૂટચલદ્ગઙ્ગાતરઙ્ગૈશ્ચારુવિગ્રહમ્ ॥ ૯૩॥

લસચ્છારદબાલેન્દુચન્દ્રિકાચન્દ્રિતાલકમ્ ।
ભસ્મોદ્ધૂલિતસર્વાઙ્ગં કર્પૂરાર્જુનવિગ્રહમ્ ॥ ૯૪॥

કર્ણાન્તાયતનેત્રં ચ વિદ્રુમારુણદચ્છદમ્ ।
પઞ્ચવર્ષાકૃતિં બાલં બાલકોચિતભૂષણમ્ ॥ ૯૫॥

દધાનં કોટિકન્દર્પદર્પહાનિં તનુદ્યુતિમ્ ।
નગ્નં પ્રહસિતાસ્યાબ્જં ગાયન્તં સામ લીલયા ॥ ૯૬॥

કરુણાપારપાથોધિં ભક્તવત્સલનામકમ્ ।
આશુતોષમુમાકાન્તં પ્રસાદસુમુખં હરમ્ ॥ ૯૭॥

સમાલોક્ય સ્તુતિં ચક્રે પ્રેમગદ્ગદયા ગિરા ।
યોગિનામપ્યગમ્યં તં દીનબન્ધું ચિદાત્મકમ્ ॥ ૯૮॥

વેદવ્યાસ ઉવાચ ।
દેવદેવ મહાભાગ શરણાગતવત્સલ ।
વાઙ્મનઃકર્મદુષ્પ્રાપ યોગિનામપ્યગોચર ॥ ૯૯॥

મહિમાનં ન તે વેદા વિદામાસુરુમાપતે ।
ત્વમેવ જગતઃ કર્તા ધર્તા હર્તા તથૈવ ચ ॥ ૧૦૦॥

ત્વમાદ્યઃ સર્વદેવાનાં સચ્ચિદાનન્દ ઈશ્વરઃ ।
નામગોત્રે ન વા તે સ્તઃ સર્વજ્ઞોઽસિ સદાશિવ ॥ ૧૦૧॥

ત્વમેવ પરમં બ્રહ્મ માયાપાશનિવર્તકઃ ।
ગુણત્રયૈર્ન લિપ્તસ્ત્વં પદ્મપત્રમિવામ્ભસા ॥ ૧૦૨॥

ન તે જન્મ ન વા શીલં ન દેશો ન કુલં ચ તે ।
ઇત્થમ્ભૂતોઽપીશ્વરસ્ત્વં ત્રિલોક્યાઃ કામમાવહેઃ ॥ ૧૦૩॥

ન બ્રહ્મા ન ચ લક્ષ્મીશો ન ચ સેન્દ્રા દિવૌકસઃ ।
ન યોગીન્દ્રા વિદુસ્તત્ત્વં યસ્ય તં ત્વામુપાસ્મહે ॥ ૧૦૪॥

ત્વત્તઃ સર્વં ત્વં હિ સર્વં ગૌરીશસ્ત્વં પુરાન્તકઃ ।
ત્વં બાલસ્ત્વં યુવા વૃદ્ધસ્તં ત્વાં હૃદિ યુનજ્મ્યહમ્ ॥ ૧૦૫॥

નમસ્તસ્મૈ મહેશાય ભક્તધ્યેયાય શમ્ભવે ।
પુરાણપુરુષાયાદ્ધા શઙ્કરાય પરાત્મને ॥ ૧૦૬॥

ઇતિ સ્તુત્વા ક્ષિતૌ યાવદ્દણ્ડવન્નિપપાત સઃ ।
તાવત્સ બાલો હૃષ્ટાત્મા વેદવ્યાસમભાષત ॥ ૧૦૭॥

વરં વૃણીષ્વ ભો યોગિન્યસ્તે મનસિ વર્તતે ।
નાદેયં વિદ્યતે કિઞ્ચિદ્ભક્તાધીનો યતોઽસ્મ્યહમ્ ॥ ૧૦૮॥

તત ઉત્થાય હૃષ્ટાત્મા મુનિર્વ્યાસો મહાતપાઃ ।
પ્રત્યબ્રવીત્કિમજ્ઞાતં સર્વજ્ઞસ્ય તવ પ્રભો ॥ ૧૦૯॥

સર્વાન્તરાત્મા ભગવાન્ શર્વઃ સર્વપ્રદો ભવાન્ ।
યાચ્ઞાં પ્રતિનિયુઙ્ક્તે માં કિમીશો દૈન્યકારિણીમ્ ॥ ૧૧૦॥

ઇતિ શ્રુત્વા વચસ્તસ્ય વ્યાસસ્યામલચેતસઃ ।
શુચિ સ્મિત્વા મહાદેવો બાલરૂપધરોઽબ્રવીત્ ॥ ૧૧૧॥

બાલ ઉવાચ ।
ત્વયા બ્રહ્મવિદાં શ્રેષ્ઠ યોઽભિલાષઃ કૃતો હૃદિ ।
અચિરેણૈવ કાલેન સ ભવિષ્યત્યસંશયઃ ॥ ૧૧૨॥

કણ્ઠે સ્થિત્વા તવ બ્રહ્મન્નન્તર્યામ્યહમીશ્વરઃ ।
સેતિહાસપુરાણાનિ સમ્યઙ્નિર્માપયામ્યહમ્ ॥ ૧૧૩॥

અભિલાષાષ્ટકં પુણ્યં સ્તોત્રમેતત્ત્વયેરિતમ્ ।

વર્ષં ત્રિકાલં પઠનાત્કામદં શમ્ભુસદ્મનિ ॥ ૧૧૪॥

એતત્સ્તોત્રસ્ય પઠનં વિદ્યાબુદ્ધિવિવર્ધનમ્ ।
સર્વસમ્પત્કરં પ્રોક્તં ધર્મદં મોક્ષદં નૃણામ્ ॥ ૧૧૫॥

પ્રાતરુત્થાય સુસ્નાતો લિઙ્ગમભ્યર્ચ્ય શાઙ્કરમ્ ।
વર્ષં પઠન્નિદં સ્તોત્રં મૂર્ખોઽપિ સ્યાદ્ બૃહસ્પતિઃ ॥ ૧૧૬॥

સ્ત્રિયા વા પુરુષેણાપિ નિયમાલ્લિઙ્ગસન્નિધૌ ।
વર્ષં જપ્તમિદં સ્તોત્રં બુદ્ધિં વિદ્યાં ચ વર્ધયેત્ ॥ ૧૧૭॥

ઇત્યુક્ત્વા સ મહાદેવો બાલો લિઙ્ગે ન્યલીયત ।
વ્યાસોઽપિ મુઞ્ચન્નશ્રૂણિ શિવપ્રેમાકુલોઽભવત્ ॥ ૧૧૮॥

એવં લબ્ધવરો વ્યાસો મહેશાન્મધ્યમેશ્વરાત્ ।
અષ્ટાદશ પુરાણાનિ પ્રણિનાય સ્વલીલયા ॥ ૧૧૯॥

બ્રાહ્મં પાદ્મં વૈષ્ણવં ચ શૈવં ભાગવતં તથા ।
ભવિષ્યં નારદીયં ચ માર્કણ્ડેયમતઃ પરમ્ ॥ ૧૨૦॥

આગ્નેયં બ્રહ્મવૈવર્તં લૈઙ્ગં વારાહમેવ ચ ।
વામનાખ્યં તતઃ કૌર્મં માત્સ્યં ગારુડમેવ ચ ॥ ૧૨૧॥

સ્કાન્દં તથૈવ બ્રહ્માણ્ડાખ્યં પુરાણં ચ કીર્તિતમ્ ।
યશસ્યં પુણ્યદં નૃણાં શ્રોતૃણાં શાઙ્કરં યશઃ ॥ ૧૨૨॥

સૂત ઉવાચ ।
અષ્ટાદશપુરાણાનાં પૂર્વં નામોદિતં ત્વયા ।
કુરુ નિર્વચનં તેષામિદાનીં વેદવિત્તમ ॥ ૧૨૩॥

વ્યાસ ઉવાચ ।
અયમેવ કૃતઃ પ્રશ્નસ્તણ્ડિના બ્રહ્મયોનિના ।
નન્દિકેશ્વરમુદ્દિશ્ય સ યદાહ બ્રવીમિ તત્ ॥ ૧૨૪॥

નન્દિકેશ્વર ઉવાચ ।
યત્ર વક્તા સ્વયં તણ્ડિન્ બ્રહ્મા સાક્ષાચ્ચતુર્મુખઃ ॥

તસ્માદ્ બ્રાહ્મં સમાખ્યાતં પુરાણં પ્રથમં મુને ॥ ૧૨૫॥

પદ્મકલ્પસ્ય માહાત્મ્યં તત્ર યસ્યામુદાહૃતમ્ ।
તસ્માત્પાદ્મં સમાખ્યાતં પુરાણં ચ દ્વિતીયકમ્ ॥ ૧૨૬॥

પરાશરકૃતં યત્તુ પુરાણં વિષ્ણુબોધકમ્ ।
તદેવ વ્યાસકથિતં પુત્રપિત્રોરભેદતઃ ॥ ૧૨૭॥

યત્ર પૂર્વોત્તરે ખણ્ડે શિવસ્ય ચરિતં બહુ ।
શૈવમેતત્પુરાણં હિ પુરાણજ્ઞા વદન્તિ ચ ॥ ૧૨૮॥

ભગવત્યાશ્ચ દુર્ગાયાશ્ચરિતં યત્ર વિદ્યતે ।
તત્તુ ભાગવતં પ્રોક્તં નનુ દેવીપુરાણકમ્ ॥ ૧૨૯॥

નારદોક્તં પુરાણં તુ નારદીયં પ્રચક્ષતે ।
યત્ર વક્તાભવત્તણ્ડિન્ માર્કણ્ડેયો મહામુનિઃ ॥ ૧૩૦॥

માર્કણ્ડેયપુરાણં હિ તદાખ્યાતં ચ સપ્તમમ્ ।
અગ્નિયોગાત્તદાગ્નેયં ભવિષ્યોક્તેર્ભવિષ્યકમ્ ॥ ૧૩૧॥

વિવર્તનાદ્ બ્રહ્મણસ્તુ બ્રહ્મવૈવર્તમુચ્યતે ।
લિઙ્ગસ્ય ચરિતોક્તત્વાત્પુરાણં લિઙ્ગમુચ્યતે ॥ ૧૩૨॥

વરાહસ્ય ચ વારાહં પુરાણં દ્વાદશં મુને ।
યત્ર સ્કન્દઃ સ્વયં શ્રોતા વક્તા સાક્ષાન્મહેશ્વરઃ ॥ ૧૩૩॥

તત્તુ સ્કાન્દં સમાખ્યાતં વામનસ્ય તુ વામનમ્ ।
કૌર્મં કૂર્મસ્ય ચરિતં માત્સ્યં મત્સ્યેન કીર્તિતમ્ ॥ ૧૩૪॥

ગરુડસ્તુ સ્વયં વક્તા યત્તદ્ ગારુડસંજ્ઞકમ્ ।
બ્રહ્માણ્ડચરિતોક્તત્વાદ્ બ્રહ્માણ્ડં પરિકીર્તિતમ્ ॥ ૧૩૫॥

સૂત ઉવાચ ।
અયમેવ મયાઽકારિ પ્રશ્નો વ્યાસાય ધીમતે ।
તતઃ સર્વપુરાણાનાં મયા નિર્વચનં શ્રુતમ્ ॥ ૧૩૬॥

એવં વ્યાસઃ સમુત્પન્નઃ સત્યવત્યાં પરાશરાત્ ।
પુરાણસંહિતાશ્ચક્રે મહાભારતમુત્તમમ્ ॥ ૧૩૭॥

પરાશરેણ સંયોગઃ પુનઃ શન્તનુના યથા ।
સત્યવત્યા ઇવ બ્રહ્મન્નઃ સંશયિતુમર્હસિ ॥ ૧૩૮॥

સકારણેયમુત્પત્તિઃ કથિતાશ્ચર્યકારિણી ।
મહતાં ચરિતે ચૈવ ગુણા ગ્રાહ્યા વિચક્ષણૈઃ ॥ ૧૩૯॥

ઇદં રહસ્યં પરમં યઃ શ‍ૃણોતિ પઠત્યપિ ।
સ સર્વપાપનિર્મુક્ત ઋષિલોકે મહીયતે ॥ ૧૪૦॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં વ્યાસોત્પત્તિવર્ણનં નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ ॥ ૫.૪૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૪૫. પઞ્ચચત્વારિંશોઽધ્યાયઃ । મહાકાલિકાવતારવર્ણનમ્ ।

મુનય ઊચુઃ ।
શ્રુતા શમ્ભોઃ કથા રમ્યા નાનાખ્યાનસમન્વિતા ।
નાનાવતારસંયુક્તા ભુક્તિમુક્તિપ્રદા નૃણામ્ ॥ ૧॥

ઇદાનીં શ્રોતુમિચ્છામસ્ત્વત્તો બ્રહ્મવિદાંવર ।
ચરિત્રં જગદમ્બાયા ભગવત્યા મનોહરમ્ ॥ ૨॥

પરબ્રહ્મમહેશસ્ય શક્તિરાદ્યા સનાતની ।
ઉમા યા સમભિખ્યાતા ત્રૈલોક્યજનની પરા ॥ ૩॥

સતી હૈમવતી તસ્યા અવતારદ્વયં શ્રુતમ્ ।
અપરાનવતારાંસ્ત્વં બ્રૂહિ સૂત મહામતે ॥ ૪॥

કો વિરજ્યેત મતિમાન્ ગુણશ્રવણકર્મણિ ।
શ્રીમાતુર્જ્ઞાનિનો યાનિ ન ત્યજન્તિ કદાચન ॥ ૫॥

સૂત ઉવાચ ।
ધન્યા યૂયં મહાત્માનઃ કૃતકૃત્યાઃ સ્થ સર્વદા ।
યત્પૃચ્છથ પરામ્બાયા ઉમાયાશ્ચરિતં મહત્ ॥ ૬॥

શ‍ૃણ્વતાં પૃચ્છતાં ચૈવ તથા વાચયતાં ચ તત્ ।
પાદામ્બુજરજાંસ્યેવ તીર્થાનિ મુનયો વિદુઃ ॥ ૭॥

તે ધન્યા કૃતકૃત્યાઃ સ્યુર્ધન્યા તેષાં પ્રસૂઃ કુલમ્ ।
યેષાં ચિત્તં ભવેલ્લીનં શ્રીદેવ્યાં પરસંવિદિ ॥ ૮॥

યે ન સ્તુવન્તિ દેવેશીં સર્વકારણકારણામ્ ।
માયાગુણૈર્મોહિતાઃ સ્યુર્હતભાગ્યા ન સંશયઃ ॥ ૯॥

ન ભજન્તિ મહાદેવીં કરુણારસસાગરામ્ ।
અન્ધકૂપે પતન્ત્યેતે ઘોરે સંસારરૂપિણિ ॥ ૧૦॥

ગઙ્ગાં વિહાય તૃષ્ણ્યર્થં મરુવારિ યથા વ્રજેત્ ।
વિહાય દેવીં તદ્ભિન્નં તથા દેવાન્તરં વ્રજેત્ ॥ ૧૧॥

યસ્યાઃ સ્મરણમાત્રેણ પુરુષાર્થચતુષ્ટયમ્ ।
અનાયાસેન લભતે કસ્ત્યજેત્તાં નરોત્તમઃ ॥ ૧૨॥

એતત્પૃષ્ટઃ પુરા મેધાઃ સુરથેન મહાત્મના ।
યદુક્તં મેધસા પૂર્વં તચ્છૃણુષ્વ વદામિ તે ॥ ૧૩॥

સ્વારોચિષેઽન્તરે પૂર્વં વિરથો નામ પાર્થિવઃ ।
સુરથસ્તસ્ય પુત્રોઽભૂન્મહાબલપરાક્રમઃ ॥ ૧૪॥

દાનશૌણ્ડઃ સત્યવાદી સ્વધર્મકુશલઃ કૃતી ।
દેવીભક્તો દયાસિન્ધુઃ પ્રજાનાં પરિપાલકઃ ॥ ૧૫॥

પૃથિવીં શાસતસ્તસ્ય પાકશાસનતેજસઃ ।
બભૂવુર્નવ યે ભૂપાઃ પૃથ્વીગ્રહણતત્પરાઃ ॥ ૧૬॥

કોલાનામ્નીં રાજધાનીં રુરુધુસ્તસ્ય ભૂપતેઃ ।
તૈઃ સમં તુમુલં યુદ્ધં સમપદ્યત દારુણમ્ ॥ ૧૭॥

યુદ્ધે સ નિર્જિતો ભૂપઃ પ્રબલૈસ્તૈર્દ્વિષદ્ગણૈઃ ।
ઉજ્જાસિતશ્ચ કોલાયા હૃત્વા રાજ્યમશેષતઃ ॥ ૧૮॥

સ રાજા સ્વપુરીમેત્યાકરોદ્રાજ્યં સ્વમન્ત્રિભિઃ ।
તત્રાપિ ચ મહાપક્ષૈર્વિપક્ષૈઃ સ પરાજિતઃ ॥ ૧૯॥

દૈવાચ્છત્રુત્વમાપન્નૈરમાત્યપ્રમુખૈર્ગણૈઃ ।
કોશસ્થિતં ચ યદ્વિત્તં તત્સર્વં ચાત્મસાત્કૃતમ્ ॥ ૨૦॥

તતઃ સ નિર્ગતો રાજા નગરાન્મૃગયાછલાત્ ।
અસહાયોઽશ્વમારુહ્ય જગામ ગહનં વનમ્ ॥ ૨૧॥

ઇતસ્તતસ્તત્ર ગચ્છન્રાજા મુનિવરાશ્રમમ્ ।
દદર્શ કુસુમારામભ્રાજિતં સર્વતોદિશમ્ ॥ ૨૨॥

વેદધ્વનિસમાકીર્ણં શાન્તજન્તુસમાશ્રિતમ્ ।
શિષ્યૈઃ પ્રશિષ્યૈસ્તચ્છિષ્યૈઃ સમન્તાત્પરિવેષ્ટિતમ્ ॥ ૨૩॥

વ્યાઘ્રાદયો મહાવીર્યા અલ્પવીર્યાન્મહામતે ।
તદાશ્રમે ન બાધન્તે દ્વિજવર્યપ્રભાવતઃ ॥ ૨૪॥

ઉવાસ તત્ર નૃપતિર્મહાકારુણિકો બુધઃ ।
સત્કૃતો મુનિનાથેન સુવચો ભોજનાસનૈઃ ॥ ૨૫॥

એકદા સ મહારાજશ્ચિન્તામાપ દુરત્યયામ્ ।
અહો મે હીનભાગ્યસ્ય દુર્બુદ્ધેર્હીનતેજસઃ ॥ ૨૬॥

હૃતં રાજ્યમશેષેણ શત્રુવર્ગૈર્મદોદ્ધતૈઃ ।
મત્પૂર્વૈ રક્ષિતં રાજ્યં શત્રુભિર્ભુજ્યતેઽધુના ॥ ૨૭॥

માદૃશશ્ચૈત્રવંશેઽસ્મિન્ન કોઽપ્યાસીન્મહીપતિઃ ।
કિં કરોમિ ક્વ ગચ્છામિ કથં રાજ્યં લભેય હિ ॥ ૨૮॥

અમાત્યા મન્ત્રિણશ્ચૈવ મામકા યે સનાતનાઃ ।
ન જાને કં ચ નૃપતિં સમાસાદ્યાધુનાસતે ॥ ૨૯॥

વિનાશ્ય રાજ્યમધુના ન જાને કાં ગતિં ગતાઃ ।
રણભૂમિમહોત્સાહા અરિવર્ગનિકર્તનાઃ ॥ ૩૦॥

મામકા યે મહાશૂરા નૃપમન્યં ભજન્તિ તે ।
પર્વતાભા ગજા અશ્વા વાતવદ્વેગગામિનઃ ॥ ૩૧॥

પૂર્વપૂર્વાર્જિતઃ કોશઃ પાલ્યતે તૈર્ન વાધુના ।
એવં મોહવશં યાતો રાજા પરમધાર્મિકઃ ॥ ૩૨॥

એતસ્મિન્નન્તરે તત્ર વૈશ્યઃ કશ્ચિત્સમાગતઃ ।
રાજા પપ્રચ્છ કસ્ત્વં ભોઃ કિમર્થમિહ ચાગતઃ ॥ ૩૩॥

દુર્મના લક્ષ્યસે કસ્માદેતન્મે બ્રૂહિ સામ્પ્રતમ્ ।
ઇત્યાકર્ણ્ય વચો રમ્યં નરપાલેન ભાષિતમ્ ॥ ૩૪॥

દૃગ્ભ્યાં વિમુઞ્ચન્નશ્રૂણિ સમાધિર્વૈશ્યપુઙ્ગવઃ ।
પ્રત્યુવાચ મહીપાલં પ્રણયાવનતાં ગિરમ્ ॥ ૩૫॥

વૈશ્ય ઉવાચ ।
સમાધિર્નામ વૈશ્યોઽહં ધનિવંશસમુદ્ભવઃ ।
પુત્રદારાદિભિસ્ત્યક્તો ધનલોભાન્મહીપતે ॥ ૩૬॥

વનમભ્યાગતો રાજન્દુઃખિતઃ સ્વેન કર્મણા ।
સોઽહં પુત્રપ્રપૌત્રાણાં કલત્રાણાં તથૈવ ચ ॥ ૩૭॥

ભ્રાતૃણાં ભ્રાતૃપુત્રાણાં પરેષાં સુહૃદાં તથા ।
ન વેદ્મિ કુશલં સમ્યક્ કરુણાસાગર પ્રભો ॥ ૩૮॥

રાજોવાચ ।
નિષ્કાસિતો યૈઃ પુત્રાદ્યૈર્દુર્વૃત્તૈર્ધનગર્ધિભિઃ ।
તેષુ કિં ભવતા પ્રીતિઃ ક્રિયતે મૂર્ખજન્તુવત્ ॥ ૩૯॥

વૈશ્ય ઉવાચ ।
સમ્યગુક્તં ત્વયા રાજન્વચઃ સારાર્થબૃંહિતમ્ ।
તથાપિ સ્નેહપાશેન મોહ્યતેઽતીવ મે મનઃ ॥ ૪૦॥

એવં મોહાકુલૌ વૈશ્યપાર્થિવૌ મુનિસત્તમ ।
જગ્મતુર્મુનિવર્યસ્ય મેધસઃ સન્નિધિં તદા ॥ ૪૧॥

સ વૈશ્યરાજસહિતો નરરાજઃ પ્રતાપવાન્ ।
પ્રણનામ મહાવીરઃ શિરસા યોગિનાં વરમ્ ॥ ૪૨॥

બદ્ધ્વાઞ્જલિમિમાં વાચમુવાચ નૃપતિર્મુનિમ્ ।
ભગવન્નાવયોર્મોહં છેત્તુમર્હસિ સામ્પ્રતમ્ ॥ ૪૩॥

અહં રાજશ્રિયા ત્યક્તો ગહનં વનમાશ્રિતઃ ।
તથાપિ હૃતરાજ્યસ્ય તોષો નૈવાભિજાયતે ॥ ૪૪॥

અયં ચ વૈશ્યઃ સ્વજનૈર્દારાદ્યૈર્નિષ્કૃતો ગૃહાત્ ।
તથાપ્યેતસ્ય મમતા ન નિવૃત્તિં સમશ્નુતે ॥ ૪૫॥

કિમત્ર કારણં બ્રૂહિ જ્ઞાનિનોરપિ નો મનઃ ।
મોહેન વ્યાકુલં જાતં મહત્યેષા હિ મૂર્ખતા ॥ ૪૬॥

ઋષિરુવાચ ।
મહામાયા જગદ્ધાત્રી શક્તિરૂપા સનાતની ।
સા મોહયતિ સર્વેષાં સમાકૃષ્ય મનાંસિ વૈ ॥ ૪૭॥

બ્રહ્માદયઃ સુરાઃ સર્વે યન્માયામોહિતાઃ પ્રભો ।
ન જાનન્તિ પરં તત્ત્વં મનુષ્યાણાં ચ કા કથા ॥ ૪૮॥

સા સૃજત્યખિલં વિશ્વં સૈવ પાલયતીતિ ચ ।

સૈવ સંહરતે કાલે ત્રિગુણા પરમેશ્વરી ॥ ૪૯॥

યસ્યોપરિ પ્રસન્ના સા વરદા કામરૂપિણી ।
સ એવ મોહમત્યેતિ નાન્યથા નૃપસત્તમ ॥ ૫૦॥

રાજોવાચ ।
કા સા દેવી મહામાયા યા ચ મોહયતેઽખિલાન્ ।
કથં જાતા ચ સા દેવી કૃપયા વદ મે મુને ॥ ૫૧॥

ઋષિરુવાચ ।
જગત્યેકાર્ણવે જાતે શેષમાસ્તીર્ય યોગરાટ્ ।
યોગનિદ્રામુપાશ્રિત્ય યદા સુષ્વાપ કેશવઃ ॥ ૫૨॥

તદા દ્વાવસુરૌ જાતૌ વિષ્ણોઃ કર્ણમલેન વૈ ।
મધુકૈટભનામાનૌ વિખ્યાતૌ પૃથિવીતલે ॥ ૫૩॥

પ્રલયાર્કપ્રભૌ ઘોરૌ મહાકાયૌ મહાહનૂ ।
દંષ્ટ્રાકરાલવદનૌ ભક્ષયન્તૌ જગન્તિ વા ॥ ૫૪॥

તૌ દૃષ્ટ્વા ભગવન્નાભિપઙ્કજે કમલાસનમ્ ।
હનનાયોદ્યતાવાસ્તાં કસ્ત્વં ભોરિતિ વાદિનૌ ॥ ૫૫॥

સમાલોક્ય તુ તૌ દૈત્યૌ સુરજ્યેષ્ઠો જનાર્દનમ્ ।
શયાનં ચ પયોમ્ભોધૌ તુષ્ટાવ પરમેશ્વરીમ્ ॥ ૫૬॥

બ્રહ્મોવાચ ।
રક્ષ રક્ષ મહામાયે શરણાગતવત્સલે ।
એતાભ્યાં ઘોરરૂપાભ્યાં દૈત્યાભ્યાં જગદમ્બિકે ॥ ૫૭॥

પ્રણમામિ મહામાયાં યોગનિદ્રામુમાં સતીમ્ ।
કાલરાત્રિં મહારાત્રિં મોહરાત્રિં પરાત્પરામ્ ॥ ૫૮॥

ત્રિદેવજનનીં નિત્યાં ભક્તાભીષ્ટફલપ્રદામ્ ।
પાલિનીં સર્વદેવાનાં કરુણાવરુણાલયામ્ ॥ ૫૯॥

ત્વત્પ્રભાવાદહં બ્રહ્મા માધવો ગિરિજાપતિઃ ।
સૃજત્યવતિ સંસારં કાલે સંહરતીતિ ચ ॥ ૬૦॥

ત્વં સ્વાહા ત્વં સ્વધા ત્વં હ્રીસ્ત્વં બુદ્ધિર્વિમલા મતા ।
તુષ્ટિઃ પુષ્ટિસ્ત્વમેવામ્બ શાન્તિઃ ક્ષાન્તિઃ ક્ષુધા દયા ॥ ૬૧॥

વિષ્ણુમાયા ત્વમેવામ્બ ત્વમેવ ચેતના મતા ।
ત્વં શક્તિઃ પરમા પ્રોક્તા લજ્જા તૃષ્ણા ત્વમેવ ચ ॥ ૬૨॥

ભ્રાન્તિસ્ત્વં સ્મૃતિરૂપા ત્વં માતૃરૂપેણ સંસ્થિતા ।
ત્વં લક્ષ્મીર્ભવને પુંસાં પુણ્યાચારપ્રવર્તિનામ્ ॥ ૬૩॥

ત્વં જાતિસ્ત્વં મતા વૃત્તિર્વ્યાપ્તિરૂપા ત્વમેવ હિ ।
ત્વમેવ ચિત્તિરૂપેણ વ્યાપ્ય કૃત્સ્નં પ્રતિષ્ઠિતા ॥ ૬૪॥

સા ત્વમેતૌ દુરાધર્ષાવસુરૌ મોહયામ્બિકે ।
પ્રબોધય જગદ્યોને નારાયણમજં વિભુમ્ ॥ ૬૫॥

ઋષિરુવાચ ।
બ્રહ્મણા પ્રાર્થિતા સેયં મધુકૈટભનાશને ।
મહાવિદ્યા જગદ્ધાત્રી સર્વવિદ્યાધિદેવતા ॥ ૬૬॥

દ્વાદશ્યાં ફાલ્ગુનસ્યૈવ શુક્લાયાં સમભૂન્નૃપ ।
મહાકાલીતિ વિખ્યાતા શક્તિસ્ત્રૈલોક્યમોહિની ॥ ૬૭॥

તતોઽભવદ્વિયદ્વાણી મા ભૈષીઃ કમલાસન ।
કણ્ટકં નાશયામ્યદ્ય હત્વાજૌ મધુકૈટભૌ ॥ ૬૮॥

ઇત્યુક્ત્વા સા મહામાયા નેત્રવક્ત્રાદિતો હરેઃ ।
નિર્ગમ્ય દર્શને તસ્થૌ બ્રહ્મણોઽવ્યક્તજન્મનઃ ॥ ૬૯॥

ઉત્તસ્થૌ ચ હૃષીકેશો દેવદેવો જનાર્દનઃ ।
સ દદર્શ પુરો દૈત્યૌ મધુકૈટભસંજ્ઞકૌ ॥ ૭૦॥

તાભ્યાં પ્રવવૃત્તે યુદ્ધં વિષ્ણોરતુલતેજસઃ ।
પઞ્ચવર્ષસહસ્રાણિ બાહુયુદ્ધમભૂત્તદા ॥ ૭૧॥

મહામાયાપ્રભાવેણ મોહિતૌ દાનવોત્તમૌ ।
જજલ્પતૂ રમાકાન્તં ગૃહાણ વરમીપ્સિતમ્ ॥ ૭૨॥

નારાયણ ઉવાચ ।
મયિ પ્રસન્નૌ યદિ વાં દીયતામેષ મે વરઃ ।
મમ વધ્યાવુભૌ નાન્યં યુવાભ્યાં પ્રાર્થયે વરમ્ ॥ ૭૩॥

ઋષિરુવાચ ।
એકાર્ણવાં મહીં દૃષ્ટ્વા પ્રોચતુઃ કેશવં વચઃ ।

આવાં જહિ ન યત્રાસૌ ધરણી પયસાપ્લુતા ॥ ૭૪॥

તથાસ્તુ પ્રોચ્ય ભગવાંશ્ચક્રમુત્થાપ્ય સૂજ્જ્વલમ્ ।
ચિચ્છેદ શિરસી કૃત્વા સ્વકીયજઘને તયોઃ ॥ ૭૫॥

એવં તે કથિતો રાજન્ કાલિકાયાઃ સમુદ્ભવઃ ।
મહાલક્ષ્મ્યાસ્તથોત્પત્તિં નિશામય મહામતે ॥ ૭૬॥

નિર્વિકારાદિ સાકારા નિરાકારાપિ દેવ્યુમા ।
દેવાનાં તાપનાશાર્થં પ્રાદુરાસીદ્યુગે યુગે ॥ ૭૫॥

યદિચ્છાવૈભવં સર્વં તસ્યા દેહગ્રહઃ સ્મૃતઃ ।
લીલયા સાપિ ભક્તાનાં ગુણવર્ણનહેતવે ॥ ૭૮॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં મધુકૈટભવધે મહાકાલિકાવતારવર્ણનં નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ ॥ ૫.૪૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૪૬. ષટ્ચત્વારિંશોઽધ્યાયઃ । મહાલક્ષ્મ્યવતારવર્ણનમ્ ।

ઋષિરુવાચ ।
આસીદ્રમ્ભાસુરો નામ દૈત્યવંશશિરોમણિઃ ।
તસ્માજ્જાતો મહાતેજા મહિષો નામ દાનવઃ ॥ ૧॥

સ સઙ્ગ્રામે સુરાન્સર્વાન્નિર્જિત્ય દનુજાધિપઃ ।
ચકાર રાજ્યં સ્વર્લોકે મહેન્દ્રાસનસંસ્થિતઃ ॥ ૨॥

પરાજિતાસ્તતો દેવા બ્રહ્માણં શરણં યયુઃ ।
બ્રહ્માપિ તાન્સમાદાય યયૌ યત્ર વૃષાકપી ॥ ૩॥

તત્ર ગત્વા સુરાઃ સર્વે નત્વા શઙ્કરકેશવૌ ।
સ્વવૃત્તં કથયામાસુર્યથાવદનુપૂર્વશઃ ॥ ૪॥

ભગવન્તૌ વયં સર્વે મહિષેણ દુરાત્મના ।
ઉજ્જાસિતાશ્ચ સ્વર્લોકાન્નિર્જિત્ય સમરાઙ્ગણે ॥ ૫॥

ભ્રમામો મર્ત્યલોકેઽસ્મિન્ન લભેમહિશં ક્વચિત્ ।

કાં કાં ન દુર્દશાં નીતા દેવા ઇન્દ્રપુરોગમાઃ ॥ ૬॥

સૂર્યાચન્દ્રમસૌ પાશી કુબેરો યમ એવ ચ ।
ઇન્દ્રાગ્નિવાતગન્ધર્વા વિદ્યાધરસુચારણાઃ ॥ ૭॥

એતેષામપરેષાં ચ વિધેયં કર્મ સોઽસુરઃ ।
સ્વયં કરોતિ પાપાત્મા દૈત્યપક્ષાભયઙ્કર ॥ ૮॥

તસ્માચ્છરણમાપન્નાન્દેવાન્નસ્ત્રાતુમર્હથઃ ।
વધોપાયં ચ તસ્યાશુ ચિન્તયેથાં યુવાં પ્રભૂ ॥ ૯॥

ઇતિ દેવવચઃ શ્રુત્વા દામોદરસતીશ્વરૌ ।
ચક્રતુઃ પરમં કોપં રોષાઘૂર્ણિતલોચનૌ ॥ ૧૦॥

તતોઽતિકોપપૂર્ણસ્ય વિષ્ણોઃ શમ્ભોશ્ચ વક્ત્રતઃ ।
તથાન્યેષાં ચ દેવાનાં શરીરાન્નિર્ગતં મહઃ ॥ ૧૧॥

અતીવ મહસઃ પુઞ્જં જ્વલન્તં દશદિક્ષુ ચ ।
અપશ્યંસ્ત્રિદશાઃ સર્વે દુર્ગાધ્યાનપરાયણાઃ ॥ ૧૨॥

સર્વદેવશરીરોત્થં તેજસ્તદતિભીષણમ્ ।
સઙ્ઘીભૂયાભવન્નારી સાક્ષાન્મહિષમર્દિની ॥ ૧૩॥

શમ્ભુતેજસ ઉત્પન્નં મુખમસ્યાઃ સુભાસ્વરમ્ ।
યામ્યેન બાલા અભવન્વૈષ્ણવેન ચ બાહવઃ ॥ ૧૪॥

ચન્દ્રમસ્તેજસા તસ્યાઃ સ્તનયુગ્મં વ્યજાયત ।
મધ્યમૈન્દ્રેણ જઙ્ઘોરૂ વારુણેન બભૂવતુઃ ॥ ૧૫॥

ભૂતેજસા નિતમ્બોઽભૂદ્ બ્રાહ્મેણ ચરણદ્વયમ્ ।
આર્કેણ ચરણાઙ્ગુલ્યઃ કરાઙ્ગુલ્યશ્ચ વાસવાત્ ॥ ૧૬॥

કુબેરતેજસા નાસા રદનાશ્ચ પ્રજાપતેઃ ।
પાવકીયેન નયનત્રયં સાન્ધ્યેન ભ્રૂદ્વયમ્ ॥ ૧૭॥

આનિલેન શ્રવોદ્વન્દ્વં તથાન્યેષાં સ્વરોકસામ્ ।
તેજસા સમ્ભવા પદ્માલયા સા પરમેશ્વરી ॥ ૧૮॥

તતો નિખિલદેવાનાં તેજોરાશિસમુદ્ભવામ્ ।
તામાલોક્ય સુરાઃ સર્વે પરં હર્ષં પ્રપેદિરે ॥ ૧૯॥

નિરાયુધાં ચ તાં દૃષ્ટ્વા બ્રહ્માદ્યાસ્ત્રિદિવેશ્વરાઃ ।
સાયુધાં તાં શિવાં કર્તું મનઃ સન્દધિરે સુરાઃ ॥ ૨૦॥

તતઃ શૂલં મહેશાનો મહેશાન્યૈ સમર્પયત્ ।
ચક્રં ચ કૃષ્ણો ભગવાન્ શઙ્ખં પાશં ચ પાશભૃત્ ॥ ૨૧॥

શક્તિં હુતાશનોઽયચ્છન્મારુતશ્ચાપમેવ ચ ।
બાણપૂર્ણેષુધી ચૈવ વજ્રઘણ્ટે શચીપતિઃ ॥ ૨૨॥

યમો દદૌ કાલદણ્ડમક્ષમાલાં પ્રજાપતિઃ ।
બ્રહ્મા કમણ્ડલું પ્રાદાદ્રોમરશ્મીન્દિવાકરઃ ॥ ૨૩॥

કાલઃ ખડ્ગં દદૌ તસ્યૈ ફલકં ચ સમુજ્વલમ્ ।
ક્ષીરાબ્ધી રુચિરં હારમજરે ચ તથામ્બરે ॥ ૨૪॥

ચૂડામણિં કુણ્ડલે ચ કટકાનિ તથૈવ ચ ।
અર્દ્ધચન્દ્રં ચ કેયૂરાન્નૂપુરૌ ચ મનોહરૌ ॥ ૨૫॥

ગ્રૈવેયકમઙ્ગુલીષુ સમસ્તાસ્વઙ્ગુલીયકમ્ ।
વિશ્વકર્મા ચ પરશું દદૌ તસ્યૈ મનોહરમ્ ॥ ૨૬॥

અસ્ત્રાણ્યનેકાનિ તથાભેદ્યં ચૈવ તનુચ્છદમ્ ।
સુરમ્યસરસાં માલાં પઙ્કજં ચામ્બુધિર્દદૌ ॥ ૨૭॥

દદૌ સિંહં ચ હિમવાન્ રત્નાનિ વિવિધાનિ ચ ।
સુરયા પૂરિતં પાત્રં કુબેરોઽસ્યૈ સમર્પયત્ ॥ ૨૮॥

શેષશ્ચ ભોગિનાં નેતા વિચિત્રરચનાઞ્ચિતમ્ ।
દદૌ તસ્યૈ નાગહારં નાનાસન્મણિગુમ્ફિતમ્ ॥ ૨૯॥

એતૈશ્ચાન્યૈઃ સુરૈર્દેવી ભૂષણૈરાયુધૈસ્તથા ।
સત્કૃતોચ્ચૈર્નનાદાસૌ સાટ્ટહાસં પુનઃપુનઃ ॥ ૩૦॥

તસ્યા ભીષણનાદેન પૂરિતા ચ નભઃસ્થલી ।
પ્રતિશબ્દો મહાનાસીચ્ચુક્ષુભે ભુવનત્રયમ્ ॥ ૩૧॥

ચેલુઃ સમુદ્રાશ્ચત્વારો વસુધા ચ ચચાલ હ ।
જયશબ્દસ્તતો દેવૈરકારિ મહિષાર્દિતૈઃ ॥ ૩૨॥

તતોઽમ્બિકાં પરાં શક્તિં મહાલક્ષ્મીસ્વરૂપિણીમ્ ।
તુષ્ટુવુસ્તે સુરાઃ સર્વે ભક્તિગદ્ગદયા ગિરા ॥ ૩૩॥

લોકં સક્ષુબ્ધમાલોક્ય દેવતાપરિપન્થિનઃ ।
સન્નદ્ધસૈનિકાસ્તે ચ સમુત્તસ્થુરુદાયુધાઃ ॥ ૩૪॥

મહિષોઽપિ ચ તં શબ્દમભ્યધાવદ્રુષાન્વિતઃ ।
સ દદર્શ તતો દેવીં વ્યાપ્તલોકત્રયાં રુચા ॥ ૩૫॥

એતસ્મિન્નન્તરે તત્ર મહિષાસુરપાલિતાઃ ।
સમાજગ્મુર્મહાવીરાઃ કોટિશો ધૃતહેતયઃ ॥ ૩૬॥

ચિક્ષુરશ્ચામરોદગ્રૌ કરાલોદ્ધતવાષ્કલાઃ ।
તામ્રોગ્રાસ્યોગ્રવીર્યાશ્ચ બિડાલોઽન્ધક એવ ચ ॥ ૩૭॥

દુર્ધરો દુર્મુખશ્ચૈવ ત્રિનેત્રશ્ચ મહાહનુઃ ।
એતે ચાન્યે ચ બહવઃ શૂરા યુદ્ધવિશારદાઃ ॥ ૩૮॥

યુયુધુઃ સમરે દેવ્યા સહ શસ્ત્રાસ્ત્રપારગાઃ ।
ઇત્થં કાલો વ્યતીયાય યુધ્યતોર્ભીષણસ્તયોઃ ॥ ૩૯॥

અરિવર્ગકરક્ષિપ્તા નાનાશસ્ત્રાસ્ત્રરાશયઃ ।
મહામાયાપ્રભાવેણ વિફલા અભવન્ ક્ષણાત્ ॥ ૪૦॥

તતો જઘાન સા દેવી ચિક્ષુરપ્રમુખાનરીન્ ।
સગણાન્ગદયા બાણૈઃ શૂલશક્તિપરશ્વધૈઃ ॥ ૪૧॥

એવં સ્વીયેષુ સૈન્યેષુ હતેષુ મહિષાસુરઃ ।
દેવીનિઃશ્વાસસમ્ભૂતાન્ભાવયામાસ તાન્ગણાન્ ॥ ૪૨॥

અતાડયત્ખુરૈઃ કાશ્ચિત્કાશ્ચિચ્છૃઙ્ગદ્વયેન ચ ।
લાઙ્ગૂલેન ચ તુણ્ડેન ભિનત્તિ સ્મ મુહુર્મુહુઃ ॥ ૪૩॥

ઇત્થં દેવીગણાન્હત્વાભ્યધાવત્સોઽસુરાધિપઃ ।
સિંહં મારયિતું દેવ્યાસ્તતોઽસૌ કુપિતોઽભવત્ ॥ ૪૪॥

કોપાત્સોઽપિ મહાવીર્યઃ ખુરકુટ્ટિતભૂતલઃ ।
શૃઙ્ગાભ્યાં શૈલમુત્પાટ્ય ચિક્ષેપ પ્રણનાદ ચ ॥ ૪૫॥

વેગેન વિષ્વગ્ ભ્રમતા પ્રક્ષિપ્તા ગુરવોઽદ્રયઃ ।
આકાશતો મહીમધ્યે નિપેતુર્નૃપસત્તમ ॥ ૪૬॥

શૃઙ્ગભિન્નાઃ પયોવાહાઃ ખણ્ડં ખણ્ડમયાસિષુઃ ॥

લાઙ્ગૂલેનાહતશ્ચાબ્ધિર્વિષ્વગુદ્વેલમસ્પદત્ ॥ ૪૭॥

એવં ક્રુદ્ધં સમાલોક્ય મહિષાસુરમમ્બિકા ।
વિદધે તદ્વધોપાયં દેવાનામભયઙ્કરી ॥ ૪૮॥

તતઃ પાશં સમુત્થાપ્ય ક્ષિપ્ત્વા તસ્યોપરીશ્વરી ।
બબન્ધ મહિષં સોઽપિ રૂપં તત્યાજ માહિષમ્ ॥ ૪૯॥

તતઃ સિંહો બભૂવાશુ માયાવી તચ્છિરોઽમ્બિકા ।
યાવદ્ભિનત્તિ તાવત્સ ખડ્ગપાણિર્બભૂવ હ ॥ ૫૦॥

સચર્માસિકરં તં ચ દેવી બાણૈરતાડયત્ ।
તતો ગજવપુર્ભૂત્વા સિંહં ચિચ્છેદ શુણ્ડયા ॥ ૫૧॥

તતોઽસ્ય ચ કરં દેવી ચકર્ત સ્વમહાસિના ।
અધારિ ચ પુના રૂપં સ્વકીયં તેન રક્ષસા ॥ ૫૨॥

તદૈવ ક્ષોભયામાસ ત્રૈલોક્યં સચરાચરમ્ ।
તતઃ ક્રુદ્ધા મહામાયા ચણ્ડિકા માનવિક્રમા ॥ ૫૩॥

પપૌ પુનઃ પુનઃ પાનં જહાસોદ્ભ્રાન્તલોચના ।
જગર્જ ચાસુરઃ સોઽપિ બલવીર્યમદોદ્ધતઃ ॥ ૫૪॥

તસ્યા ઉપરિ ચિક્ષેપ શૈલાનુત્પાટ્ય સોઽસુરઃ ।
સા ચ બાણાવલીઘાતૈશ્ચૂર્ણયામાસ સત્વરમ્ ॥ ૫૫॥

વારુણીમદસઞ્જાતમુખરાગાકુલેન્દ્રિયા ।
પ્રોવાચ પરમેશાની મેઘગમ્ભીરયા ગિરા ॥ ૫૬॥

દેવ્યુવાચ ।
રે મૂઢ રે હતપ્રજ્ઞ વ્યર્થં કિં કુરુષે હઠમ્ ।
ન મદગ્રેઽસુરાઃ કેઽપિ સ્થાસ્નવો જગતીત્રયે ॥ ૫૭॥

ઋષિ રુવાચ ।
એકમાભાષ્ય કૂર્દિત્વા દેવી સર્વકલામયી ।
પદાક્રમ્યાસુરં કણ્ઠે શૂલેનોગ્રેણ સાભિનત્ ॥ ૫૮॥

તતસ્તચ્ચરણાક્રાન્તઃ સ સ્વકીયમુખાત્તતઃ ।
અર્ધનિષ્ક્રાન્ત એવાસીદ્દેવ્યા વીર્યેણ સંવૃતઃ ॥ ૫૯॥

અર્ધનિષ્ક્રાન્ત એવાસૌ યુધ્યમાનો મહાધમઃ ।
મહાસિના શિરો ભિત્ત્વા ન્યપાતિ ધરણીતલે ॥ ૬૦॥

હા હા શબ્દં સમુચ્ચાર્યાવાઙ્મુખાસ્તદ્ગણાસ્તતઃ ।
પલાયન્ત રણાદ્ભીતાસ્ત્રાહિ ત્રાહીતિ વાદિનઃ ॥ ૬૧॥

તુષ્ટુવુશ્ચ તદા દેવીમિન્દ્રાદ્યાઃ સકલાઃ સુરાઃ ।
ગન્ધર્વા ગીતમુચ્ચેરુર્નનૃતુર્નર્તકીજનાઃ ॥ ૬૨॥

એવં તે કથિતો રાજન્મહાલક્ષ્મ્યાઃ સમુદ્ભવઃ ।
સરસ્વત્યાસ્તથોત્પત્તિં શ‍ૃણુ સુસ્થેન ચેતસા ॥ ૬૩॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં મહિષાસુરવધોપાખ્યાને મહાલક્ષ્મ્યવતારવર્ણનં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ ॥ ૫.૪૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૪૭. સપ્તચત્વરિંશોઽધ્યાયઃ । ધૂમ્રલોચનચણ્ડમુણ્ડરક્તબીજવધઃ ।

ઋષિરુવાચ ।
આસીચ્છુમ્ભાસુરો દૈત્યો નિશુમ્ભશ્ચ પ્રતાપવાન્ ।
ત્રૈલોક્યમોજસાક્રાન્તં ભ્રાતૃભ્યાં સચરાચરમ્ ॥ ૧॥

તાભ્યાં પ્રપીડિતા દેવા હિમવન્તં સમાયયુઃ ।
જનનીં સર્વભૂતાનાં કામદાત્રીં વવન્દિરે ॥ ૨॥

દેવા ઊચુઃ ।
જય દુર્ગે મહેશાનિ જયાત્મીયજનપ્રિયે ।
ત્રૈલોક્યત્રાણકારિણ્યૈ શિવાયૈ તે નમો નમઃ ॥ ૩॥

નમો મુક્તિપ્રદાયિન્યૈ પરામ્બાયૈ નમો નમઃ ।
નમઃ સમસ્તસંસારોત્પત્તિસ્થિત્યન્તકારિકે ॥ ૪॥

કાલિકારૂપસમ્પન્ને નમસ્તારાકૃતે નમઃ ।
છિન્નમસ્તાસ્વરૂપાયૈ શ્રીવિદ્યાયૈ નમોઽસ્તુ તે ॥ ૫॥

ભુવનેશિ નમસ્તુભ્યં નમસ્તે ભૈરવાકૃતે ।

નમોઽસ્તુ બગલામુખ્યૈ ધૂમાવત્યૈ નમો નમઃ ॥ ૬॥

નમસ્ત્રિપુરસુન્દર્ય્યૈ માતઙ્ગ્યૈ તે નમો નમઃ ।
અજિતાયૈ નમસ્તુભ્યં વિજયાયૈ નમો નમઃ ॥ ૭॥

જયાયૈ મઙ્ગલાયૈ તે વિલાસિન્યૈ નમો નમઃ ।
દોગ્ધ્રીરૂપે નમસ્તુભ્યં નમો ઘોરાકૃતેઽસ્તુ તે ॥ ૮॥

નમોઽપરાજિતાકારે નિત્યાકારે નમો નમઃ ।
શરણાગતપાલિન્યૈ રુદ્રાણ્યૈ તે નમો નમઃ ॥ ૯॥

નમો વેદાન્તવેદ્યાયૈ નમસ્તે પરમાત્મને ।
અનન્તકોટિબ્રહ્માણ્ડનાયિકાયૈ નમો નમઃ ॥ ૧૦॥

ઇતિ દેવૈઃ સ્તુતા ગૌરી પ્રસન્ના વરદા શિવા ।
પ્રોવાચ ત્રિદશાન્સર્વાન્યુષ્માભિઃ સ્તૂયતેઽત્ર કા ॥ ૧૧॥

તતો ગૌરીતનોરેકા પ્રાદુરાસીત્કુમારિકા ।
સોવાચ મિષતાં તેષાં શિવશક્તિં પરાદરાત્ ॥ ૧૨॥

સ્તોત્રં મે ક્રિયતે માતઃ સમસ્તૈઃ સ્વર્ગવાસિભિઃ ।
નિશુમ્ભશુમ્ભદૈત્યાભ્યાં પ્રબલાભ્યાં પ્રપીડિતૈઃ ॥ ૧૩॥

શરીરકોશાદ્યત્તસ્યા નિર્ગતા તેન કૌશિકી ।
નામ્ના સા ગીયતે સાક્ષાચ્છુમ્ભાસુરનિબર્હિણી ॥ ૧૪॥

ચૈવોગ્રતારિકા પ્રોક્તા મહોગ્રતારિકાપિ ચ ।
પ્રાદુર્ભૂતા યતઃ સા વૈ માતઙ્ગીત્યુચ્યતે ભુવિ ॥ ૧૫॥

બભાષે નિખિલાન્દેવાન્યૂયં તિષ્ઠત નિર્ભયાઃ ।
કાર્યં વઃ સાધયિષ્યામિ સ્વતન્ત્રાહં વિનાશ્રયમ્ ॥ ૧૬॥

ઇત્યુક્ત્વા સા તદા દેવી તરસાન્તર્હિતાભવત્ ।
ચણ્ડમુણ્ડૌ તુ તાં દેવીમદ્રાષ્ટાં સેવકૌ તયોઃ ॥ ૧૭॥

દૃષ્ટ્વા મનોહરં તસ્યા રૂપં નેત્રસુખાવહમ્ ।
પેતતુસ્તૌ ધરામધ્યે નષ્ટસંજ્ઞૌ વિમોહિતૌ ॥ ૧૮॥

ગત્વા વ્યાજહ્રતુઃ સર્વં રાજ્ઞે વૃત્તાન્તમાદિતઃ ।
દૃષ્ટા કાચિન્મયાપૂર્વા નારી રાજન્મનોહરા ॥ ૧૯॥

હિમવચ્છિખરે રમ્યે સંસ્થિતા સિંહવાહિની ।
સમન્તાદ્દેવકન્યાભિઃ સેવિતા બદ્ધપાણિભિઃ ॥ ૨૦॥

કુરુતે પાદસંવાહં કાચિત્સંસ્કુરુતે કચાન્ ।
પાણિસંવાહનં કાચિત્કાચિન્નેત્રાઞ્જનં ન્યધાત્ ॥ ૨૧॥

કાચિદ્ ગૃહીત્વા હસ્તેનાદર્શં દર્શયતે મુખમ્ ।
નાગવલ્લીં દદાત્યેકા લવઙ્ગૈલાદિસંયુતામ્ ॥ ૨૨॥

પતદ્ગ્રહં કરે કૃત્વા સ્થિતા કાચિત્સખી પુરઃ ।
ભૂષયત્યખિલાઙ્ગાનિ કાચિદ્ભૂષામ્બરાદિભિઃ ॥ ૨૩॥

કદલીસ્તમ્ભજઙ્ઘોરુઃ કીરનાસાહિદોર્લતા ।
રણન્મઞ્જીરચરણા રમ્યમેખલયા યુતા ॥ ૨૪॥

લસત્કસ્તૂરિકામોદમુક્તાહારચલસ્તની ।
ગ્રૈવેયકલસદ્ગ્રીવા લલન્તી દામમણ્ડિતા ॥ ૨૫॥

અર્ધચન્દ્રધરા દેવી મણિકુણ્ડલધારિણી ।
રમ્યવેણિર્વિશાલાક્ષી લોચનત્રયભૂષિતા ॥ ૨૬॥

સાક્ષરા માલિકોપેતા પાણિરાજિતકઙ્કણા ।
સ્વર્ણોર્મિકાઙ્ગુલિર્ભ્રાજત્પારિહાર્યલસત્કરા ॥ ૨૭॥

શુભ્રવસ્ત્રાવૃતા ગૌરી પદ્માસનવિરાજિતા ।
કાશ્મીરબિન્દુતિલકા ચન્દ્રાલઙ્કૃતમસ્તકા ॥ ૨૮॥

તડિદ્દ્યુતિર્મહામૂલ્યામ્બરચોલોન્નમત્કુચા ।
ભુજૈરષ્ટાભિરુત્તુઙ્ગૈર્ધારયન્તી વરાયુધાન્ ॥ ૨૯॥

તાદૃશી નાસુરી નાગી ન ગન્ધર્વી ન દાનવી ।
વિદ્યતે ત્રિષુ લોકેષુ યાદૃશી સા મનોરમા ॥ ૩૦॥

તસ્માત્સમ્ભોગયોગ્યત્વં તસ્યાસ્ત્વય્યેવ શોભતે ।
નારીરત્નં યતઃ સા વૈ પુંરત્નં ચ ભવાન્પ્રભો ॥ ૩૧॥

ઇત્યુક્તં ચણ્ડમુણ્ડાભ્યાં નિશમ્ય સ મહાસુરઃ ।
દૂતં સુગ્રીવનામાનં પ્રેષયામાસ તાં પ્રતિ ॥ ૩૨॥

ગચ્છ દૂત તુષારાદ્રૌ તત્રાસ્તે કાપિ સુન્દરી ।
સા નેતવ્યા પ્રયત્નેન કથયિત્વા વચો મમ ॥ ૩૩॥

ઇતિ વિજ્ઞાપિતસ્તેન સુગ્રીવો દાનવોત્તમઃ ।
ગત્વા હિમાચલં પ્રાહ જગદમ્બાં મહેશ્વરીમ્ ॥ ૩૪॥

દૂત ઉવાચ ।
દેવિ શુમ્ભાસુરો દૈત્યો નિશુમ્ભસ્તસ્ય ચાનુજઃ ।
વિખ્યાતસ્ત્રિષુ લોકેષુ મહાબલપરાક્રમઃ ॥ ૩૫॥

ચારોઽહં પ્રેષિતસ્તેન સન્નિધિં તે સમાગમમ્ ।
સ યજ્જગૌ સુરેશાનિ તત્સમાકર્ણયાધુના ॥ ૩૬॥

ઇન્દ્રાદીન્સમરે જિત્વા તેષાં રત્નાન્યપાહરમ્ ।
દેવભાગં સ્વયં ભુઞ્જે યાગે દત્તં સુરાદિભિઃ ॥ ૩૭॥

સ્ત્રીરત્નં ત્વામહં મન્યે સર્વરત્નોપરિસ્થિતમ્ ।
સા ત્વં મમાનુજં માં વા ભજતાત્કામજૈ રસૈઃ ॥ ૩૮॥

ઇતિ દૂતોક્તમાકર્ણ્ય વચનં શુમ્ભભાષિતમ્ ।
જગાદ સા મહામાયા ભૂતેશપ્રાણવલ્લભા ॥ ૩૯॥

દેવ્યુવાચ ।
સત્યં વદસિ ભો દૂત નાનૃતં કિઞ્ચિદુચ્યતે ।
પરં ત્વેકા કૃતા પૂર્વં પ્રતિજ્ઞા તાં નિબોધ મે ॥ ૪૦॥

યો મે દર્પં વિધુનુતે યો માં જયતિ સઙ્ગરે ।
ઉત્સહે તમહં કર્તું પતિં નાન્યમિતિ ધ્રુવમ્ ॥ ૪૧॥

સ ત્વં કથય શુમ્ભાય નિશુમ્ભાય વચો મમ ।
યથા યુક્તં ભવેદેવં વિદધાતુ તથાત્ર સઃ ॥ ૪૨॥

ઇત્થં દેવીવચઃ શ્રુત્વા સુગ્રીવો નામ દાનવઃ ।
રાજ્ઞે વિજ્ઞાપયામાસ ગત્વા તત્ર સવિસ્તરમ્ ॥ ૪૩॥

અથ દૂતોક્તમાકર્ણ્ય શુમ્ભો ભૈરવશાસનઃ ।
ધૂમ્રાક્ષં પ્રાહ સક્રોધઃ સેનાન્યં બલિનાં વરમ્ ॥ ૪૪॥

હે ધૂમ્રાક્ષ તુષારાદ્રૌ વર્તતે કાપિ સુન્દરી ।
તામાનય દ્રુતં ગત્વા યથા યાસ્યતિ સાત્ર વૈ ॥ ૪૫॥

તસ્યા આનયને ભીતિર્ન કાર્યાસુરસત્તમ ।

યુદ્ધં કાર્યં પ્રયત્નેન યદિ સા યોદ્ધુમિચ્છતિ ॥ ૪૬॥

એવં વિજ્ઞાપિતો દૈત્યો ધૂમ્રલોચનસંજ્ઞકઃ ।
ગત્વા હિમાચલં પ્રાહ ભુવનેશીમુમાંશજામ્ ॥ ૪૭॥

ભર્તુર્મમાન્તિકં ગચ્છ નો ચેત્ત્વાં ઘાતયામ્યહમ્ ।
પુષ્ટ્યાસુરાણાં સહિતઃ સહસ્રાણાં નિતમ્બિનિ ॥ ૪૮॥

દેવ્યુવાચ ।
દૈત્યરાટ્ પ્રેષિતો વીર હંસિ ચેત્કિં કરોમિ તે ।
પરન્ત્વસાધ્યં ગમનં મન્યે સઙ્ગ્રામમન્તરા ॥ ૪૯॥

ઇત્યુક્તસ્તામન્વધાવદ્દાનવો ધૂમ્રલોચનઃ ।
હુઙ્કારોચ્ચારણેનૈવ તં દદાહ મહેશ્વરી ॥ ૫૦॥

તતઃ પ્રભૃતિ સા દેવી ધૂમાવત્યુચ્યતે ભુવિ ।
આરાધિતા સ્વભક્તાનાં શત્રુવર્ગનિકર્તિની ॥ ૫૧॥

ધૂમ્રાક્ષે નિહતે દેવ્યા વાહનેનાતિકોપિના ।
ચર્વિતાસ્તદ્ગણાઃ સર્વેઽપલાયન્તાવશેષિતાઃ ॥ ૫૨॥

ઇત્થં દેવ્યા હતં દૈત્યં શ્રુત્વા શુમ્ભઃ પ્રતાપવાન્ ।
ચકાર બહુલં કોપં સન્દષ્ટૌષ્ઠપુટદ્વયઃ ॥ ૫૩॥

ચણ્ડં મુણ્ડં રક્તબીજં પ્રૈષયત્ક્રમતોઽસુરાન્ ।
તેઽપિ ચાજ્ઞાપિતા દૈત્યા યયુર્યત્રામ્બિકા સ્થિતા ॥ ૫૪॥

સિંહારૂઢા ભગવતીમણિમાદિભિરાશ્રિતામ્ ।
ભાસયન્તીં દિશો ભાસા દૃષ્ટ્વોચુર્દાનવર્ષભાઃ ॥ ૫૫॥

હે દેવિ તરસા મૂલં યાહિ શુમ્ભનિશુમ્ભયોઃ ।
અન્યથા ઘાતયિષ્યામઃ સગણાં ત્વાં સવાહનામ્ ॥ ૫૬॥

વૃણીષ્વ તં પતિં વામે લોકપાલાદિભિઃ સ્તુતમ્ ।
પ્રપત્સ્યસે મહાનન્દં દેવાનામપિ દુર્લભમ્ ॥ ૫૭॥

ઇત્યુક્તમાકલય્યામ્બા સ્મયિત્વા પરમેશ્વરી ।
ઉદાજહાર સા દેવી સૂનૃતં રસવદ્વચઃ ॥ ૫૮॥

દેવ્યુવાચ ।
અદ્વિતીયો મહેશાનઃ પરબ્રહ્મ સદાશિવઃ ।

યત્તત્ત્વં ન વિદુર્વેદા વિષ્ણ્વાદીનાં ચ કા કથા ॥ ૫૯॥

તસ્યાહં પ્રકૃતિઃ સૂક્ષ્મા કથમન્યં પતિં વૃણે ।
સિંહી કામાતુરા નૈવ જમ્બુકં વૃણુતે ક્વચિત્ ॥ ૬૦॥

કરેણુર્ગર્દભં નૈવ દ્વીપિની શશકં ન વા ।
મૃષા વદત ભો દૈત્યો મૃત્યુવ્યાલનિયન્ત્રિતાઃ ॥ ૬૧॥

યૂયં પ્રયાત પાતાલં યુધ્યધ્વં શક્તિરસ્તિ ચેત્ ।
ઇતિ ક્રોધકરં વાક્યં શ્રુત્વોચુસ્તે પરસ્પરમ્ ॥ ૬૨॥

અબલાં મનસિ જ્ઞાત્વા ન હન્મો ભવતીં વયમ્ ।
અથો સ્થિરૈહિ પઞ્ચાસ્યે યુદ્ધેચ્છા માનસેઽસ્તિ ચેત્ ॥ ૬૩॥

તેષામેવં વિવદતાં કલહઃ સમવર્ધત ।
વવૃષુઃ સમરે બાણા ઉભયોર્દલયોઃ શિતાઃ ॥ ૬૪॥

એવં તૈઃ સમરં કૃત્વા લીલયા પરમેશ્વરી ।
જઘાન ચણ્ડમુણ્ડાભ્યાં રક્તબીજં મહાસુરમ્ ॥ ૬૫॥

દ્વેષબુદ્ધિં વિધાયાપિ ત્રિદશારાતયોઽપ્યમી ।
અન્તે પ્રાપન્પરં લોકં યઁલ્લોકં યાન્તિ તજ્જનાઃ ॥ ૬૬॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં ધૂમ્રલોચનચણ્ડમુણ્ડરક્તબીજવધો નામ સપ્તચત્વારિંશોઽધ્યાયઃ ॥ ૫.૪૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૪૮. અષ્ટચત્વારિંશોઽધ્યાયઃ । સરસ્વતીપ્રાદુર્ભાવવર્ણનમ્ ।

રાજોવાચ ॥

ધૂમ્રાક્ષં ચણ્ડમુણ્ડં ચ રક્તબીજાસુરં તથા ।
ભગવન્નિહતં દેવ્યા શ્રુત્વા શુમ્ભઃ સુરાર્દનઃ ॥ ૧॥

કિમકાર્ષીત્તતો બ્રહ્મન્નેતન્મે બ્રૂહિ સામ્પ્રતમ્ ।
શુશ્રૂષવે જગદ્યોનેશ્ચરિત્રં પાપનાશનમ્ ॥ ૨॥

ઋષિરુવાચ ।

હતાનિમાન્દૈત્યવરાન્મહાસુરો
નિશમ્ય રાજન્મહનીયવિક્રમઃ ।
અજિજ્ઞપત્સ્વીયગણાન્દુરાસદાન્
રણાભિધોચ્ચારણજાતસમ્મદાન્ ॥ ૩॥

બલાન્વિતાઃ સમ્મિલિતા મમાજ્ઞયા
જયાશયા કાલકવંશસમ્ભવાઃ ।
સકાલકેયાસુરમૌર્યદૌર્હૃદાઃ
તથા પરેઽપ્યાશુ પ્રયાણયન્તુ તે ॥ ૪॥

નિશુમ્ભશુમ્ભૌ દિતિજાન્નિદેશ્ય તાન્
રથાધિરૂઢૌ નિરયામ્બભૂવતુઃ ।
બલાન્યનૂકાબલિનોસ્તયોર્ધરાદ્
વિનાશવન્તઃ શલભા ઇવોત્થિતાઃ ॥ ૫॥

પ્રવાદયામાસ મૃદઙ્ગમર્દલં
સભેરિકાડિણ્ડિમઝર્ઝરાનકમ્ ।
રણસ્થલે સઞ્જહૃષૂ રણપ્રિયા
અસુપ્રિયાઃ સઙ્ગરતઃ પરાયયુઃ ॥ ૬॥

ભટાશ્ચ તે યુદ્ધપટાવૃતાસ્તદા
રણસ્થલીમાપુરપાપવિગ્રહાઃ ।
ગૃહીતશસ્ત્રાસ્ત્રચયા જિગીષયા
પરસ્પરં વિગ્રહયન્ત ઉલ્બણમ્ ॥ ૭॥

ગજાધિરૂઢાસ્તુરગાધિરોહિણો
રથાધિરૂઢાશ્ચ તથાપરેઽસુરાઃ ।
અલક્ષયન્તઃ સ્વપરાઞ્જનાન્મુદાઽ-
સુરેશસઙ્ગે સમરેઽભિરેભિરે ॥ ૮॥

ધ્વનિઃ શતઘ્નીજનિતો મુહુર્મુહુ-
ર્બભૂવ તેન ત્રિદશાઃ સમેજિતાઃ ।
મહાન્ધકારઃ સમપદ્યતામ્બરે
વિલોક્યતે નો રથમણ્ડલં રવેઃ ॥ ૯॥

પદાતયો નિર્વ વજુર્હિ કોટિશઃ
પ્રભૂતમાના વિજયાભિલાષિણઃ ।

રથાશ્વગા વારણગા અથાપરેઽ-
સુરા નિરીયુઃ કતિ કોટિશો મુદા ॥ ૧૦॥

અશુક્લશૈલા એવ મત્તવારણા
અતાનિષુશ્ચીત્કૃતિશબ્દમાહવે ।
ક્રમેલકાશ્ચાપિ ગલદ્ગલધ્વનિં
વિતન્વતે ક્ષુદ્રમહીધરોપમાઃ ॥ ૧૧॥

હયાશ્ચ હ્રેષન્ત ઉદગ્રભૂમિજા
વિશાલકણ્ઠાભરણા ગતેર્વિદઃ ।
પદાનિ દન્તાવલમૂર્ધ્નિ બિભ્રતઃ
સુડિડ્યિરે વ્યોમપથા યથાવયઃ ॥ ૧૨॥

સમીક્ષ્ય શત્રોર્બલમિત્થમાપતત્
ચકાર સજ્યં ધનુરમ્બિકા તદા ।
નનાદ ઘણ્ટાં રિપુસાદદાયિનીં
જગર્જ સિંહોઽપિ સટાં વિધૂનયન્ ॥ ૧૩॥

તતો નિશુમ્ભસ્તુહિનાચલસ્થિતાં
વિલોક્ય રમ્યાભરણાયુધાં શિવામ્ ।
ગિરં બભાષે રસનિર્ભરાં પરાં
વિલાસનીભાવવિચક્ષણો યથા ॥ ૧૪॥

ભવાદૃશીનાં રમણીયવિગ્રહે
દુનોતિ કીર્ણં ખલુ માલતીદલમ્ ।
કથં કરાલાહવમાતનોષ્યસે
મહેશિ તેનૈવ મનોજ્ઞવર્ષ્મણા ॥ ૧૫॥

ઇતીરયિત્વા વચનં મહાસુરો
બભૂવ મૌની તમુવાચ ચણ્ડિકા ।
વૃથા કિમાત્થાસુર મૂઢ સઙ્ગરં
કુરુષ્વ નાગાલયમન્યથા વ્રજ ॥ ૧૬॥

તતોઽતિરુષ્ટઃ સમરે મહારથ-
શ્ચકાર બાણાવલિવૃષ્ટિમદ્ભુતામ્ ।
ઘનાઘનાઃ સંવવૃષુર્યથોદકં
રણસ્થલે પ્રાવૃડિવાગતાસ્તદા ॥ ૧૭॥

શરૈશ્શિતૈઃ શૂલપરશ્વધાયુધૈઃ
સભિન્દિપાલૈઃ પરિઘૈઃ શરાસનૈઃ ।
ભુશુણ્ડિકાપ્રાસક્ષુરપ્રસંજ્ઞકૈ-
ર્મહાસિભિઃ સંયુયુધે મદોદ્ધતૈઃ ॥ ૧૮॥

વિબભ્રમુસ્તત્સમરે મહાગજા
વિભિન્નકુમ્ભા અસિતાદ્રિસન્નિભાઃ ।
ચલદ્બલાકાધવલા વિકેતવો
વિસેતવઃ શુમ્ભનિશુમ્ભકેતવઃ ॥ ૧૯॥

વિભિન્નદેહા દિતિજા ઝષોપમા
વિકન્ધરા વાજિગણા ભયઙ્કરાઃ ।
પરાસવઃ કાલિકયા કૃતા રણે
મૃગારિણા ચામિષતાં પરેઽસુરાઃ ॥ ૨૦॥

વિસુસ્રુવૂ રક્તવહાસ્તદન્તરે
સરિચ્ચયાસ્તત્ર વિપુપ્લુવે હતૈઃ ।
કચા ભટાનાં જલનીલિકોપમા-
સ્તદુત્તરીયં સિતફેનસન્નિભમ્ ॥ ૨૧॥

તુરઙ્ગસાદી તુરગાધિરોહિણં
ગજસ્થિતાનભ્યપતન્ગજારુહઃ ।
રથી રથેશં ખલુ પત્તિરઙ્ઘ્રિગાન્
સમપ્રતિદ્વન્દ્વિકલિર્મહાનભૂત્ ॥ ૨૨॥

તતો નિશુમ્ભો હૃદયે વ્યચિન્તયત્
કરાલકાલોઽયમુપાગતોઽધુના ।
ભવેદ્દરિદ્રોઽપિ મહાધનો મહા-
ધનો દરિદ્રો વિપરીતકાલતઃ ॥ ૨૩॥

જડો ભવેત્સ્ફીતમતિર્મહામતિ-
ર્જડો નૃશંસો બહુમન્તુસંસ્તુતઃ ।
પરાજયં યાન્તિ રણે મહાબલા
જયન્તિ સઙ્ગ્રામમુખે ચ દુર્બલાઃ ॥ ૨૪॥

જયોઽજયો વા પરમેશ્વરેચ્છયા

ભવત્યનાયાસત એવ દેહિનામ્ ।
ન કાલમુલ્લઙ્ઘ્ય શશાક જીવિતું
મહેશ્વરઃ પદ્મજની રમાપતિઃ ॥ ૨૫॥

ઉપેત્ય સઙ્ગ્રામમુખં પલાયનં
ન સાધુ વીરા હૃદયેઽનુમન્વતે ।
પરન્તુ યુદ્ધે કથમેતયા જયો
વિનાશિતં મે સકલં બલં યથા ॥ ૨૬॥

ઇયં હિ નૂનં સુરકર્મ સાધિતું
સમાગતા દૈત્યબલં ચ બાધિતુમ્ ।
પુરાણમૂર્તિઃ પ્રકૃતિઃ પરા શિવા
ન લૌકિકીયં વનિતા કદાપિ વા ॥ ૨૭॥

વધોઽપિ નારીવિહિતોઽયશસ્કરઃ
પ્રગીયતે યુદ્ધરસં લિલિક્ષુભિઃ ।
તથાપ્યકૃત્વા સમરં કથં મુખં
પ્રદર્શયામોઽસુરરાજસન્નિધૌ ॥ ૨૮॥

વિચારયિત્વેતિ મહારથો રથં
મહાન્તમધ્યાસ્ય નિયન્તૃચોદિતમ્ ।
યયૌ દ્રુતં યત્ર મહેશ્વરાઙ્ગના
સુરાઙ્ગનાપ્રાર્થિતયૌવનોદ્ગમા ॥ ૨૯॥

અવોચદેનાં સ મહેશિ કિં ભવે-
દેભિર્હતૈર્વેતનજીવિભિર્ભટૈઃ ।
તવાસ્તિ કાઙ્ક્ષા યદિ યોદ્ધુમાવયો-
સ્તદા રણઃ સ્યાદ્ધૃતયુદ્ધસત્પટૈઃ ॥ ૩૦॥

ઉવાચ કાલીં પ્રતિ કૌશિકી તદા
સમીક્ષ્યતામેષ દુરાગ્રહોઽનયોઃ ।
કરોતિ કાલો વિપદાગમે મતિં
વિભિન્નવૃત્તિં સદસત્પ્રવર્તકઃ ॥ ૩૧॥

તતો નિશુમ્ભોઽભિજઘાન ચણ્ડિકાં
શરૈઃ સહસ્રૈશ્ચ તથૈવ કાલિકામ્ ।
બિભેદ બાણાનસુરપ્રચોદિતાન્

સહસ્રખણ્ડં સ્વશરોત્કરૈઃ શિવા ॥ ૩૨॥

તતઃ સમુત્થાપ્ય કૃપાણમુજ્જ્વલં
સચર્મ કણ્ઠીરવમૂર્ધ્ન્યતાડયત્ ।
બિભેદ તં ચાપિ મહાસિનામ્બિકા
યથા કુઠારેણ તરું તરુશ્છિદઃ ॥ ૩૩॥

સ ભિન્નખડ્ગો નિચખાન માર્ગણં
પરામ્બિકાવક્ષસિ સોઽપિ ચિચ્છિદે ।
પુનસ્ત્રિશૂલં હૃદયેઽક્ષિપત્તદ-
પ્યચૂર્ણયન્મુષ્ટિનિપાતનેન સા ॥ ૩૪॥

ગદાં સમાદાય પુનર્મહારથો-
ઽભ્યધાવદમ્બાં મરણોન્મુખોઽસુરઃ ।
અચૂર્ણયત્તામપિ શૂલધારયા
પુનસ્ત્રિશૂલં વિદદાર સોઽન્યયા ॥ ૩૫॥

તતોઽમ્બિકા ભીમભુજઙ્ગમોપમૈઃ
સુરદ્વિષાં શોણિતચૂષણોચિતૈઃ ।
નિશુમ્ભમાત્મીયશિલીમુખૈઃ શિતૈ-
ર્નિહત્ય ભૂમીમનયદ્વિષોક્ષિતૈઃ ॥ ૩૬॥

નિપાતિતેઽમાનબલેઽસુરપ્રભુઃ
કનીયસિ ભ્રાતરિ રોષપૂરિતઃ ।
રથસ્થિતો બાહુભિરષ્ટભિર્વૃતો
જગામ યત્ર પ્રમદા મહેશિતુઃ ॥ ૩૭॥

અવાદયચ્છઙ્ખમરિન્દમં તદા
ધનુઃસ્વનં ચાપિ ચકાર દુઃસહમ્ ।
નનાદ સિંહોઽપિ સટાં વિધૂનયન્
બભૂવ નાદત્રયનાદિતં નભઃ ॥ ૩૮॥

તતોઽટ્ટહાસં જગદમ્બિકાઽકરો-
દ્વિતત્રસુસ્તેન સુરારયોઽખિલાઃ ।
જયેતિ શબ્દં જગદુસ્તદા સુરા
યદામ્બિકોવાચ રણે સ્થિરો ભવ ॥ ૩૯॥

સ દૈત્યરાજો મહતીં જ્વલચ્છિખાં
મુમોચ શક્તિં નિહતા ચ સોલ્કયા ।
બિભેદ શુમ્ભપ્રહિતાન્ શરાન્ શિવા
શિવેરિતાન્સોઽપિ સહસ્રધા શરાન્ ॥ ૪૦ ॥

ત્રિશૂલમુત્ક્ષિપ્ય જઘાન ચણ્ડિકા
મહાસુરં તં સ પપાત મૂર્ચ્છિતઃ ।
વિભિન્નપક્ષો હરિણા યથા નગઃ
પ્રકમ્પયન્ દ્યાં વસુધાં સવારિધિમ્ ॥ ૪૧ ॥

તતો મૃષિત્વા ત્રિશિખોદ્ભવાં વ્યથાં
વિધાય બાહૂનયુતં મહાબલઃ ।
સ કાલિકાં સિંહયુતાં મહેશ્વરીં
જઘાન ચક્રૈરમરક્ષયઙ્કરૈઃ ॥ ૪૨ ॥

તદસ્ય ચક્રાણિ વિભિદ્ય લીલયા
ત્રિશૂલમુદ્ધૂર્ય જઘાન સાસુરમ્ ।
શિવાજગત્પાવનપાણિપઙ્કજા-
દુપાત્તમૃત્યૂ પરમં પદં ગતૌ ॥ ૪૩ ॥

હતે તસ્મિન્મહાવીર્યે નિશુમ્ભે ભીમવિક્રમે ।
શુમ્ભે ચ સકલા દૈત્યા વિવિશુર્બલિસદ્મનિ ॥ ૪૪ ॥

ભક્ષિતા અપરે કાલીસિંહાદ્યૈરમરદ્વિષઃ ।
પલાયિતાસ્તથાન્યે ચ દશદિક્ષુ ભયાકુલાઃ ॥ ૪૫ ॥

બભૂવુર્માર્ગવાહિન્યઃ સરિતઃ સ્વચ્છપાથસઃ ।
વવુર્વાતાઃ સુખસ્પર્શા નિર્મલત્વં યયૌ નભઃ ॥ ૪૬ ॥

પુનર્યાગઃ સમારેભે દેવૈર્બ્રહ્મર્ષિભિસ્તથા ।
સુખિનશ્ચાભવન્સર્વે મહેન્દ્રાદ્યા દિવૌકસઃ ॥ ૪૭ ॥

પવિત્રં પરમં પુણ્યમુમાયાશ્ચરિતં પ્રભો ।
દૈત્યરાજવધોપેતં શ્રદ્ધયા યઃ સમભ્યસેત્ ॥ ૪૮ ॥

સ ભુક્ત્વેહાખિલાન્ભોગાંસ્ત્રિદશૈરપિ દુર્લભાન્ ।
પરત્રોમાલયં ગચ્છેન્મહામાયાપ્રસાદતઃ ॥ ૪૯ ॥

ઋષિરુવાચ ।

એવં દેવી સમુત્પન્ના શુમ્ભાસુરનિબર્હિણી ।
પ્રોક્તા સરસ્વતી સાક્ષાદુમાંશાવિર્ભવા નૃપ ॥ ૫૦॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં નિશુમ્ભશુમ્ભવધોપાખ્યાને સરસ્વતીપ્રાદુર્ભાવવર્ણનં નામાષ્ટચત્વારિંશોઽધ્યાયઃ ॥ ૫.૪૮॥

૫.૪૯
॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૪૯. એકોનપઞ્ચાશત્તમોઽધ્યાયઃ । ઉમાપ્રાદુર્ભાવવર્ણનમ્ ।

મુનય ઊચુઃ ।
ઉમાયા ભુવનેશાન્યાઃ સૂત સર્વાર્થવિત્તમ ।
અવતારં સમાચક્ષ્વ યતો જાતા સરસ્વતી ॥ ૧॥

યા ગીયતે પરબ્રહ્મમૂલપ્રકૃતિરીશ્વરી ।
નિરાકારાપિ સાકારા નિત્યા નન્દમયી સતી ॥ ૨॥

સૂત ઉવાચ ।
તાપસાઃ શ્ ૃણુત પ્રેમ્ણા ચરિત્રં પરમં મહત્ ।
યસ્ય વિજ્ઞાનમાત્રેણ નરો યાતિ પરાં ગતિમ્ ॥ ૩॥

દેવદાનવયોર્યુદ્ધમેકદાસીત્પરસ્પરમ્ ।
મહામાયાપ્રભાવેણામરાણાં વિજયોઽભવત્ ॥ ૪॥

તતોઽવલિપ્તા અમરાઃ સ્વપ્રશંસાં વિતેનિરે ।
વયં ધન્યા વયં ધન્યાઃ કિં કરિષ્યન્તિ નોઽસુરાઃ ॥ ૫॥

યે પ્રભાવં સમાલોક્યાસ્માકં પરમદુઃસહમ્ ।
ભીતા નાગાલયં યાતા યાત યાતેતિ વાદિનઃ ॥ ૬॥

અહો બલમહો તેજો દૈત્યવંશક્ષયઙ્કરમ્ ।
અહો ભાગ્યં સુમનસામેવં સર્વેઽભ્યવર્ણયન્ ॥ ૭॥

તત આવિરભૂત્તેજઃ કૂટરૂપં તદૈવ હિ ।
અદૃષ્ટપૂર્વં તદ્ દૃષ્ટ્વા વિસ્મિતા અભવન્સુરાઃ ॥ ૮॥

કિમિદં કિમિદં ચેતિ રુદ્ધકણ્ઠાઃ સમબ્રુવન ।
અજાનન્તઃ પરં શ્યામાનુભાવં માનભઞ્જનમ્ ॥ ૯॥

તત આજ્ઞાપયદ્દેવાન્ દેવાનામધિનાયકઃ ।
યાત યૂયં પરીક્ષધ્વં યાથાતથ્યેન કિન્વિતિ ॥ ૫.૪૯.૧૦॥

સુરેન્દ્રપ્રેરિતો વાયુર્મહસઃ સન્નિધિં ગતઃ ।
કસ્ત્વં ભોરિતિ સમ્બોધ્યાવોચદેનં ચ તન્મહઃ ॥ ૧૧॥

ઇતિ પૃષ્ટસ્તદા વાયુર્મહસાતિગરીયસા ।
વાયુરસ્મિ જગત્પ્રાણઃ સાભિમાનોઽબ્રવીદિદમ્ ॥ ૧૨॥

જઙ્ગમાજઙ્ગમં સર્વમોતપ્રોતમિદં જગત્ ।
મય્યેવ નિખિલાધારે ચાલયામ્યખિલં જગત્ ॥ ૧૩॥

તદોવાચ મહાતેજઃ શક્તોઽસિ યદિ ચાલને ।
ધૃતમેતત્તૃણં વાયો ચાલયસ્વ નિજેચ્છયા ॥ ૧૪॥

તતઃ સર્વપ્રયત્નેનાકરોદ્યત્નં સદાગતિઃ ।
ન ચચાલ યદા સ્થાનાત્તદાસૌ લજ્જિતોઽભવત ॥ ૧૫॥

તૂષ્ણીં ભૂત્વા તતો વાયુર્જગામેન્દ્રંસભાં પ્રતિ ।
કથયામાસ તદ્ વૃત્તં સ્વકીયાભિભવાન્વિતમ્ ॥ ૧૬॥

સર્વેશત્વં વયં સર્વે મૃષૈવાત્મનિ મન્મહે ।
ન પારયામહે કિઞ્ચિદ્વિધાતું ક્ષુદ્રવસ્ત્વપિ ॥ ૧૭॥

તતશ્ચ પ્રેષયામાસ મરુત્વાન્સકલાન્સુરાન્ ।
ન શેકુસ્તે યદા જ્ઞાતું તદેન્દ્રઃ સ્વયમભ્યગાત્ ॥ ૧૮॥

મઘવન્તમથાયાન્તં દૃષ્ટ્વા તેજોઽતિદુઃસહમ્ ।
બભૂવાન્તર્હિતં સદ્યો વિસ્મિતોઽભૂચ્ચ વાસવઃ ॥ ૧૯॥

ચરિત્રમીદૃશં યસ્ય તમેવ શરણં શ્રયે ।

ઇતિ સઞ્ચિન્તયામાસ સહસ્રાક્ષઃ પુનઃ પુનઃ ॥ ૫.૪૯.૨૦॥

એતસ્મિન્નન્તરે તત્ર નિર્વ્યાજકરુણાતનુઃ ।
તેષામનુગ્રહં કર્તું હર્તું ગર્વં શિવાઙ્ગના ॥ ૨૧॥

ચૈત્રશુક્લનવમ્યાં તુ મધ્યાહ્નસ્થે દિવાકરે ।

પ્રાદુરાસીદુમા દેવી સચ્ચિદાનન્દરૂપિણી ॥ ૨૨॥

મહોમધ્યે વિરાજન્તી ભાસયન્તી દિશો રુચા ।
બોધયન્તી સુરાન્સર્વાન્ બ્રહ્મૈવાહમિતિ સ્ફુટમ્ ॥ ૨૩॥

ચતુર્ભિર્દધતી હસ્તૈર્વરપાશાઙ્કુશાભયાન્ ।
શ્રુતિભિઃ સેવિતા રમ્યા નવયૌવનગર્વિતા ॥ ૨૪॥

રક્તામ્બરપરીધાના રક્તમાલ્યાનુલેપના ।
કોટિકન્દર્પસઙ્કાશા ચન્દ્રકોટિસમપ્રભા ॥ ૨૫॥

વ્યાજહાર મહામાયા સર્વાન્તર્યામિરૂપિણી ।
સાક્ષિણી સર્વભૂતાનાં પરબ્રહ્મસ્વરૂપિણી ॥ ૨૬॥

ઉમોવાચ ।
ન બ્રહ્મા ન સુરારાતિર્ન પુરારાતિરીશ્વરઃ ।
મદગ્રે ગર્વિતું કિઞ્ચિત્કા કથાન્યસુપર્વણામ્ ॥ ૨૭॥

પરં બ્રહ્મ પરં જ્યોતિઃ પ્રણવદ્વન્દ્વરૂપિણી ।
અહમેવાસ્મિ સકલં મદન્યો નાસ્તિ કશ્ચન ॥ ૨૮॥

નિરાકારાપિ સાકારા સર્વતત્ત્વસ્વરૂપિણી ।
અપ્રતર્ક્યગુણા નિત્યા કાર્યકારણરૂપિણી ॥ ૨૯॥

કદાચિદ્દયિતાકારા કદાચિત્પુરુષાકૃતિઃ ।
કદાચિદુભયાકારા સર્વાકારાહમીશ્વરી ॥ ૫.૪૯.૩૦॥

વિરઞ્ચિઃ સૃષ્ટિકર્તાહં જગત્પાતાહમચ્યુતઃ ।
રુદ્રઃ સંહારકર્તાહં સર્વવિશ્વવિમોહિની ॥ ૩૧॥

કાલિકાકમલાવાણીમુખાઃ સર્વા હિ શક્તયઃ ।
મદંશાદેવ સઞ્જાતાસ્તથેમાઃ સકલાઃ કલાઃ ॥ ૩૨॥

મત્પ્રભાવાજ્જિતાઃ સર્વે યુષ્માભિર્દિતિનન્દનાઃ ।
તામવિજ્ઞાય માં યૂયં વૃથા સર્વેશમાનિનઃ ॥ ૩૩॥

યથા દારુમયીં યોષાં નર્તયત્યૈન્દ્રજાલિકઃ ।
તથૈવ સર્વભૂતાનિ નર્તયામ્યહમીશ્વરી ॥ ૩૪॥

મદ્ભયાદ્વાતિ પવનઃ સર્વં દહતિ હવ્યભુક્ ।
લોકપાલાઃ પ્રકુર્વન્તિ સ્વસ્વકર્માણ્યનારતમ્ ॥ ૩૫॥

કદાચિદ્દેવવર્ગાણાં કદાચિદ્દિતિજન્મનામ્ ।
કરોમિ વિજયં સમ્યક્ સ્વતન્ત્રા નિજલીલયા ॥ ૩૬॥

અવિનાશિ પરં ધામ માયાતીતં પરાત્પરમ્ ।
શ્રુતયો વર્ણયન્તે યત્તદ્રૂપં તુ મમૈવ હિ ॥ ૩૭॥

સગુણં નિર્ગુણં ચેતિ મદ્રૂપં દ્વિવિધં મતમ્ ।
માયાશબલિતં ચૈકં દ્વિતીયં તદનાશ્રિતમ્ ॥ ૩૮॥

એવં વિજ્ઞાય માં દેવાઃ સ્વં સ્વં ગર્વં વિહાય ચ ।
ભજત પ્રણયોપેતાઃ પ્રકૃતિં માં સનાતનીમ્ ॥ ૩૯॥

ઇતિ દેવ્યા વચઃ શ્રુત્વા કરુણાગર્ભિતં સુરાઃ ।
તુષ્ટુવુઃ પરમેશાનીં ભક્તિસન્નતકન્ધરાઃ ॥ ૫.૪૯.૪૦॥

ક્ષમસ્વ જગદીશાનિ પ્રસીદ પરમેશ્વરિ ।
મૈવં ભૂયાત્કદાચિન્નો ગર્વો માતર્દયાં કુરુ ॥ ૪૧॥

તતઃપ્રભૃતિ તે દેવા હિત્વા ગર્વં સમાહિતાઃ ।
ઉમામારાધયામાસુર્યથાપૂર્વં યથાવિધિ ॥ ૪૨॥

ઇતિ વઃ કથિતો વિપ્રા ઉમાપ્રાદુર્ભવો મયા ।
યસ્ય શ્રવણમાત્રેણ પરમં પદમશ્નુતે ॥ ૪૩॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયામુમાપ્રાદુર્ભાવવર્ણનં નામૈકોનપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૫.૪૯॥

૫.૫૦
॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૫૦. પઞ્ચાશત્તમોઽધ્યાયઃ । શતાક્ષ્યાદ્યવતારવર્ણનમ્ ।

મુનય ઊચુઃ ।
શ્રોતુકામા વયં સર્વે દુર્ગાચરિતમન્વહમ્ ।
અપરં ચ મહાપ્રાજ્ઞ તત્ત્વં વર્ણય નોઽદ્ભુતમ્ ॥ ૧॥

શ ૃણ્વતાં ત્વન્મુખામ્ભોજાત્ કથા નાના સુધોપમાઃ ।

ન તૃપ્યતિ મનોઽસ્માકં સૂત સર્વાર્થવિત્તમ ॥ ૨॥

સૂત ઉવાચ ।
દુર્ગમઃ પ્રથિતો નામ્ના રુરુપુત્રો મહાબલઃ ।
બ્રહ્મણો વરદાનેન ચતસ્રોઽલભત શ્રુતીઃ ॥ ૩॥

દેવાજેયબલં ચાપિ સમ્પ્રાપ્ય જગતીતલે ।
કરોતિ સ્મ બહૂત્પાતાન્દિવિ દેવાશ્ચકમ્પિરે ॥ ૪॥

સર્વા નષ્ટેષુ વેદેષુ ક્રિયા નષ્ટા બભૂવ હ ।
બ્રાહ્મણાશ્ચ દુરાચારા બભૂવુઃ સસુરાસ્તદા ॥ ૫॥

ન દાનં ન તપોઽત્યુગ્રં ન યાગો હવનં ન હિ ।
અનાવૃષ્ટિસ્તતો જાતા પૃથિવ્યાં શતવાર્ષિકી ॥ ૬॥

હાહાકારો મહાનાસીત્ ત્રિષુ લોકેષુ દુઃખિતાઃ ।
અભવંશ્ચ જનાઃસર્વે ક્ષુત્તૃડ્ભ્યાં પીડિતા ભૃશમ્ ॥ ૭॥

સરિતઃ સાગરાશ્ચૈવ વાપીકૂપસરાંસિ ચ ।
નિર્જલા અભવન્સર્વે સંશુષ્કા વૃક્ષવીરુધઃ ॥ ૮॥

તતો દૃષ્ટ્વા મહાદુઃખં પ્રજાનાં દીનચેતસામ્ ।
ત્રિદશાઃ શરણં યાતા યોગમાયાં મહેશ્વરીમ્ ॥ ૯॥

દેવા ઊચુઃ ।
રક્ષ રક્ષ મહામાયે સ્વકીયાઃ સકલાઃ પ્રજાઃ ।
કોપં સંહર નૂનં ત્વં લોકા નઙ્ક્ષ્યન્તિ ચાન્યથા ॥ ૫.૫૦.૧૦॥

યથા શુમ્ભો હતો દૈત્યો નિશુમ્ભશ્ચ મહાબલઃ ।
ધૂમ્રાક્ષશ્ચણ્ડમુણ્ડૌ ચ રક્તબીજો મહાબલઃ ॥ ૧૧॥

સમધુઃ કૈટભો દૈત્યો મહિષાસુર એવ ચ ।
તથૈવામું કૃપાસિન્ધો દીનબન્ધો જહિ દ્રુતમ્ ॥ ૧૨॥

અપરાધો ભવત્યેવ બાલકાનાં પદે પદે ।
સહતે કો જનો લોકે કેવલં માતરં વિના ॥ ૧૩॥

યદા યદાભવદ્દુઃખં દેવાનાં બ્રહ્મણાં તથા ।
તદા તદાવતીર્યાશુ કુરુષે સુખિનો જનાન્ ॥ ૧૪॥

ઇતિ વિક્લવિતં તેષાં સમાકર્ણ્ય કૃપામયી ।

અનન્તાક્ષમયં રૂપં દર્શયામાસ સામ્પ્રતમ્ ॥ ૧૫॥

ધનુર્બાણૌ તથા પદ્મં નાનામૂલફલાનિ ચ ।
ચતુર્ભિર્દધતી હસ્તૈઃ પ્રસન્નમુખપઙ્કજા ॥ ૧૬॥

તતો દૃષ્ટ્વા પ્રજાસ્તમાઃ કરુણાપૂરિતેક્ષણા ।
રુરોદ નવ ઘસ્રાણિ નવ રાત્રીઃ સમાકુલા ॥ ૧૭॥

મોચયામાસ દૃષ્ટિભ્યો વારિધારાઃ સહસ્રશઃ ।
તાભિઃ પ્રતર્પિતા લોકા ઔષધ્યઃ સકલા અપિ ॥ ૧૮॥

અગાધતોયાઃ સરિતો બભૂવુઃ સાગરા અપિ ।
રુરુહુર્ધરણીપૃષ્ઠે શાકમૂલફલાનિ ચ ॥ ૧૯॥

વિતતાર કરસ્થાનિ સુમનોભ્યઃ ફલાનિ ચ ।
ગોભ્યસ્તૃણાનિ રમ્યાણિ તથાન્યેભ્યો યથાર્હતઃ ॥ ૫.૫૦.૨૦॥

સન્તુષ્ટા અભવન્સર્વે સદેવદ્વિજમાનુષાઃ ।
તતો જગાદ સા દેવી કિમન્યત્કરવાણિ વઃ ॥ ૨૧॥

સમેત્યોચુસ્તદા દેવા ભવત્યા તોષિતા જનાઃ ।
વેદાન્દેહિ કૃપાં કૃત્વા દુર્ગમેણ સમાહૃતામ્ ॥ ૨૨॥

તથાસ્ત્વિતિ પ્રભાષ્યાહ યાત યાત નિજાલયમ્ ।
વિતરિષ્યામિ વો વેદાનચિરેણૈવ કાલતઃ ॥ ૨૩॥

તતઃ પ્રમુદિતા દેવાઃ સ્વં સ્વં ધામ સમાયયુઃ ।
સુપ્રણમ્ય જગદ્યોનિં ફુલ્લેન્દીવરલોચનામ્ ॥ ૨૪॥

તતઃ કોલાહલો જાતો દિવિ ભૂમ્યન્તરિક્ષકે ।
તચ્છ્રુત્વા રૌરવઃ સદ્યો ન્યરુણત્સર્વતઃ પુરીમ્ ॥ ૨૫॥

તતસ્તેજોમયં ચક્રં વિધાય પરિતઃ શિવા ।
રક્ષણાર્થં દેવતાનાં સ્વયં તસ્માદ્ બહિર્ગતા ॥ ૨૬॥

તતઃ સમભવદ્યુદ્ધં દેવ્યા દૈત્યસ્ય ચોભયોઃ ।
વવૃષુઃ સમરે બાણાન્નિશિતાન્કઙ્કટચ્છિદઃ ॥ ૨૭॥

એતસ્મિન્નન્તરે તસ્યાઃ શરીરાદ્ રમ્યમૂર્તયઃ ।
કાલી તારા છિન્નમસ્તા શ્રીવિદ્યા ભુવનેશ્વરી ॥ ૨૮॥

ભૈરવી બગલા ધૂમ્રા શ્રીમત્ત્રિપુરસુન્દરી ।
માતઙ્ગી ચ મહાવિદ્યા નિર્ગતા દશ સાયુધાઃ ॥ ૨૯॥

અસઙ્ખ્યાતાસ્તતો જાતા માતરો દિવ્યમૂર્ત્તયઃ ।
ચન્દ્રલેખાધરાઃ સર્વાઃ સર્વા વિદ્યુત્સમપ્રભાઃ ॥ ૫.૫૦.૩૦॥

તતો માતૃગણૈર્યુદ્ધં પ્રાવર્તત ભયઙ્કરમ્ ।
રૌરવીયં હતં તાભિર્દલમક્ષૌહિણીશતમ્ ॥ ૩૧॥

જઘાન સા તદા દૈત્યં દુર્ગમં શૂલધારયા ।
પપાત ધરણીપૃષ્ઠે ખાતમૂલદ્રુમો યથા ॥ ૩૨॥

ઇત્થં હત્વા તદા દૈત્યં દુર્ગમાસુરનામકમ્ ।
આદાય ચતુરો વેદાન્દદૌ દેવેભ્ય ઈશ્વરી ॥ ૩૩॥

દેવા ઊચુઃ ।
અસ્મદર્થં ત્વયા રૂપમનન્તાક્ષિમયં ધૃતમ્ ।
મુનયઃ કીર્તયિષ્યન્તિ શતાક્ષીં ત્વામતોઽમ્બિકે ॥ ૩૪॥

આત્મદેહસમુદ્ભૂતૈઃ શાકૈર્લોકા મૃતા યતઃ ।
શાકમ્ભરીતિ વિખ્યાતં તત્તે નામ ભવિષ્યતિ ॥ ૩૫॥

દુર્ગમાખ્યો મહાદૈત્યો હતો યસ્માત્તતઃ શિવે ।
દુર્ગાં ભગવતીં ભદ્રાં વ્યાહરિષ્યન્તિ માનવાઃ ॥ ૩૬॥

યોગનિદ્રે નમસ્તુભ્યં નમસ્તેઽસ્તુ મહાબલે ।
નમો જ્ઞાનપ્રદે તુભ્યં વિશ્વમાત્રે નમો નમઃ ॥ ૩૭॥

તત્ત્વમસ્યાદિવાક્યૈર્યા બોધ્યતે પરમેશ્વરી ।
અનન્તકોટિબ્રહ્માણ્ડનાયિકાયૈ નમો નમઃ ॥ ૩૮॥

વાઙ્મનઃકાયદુષ્પ્રાપાં સૂર્યચન્દ્રાગ્નિલોચનામ્ ।
સ્તોતું ન શક્નુમો માતસ્ત્વત્પ્રભાવાબુધા વયમ્ ॥ ૩૯॥

માદૃશાનમરાન્દૃષ્ટ્વા કઃ કુર્યાદીદૃશીં દયામ્ ।
વર્જયિત્વા સુરેશાનીં શતાક્ષીં માતરં વિના ॥ ૫.૫૦.૪૦॥

ત્રિલોકી નાભિભૂયેત બાધાભિશ્ચ નિરન્તરમ્ ।
એવં કાર્યસ્ત્વયા યત્નોઽસ્માકં વૈરિવિનાશનમ્ ॥ ૪૧॥

દેવ્યુવાચ ।

વત્સાન્દૃષ્ટ્વા યથા ગાવો વ્યગ્રા ધાવન્તિ સત્વરમ્ ।
તથૈવ ભવતો દૃષ્ટ્વા ધાવામિ વ્યાકુલા સતી ॥ ૪૨॥

મમ યુષ્માનપશ્યન્ત્યાઃ પશ્યન્ત્યા બાલકાનિવ ।
અપિ પ્રાણાન્પ્રયચ્છન્ત્યાઃ ક્ષણ એકો યુગાયતે ॥ ૪૩॥

કાપિ ચિન્તા ન કર્તવ્યા યુષ્માભિર્ભક્તિશાલિભિઃ ।
ભવત્યાં મયિ તિષ્ઠન્ત્યાં સંહરન્ત્યાં નિજાપદઃ ॥ ૪૪॥

યથા પૂર્વં હતા દૈત્યા હનિષ્યામિ તથાઽસુરાન્ ।
સંશયો નાત્ર કર્ત્તવ્યઃ સત્યં સત્યં બ્રવીમ્યહમ્ ॥ ૪૫॥

યદા શુમ્ભો નિશુમ્ભશ્ચાપરૌ દૈત્યૌ ભવિષ્યતઃ ।
તદાહં નન્દભાર્યાયાં યશોદાયાં યશોમયી ॥ ૪૬॥

યોનિજં રૂપમાસ્થાય જનિષ્યે ગોપગોકુલે ।
હનિષ્યામ્યસુરૌ તન્માં વ્યાહરિષ્યન્તિ નન્દજામ્ ॥ ૪૭॥

ભ્રામરં રૂપમાસ્થાય વધિષ્યામ્યરુણં યતઃ ।
ભ્રામરીતિ ચ માં લોકે કીર્તયિષ્યન્તિ માનવાઃ ॥ ૪૮॥

કૃત્વા ભીમં પુના રૂપં રક્ષાંસ્યત્સ્યામ્યહં યદા ।
ભીમા દેવીતિ વિખ્યાતં તન્મે નામ ભવિષ્યતિ ॥ ૪૯॥

યદા યદાસુરોત્થૈવં બાધા ભુવિ ભવિષ્યતિ ।
તદા તદાવતીર્યાહં શં કરિષ્યામ્યસંશયમ્ ॥ ૫.૫૦.૫૦॥

યા શતાક્ષી સ્મૃતા દેવી સૈવ શાકમ્ભરી મતા ।
સૈવ પ્રકીર્તિતા દુર્ગા વ્યક્તિરેકૈવ ત્રિષ્વપિ ॥ ૫૧॥

ન શતાક્ષીસમા કાચિદ્દયાલુર્ભુવિ દેવતા ।
દૃષ્ટ્વારુદત્પ્રજાસ્તમા યા નવાહં મહેશ્વરી ॥ ૫૨॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં શતાક્ષ્યાદ્યવતારવર્ણનં નામ પઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૫.૫૦॥

૫.૫૧

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૫.૫૧. એકપઞ્ચાશત્તમોઽધ્યાયઃ । ક્રિયાયોગનિરુપણમ્ ।

મુનય ઊચુઃ ।
વ્યાસશિષ્ય મહાભાગ સૂત પૌરાણિકોત્તમ ।
અપરં શ્રોતુમિચ્છામઃ કિમપ્યાખ્યાનમીશિતુઃ ॥ ૧॥

ઉમાયા જગદમ્બાયાઃ ક્રિયાયોગમનુત્તમમ્ ।
પ્રોક્તં સનત્કુમારેણ વ્યાસાય ચ મહાત્મને ॥ ૨॥

સૂત ઉવાચ ।
ધન્યા યૂયં મહાત્માનો દેવીભક્તિદૃઢવ્રતાઃ ।
પરાશક્તેઃ પરં ગુપ્તં રહસ્યં શ◌ૃણુતાદરાત્ ॥ ૩॥

વ્યાસ ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ બ્રહ્મપુત્ર મહામતે ।
ઉમાયાઃ શ્રોતુમિચ્છામિ ક્રિયાયોગં મહાદ્ભુતમ્ ॥ ૪॥

કીદૃક્ચ લક્ષણં તસ્ય કિં કૃતે ચ ફલં ભવેત્ ।
પ્રિયં યચ્ચ પરામ્બાયાસ્તદશેષં વદસ્વ મે ॥ ૫॥

સનત્કુમાર ઉવાચ ।
દ્વૈપાયન યદેતત્ત્વં રહસ્યં પરિપૃચ્છસિ ।
તચ્છૃણુષ્વ મહાબુદ્ધે સર્વં મે વર્ણયિષ્યતઃ ॥ ૬॥

જ્ઞાનયોગઃ ક્રિયાયોગો ભક્તિયોગસ્તથૈવ ચ ।
ત્રયો માર્ગાઃ સમાખ્યાતાઃ શ્રીમાતુર્ભુક્તિમુક્તિદાઃ ॥ ૭॥

જ્ઞાનયોગસ્તુ સંયોગશ્ચિત્તસ્યૈવાત્મના તુ યઃ ।
યસ્તુ બાહ્યાર્થસંયોગઃ ક્રિયાયોગઃ સ ઉચ્યતે ॥ ૮॥

ભક્તિયોગો મતો દેવ્યા આત્મનશ્ચૈક્યભાવનમ્ ।
ત્રયાણામપિ યોગાનાં ક્રિયાયોગઃ સ ઉચ્યતે ॥ ૯॥

કર્મણા જાયતે ભક્તિર્ભક્ત્યા જ્ઞાનં પ્રજાયતે ।
જ્ઞાનાત્પ્રજાયતે મુક્તિરિતિ શાસ્ત્રેષુ નિશ્ચયઃ ॥ ૫.૫૧.૧૦॥

પ્રધાનં કારણં યોગો વિમુક્તેર્મુનિસત્તમ ।
ક્રિયાયોગસ્તુ યોગસ્ય પરમં ધ્યેયસાધનમ્ ॥ ૧૧॥

માયાં તુ પ્રકૃતિં વિદ્યાન્માયાવી બ્રહ્મ શાશ્વતમ્ ।

અભિન્નં તદ્વપુર્જ્ઞાત્વા મુચ્યતે ભવબન્ધનાત્ ॥ ૧૨॥

યસ્તુ દેવ્યાલયં કુર્યાત્પાષાણં દારવં તથા ।
મૃન્મયં વાથ કાલેય તસ્ય પુણ્યફલં શ઼ૃણુ ।
અહન્યહનિ યોગેન યજતો યન્મહાફલમ્ ॥ ૧૩॥

પ્રાપ્નોતિ તત્ફલં દેવ્યા યઃ કારયતિ મન્દિરમ્ ।
સહસ્રકુલમાગામિ વ્યતીતં ચ સહસ્રકમ્ ।
સ તારયતિ ધર્માત્મા શ્રીમાતુર્ધામ કારયન્ ॥ ૧૪॥

કોટિજન્મકૃતં પાપં સ્વલ્પં વા યદિ વા બહુ ।
શ્રીમાતુર્મન્દિરારમ્ભક્ષણાદેવ પ્રણશ્યતિ ॥ ૧૫॥

નદીષુ ચ યથા ગઙ્ગા શોણઃ સર્વનદેષુ ચ ।
ક્ષમાયાં ચ યથા પૃથ્વી ગામ્ભીર્યે ચ યથોદધિઃ ॥ ૧૬॥

ગ્રહાણાં ચ સમસ્તાનાં યથા સૂર્યો વિશિષ્યતે ।
તથા સર્વેષુ દેવેષુ શ્રીપરામ્બા વિશિષ્યતે ॥ ૧૭॥

સર્વદેવેષુ સા મુખ્યા યસ્તસ્યાઃ કારયેદ્ ગૃહમ્ ।
પ્રતિષ્ઠાં સમવાપ્નોતિ સ ચ જન્મનિ જન્મનિ ॥ ૧૮॥

વારાણસ્યાં કુરુક્ષેત્રે પ્રયાગે પુષ્કરે તથા ।
ગઙ્ગાસમુદ્રતીરે ચ નૈમિષેઽમરકણ્ટકે ॥ ૧૯॥

શ્રીપર્વતે મહાપુણ્યે ગોકર્ણે જ્ઞાનપર્વતે ।
મથુરાયામયોધ્યાયાં દ્વારાવત્યાં તથૈવ ચ ॥ ૫.૫૧.૨૦॥

ઇત્યાદિપુણ્યદેશેષુ યત્ર કુત્ર સ્થલેઽપિ વા ।
કારયન્માતુરાવાસં મુક્તો ભવતિ બન્ધનાત્ ॥ ૨૧॥

ઇષ્ટકાનાં તુ વિન્યાસો યાવદ્વર્ષાણિ તિષ્ઠતિ ।
તાવદ્વર્ષસહસ્રાણિ મણિદ્વીપે મહીયતે ॥ ૨૨॥

પ્રતિમાઃ કારયેદ્યસ્તુ સર્વલક્ષણલક્ષિતાઃ ।
સ ઉમાયાઃ પરં લોકં નિર્ભયો વ્રજતિ ધ્રુવમ્ ॥ ૨૩॥

દેવીમૂર્તિં પ્રતિષ્ઠાપ્ય શુભર્તુગ્રહતારકે ।
કૃતકૃત્યો ભવેન્મર્ત્યો યોગમાયાપ્રસાદતઃ ॥ ૨૪॥

યે ભવિષ્યન્તિ યેઽતીતા આકલ્પાત્પુરુષાઃ કુલે ।

તાંસ્તાંસ્તારયતે દેવ્યા મૂર્તિં સંસ્થાપ્ય શોભનામ્ ॥ ૨૫॥

ત્રિલોકીસ્થાપનાત્પુણ્યં યદ્ભવેન્મુનિપુઙ્ગવ ।
તત્કોટિગુણિતં પુણ્યં શ્રીદેવીસ્થાપનાદ્ભવેત્ ॥ ૨૬॥

મધ્યે દેવીં સ્થાપયિત્વા પઞ્ચાયતનદેવતાઃ ।
ચતુર્દિક્ષુ સ્થાપયેદ્યસ્તસ્ય પુણ્યં ન ગણ્યતે ॥ ૨૭॥

વિષ્ણોર્નામ્નાં કોટિજપાદ્ ગ્રહણે ચન્દ્રસૂર્યયોઃ ।
યત્ફલં લભ્યતે તસ્માચ્છતકોટિગુણોત્તરમ્ ॥ ૨૮॥

શિવનામ્નો જપાદેવ તસ્માત્કોટિગુણોત્તરમ્ ।
શ્રીદેવીનામજાપાત્તુ તતઃ કોટિગુણોત્તરમ્ ॥ ૨૯॥

દેવ્યાઃ પ્રાસાદકરણાત્પુણ્યં તુ સમવાપ્યતે ।
સ્થાપિતા યેન સા દેવી જગન્માતા ત્રયીમયી ॥ ૫.૫૧.૩૦॥

ન તસ્ય દુર્લભં કિઞ્ચિત્ શ્રીમાતુઃ કરુણાવશાત્ ।
વર્ધન્તે પુત્રપૌત્રાદ્યા નશ્યત્યખિલકશ્મલમ્ ॥ ૩૧॥

મનસા યે ચિકીર્ષન્તિ મૂર્તિસ્થાપનમુત્તમમ્ ।
તેઽપ્યુમાયાઃ પરં લોકં પ્રયાન્તિ મુનિદુર્લભમ્ ॥ ૩૨॥

ક્રિયમાણં તુ યઃ પ્રેક્ષ્ય ચેતસા હ્યનુચિન્તયેત્ ।
કારયિષ્યામ્યહં યર્હિ સમ્પન્મે સમ્ભવિષ્યતિ ॥ ૩૩॥

એવં તસ્ય કુલં સદ્યો યાતિ સ્વર્ગં ન સંશયઃ ।
મહામાયાપ્રભાવેણ દુર્લભં કિં જગત્ત્રયે ॥ ૩૪॥

શ્રીપરામ્બાં જગદ્યોનિં કેવલં યે સમાશ્રિતાઃ ।
તે મનુષ્યા ન મન્તવ્યાઃ સાક્ષાદ્દેવીગણાશ્ચ તે ॥ ૩૫॥

યે વ્રજન્તઃ સ્વપન્તશ્ચ તિષ્ઠન્તો વાપ્યહર્નિશમ્ ।
ઉમેતિ દ્વ્યક્ષરં નામ બ્રુવતે તે શિવાગણાઃ ॥ ૩૬॥

નિત્યે નૈમિત્તિકે દેવીં યે યજન્તિ પરાં શિવામ્ ।
પુષ્પૈર્ધૂપૈસ્તથા દીપૈસ્તે પ્રયાસ્યન્ત્યુમાલયમ્ ॥ ૩૭॥

યે દેવીમણ્ડપં નિત્યં ગોમયેન મૃદાથવા ।
ઉપલિમ્પન્તિ માર્જન્તિ તે પ્રયાસ્યન્ત્યુમાલયમ્ ॥ ૩૮॥

યૈર્દેવ્યા મન્દિરં રમ્યં નિર્માપિતમનુત્તમમ્ ।
તત્કુલીનાઞ્જનાન્માતા હ્યાશિષઃ સમ્પ્રયચ્છતિ ॥ ૩૯॥

મદીયાઃ શતવર્ષાણિ જીવન્તુ પ્રેમભાજનાઃ ।
નાપદામયનાનીત્થં શ્રીમાતા વક્ત્યહર્નિશમ્ ॥ ૫.૫૧.૪૦॥

યેન મૂર્તિર્મહાદેવ્યા ઉમાયાઃ કારિતા શુભા ।
નરાયુતં તત્કુલજં મણિદ્વીપે મહીયતે ॥ ૪૧॥

સ્થાપયિત્વા મહામાયામૂર્તિં સમ્યક્પ્રપૂજ્ય ચ ।
યં યં પ્રાર્થયતે કામં તં તં પ્રાપ્નોતિ સાધકઃ ॥ ૪૨॥

યઃ સ્નાપયતિ શ્રીમાતુઃ સ્થાપિતાં મૂર્તિમુત્તમામ્ ।
ઘૃતેન મધુનાક્તેન તત્ફલં ગણયેત્તુ કઃ ॥ ૪૩॥

ચન્દનાગુરુકર્પૂરમાંસીમુસ્તાદિયુગ્જલૈઃ ।
એકવર્ણગવાં ક્ષીરૈઃ સ્નાપયેત્પરમેશ્વરીમ્ ॥ ૪૪॥

ધૂપેનાષ્ટાદશાઙ્ગેન દદ્યાદાહુતિમુત્તમામ્ ।
નીરાજનં ચરેદ્દેવ્યાઃ સાજ્યકર્પૂરવર્તિભિઃ ॥ ૪૫॥

કૃષ્ણાષ્ટમ્યાં નવમ્યાં વામાયાં વા પઞ્ચદિક્તિથૌ ।
પૂજયેજ્જગતાં ધાત્રીં ગન્ધપુષ્પૈર્વિશેષતઃ ॥ ૪૬॥

સમ્પઠઞ્જનનીસૂક્તં શ્રીસૂક્તમથવા પઠન્ ।
દેવીસૂક્તમથો વાપિ મૂલમન્ત્રમથાપિ વા ॥ ૪૭॥

વિષ્ણુક્રાન્તાં ચ તુલસીં વર્જયિત્વાખિલં સુમમ્ ।
દેવીપ્રીતિકરં જ્ઞેયં કમલં તુ વિશેષતઃ ॥ ૪૮॥

અર્પયેત્સ્વર્ણપુષ્પં યો દેવ્યૈ રાજતમેવ વા ।
સ યાતિ પરમં ધામ સિદ્ધકોટિભિરન્વિતમ્ ॥ ૪૯॥

પૂજનાન્તે સદા કાર્યં દાસૈરેનઃ ક્ષમાપનમ્ ।
પ્રસીદ પરમેશાનિ જગદાનન્દદાયિનિ ॥ ૫.૫૧.૫૦॥

ઇતિ વાક્યૈઃ સ્તુવન્મન્ત્રી દેવીભક્તિપરાયણઃ ।
ધ્યાયેત્કણ્ઠીરવારૂઢાં વરદાભયપાણિકામ્ ॥ ૫૧॥

ઇત્થં ધ્યાત્વા મહેશાનીં ભક્તાભીષ્ટફલપ્રદામ્ ।
નાનાફલાનિ પક્વાનિ નૈવેદ્યત્વે પ્રકલ્પયેત્ ॥ ૫૨॥

નૈવેદ્યં ભક્ષયેદ્યસ્તુ શમ્ભુશક્તેઃ પરાત્મનઃ ।
સ નિર્ધૂયાખિલં પઙ્કં નિર્મલો માનવો ભવેત્ ॥ ૫૩॥

ચૈત્રશુક્લતૃતીયાયાં યો ભવાનીવ્રતં ચરેત્ ।
ભવબન્ધનનિર્મુક્તઃ પ્રાપ્નુયાત્પરમં પદમ્ ॥ ૫૪॥

અસ્યામેવ તૃતીયાયાં કુર્યાદ્દોલોત્સવં બુધઃ ।
પૂજયેજ્જગતાં ધાત્રીમુમાં શઙ્કરસંયુતામ્ ॥ ૫૫॥

કુસુમૈઃ કુઙ્કુમૈર્વસ્ત્રૈઃ કર્પૂરાગુરુચન્દનૈઃ ।
ધૂપૈર્દીપૈઃ સનૈવેદ્યૈઃ સ્રગ્ગન્ધૈરપરૈરપિ ॥ ૫૬॥

આન્દોલયેત્તતો દેવીં મહામાયાં મહેશ્વરીમ્ ।
શ્રીગૌરીં શિવસંયુક્તાં સર્વકલ્યાણકારિણીમ્ ॥ ૫૭॥

પ્રત્યબ્દં કુરુતે યોઽસ્યાં વ્રતમાન્દોલનં તથા ।
નિયમેન શિવા તસ્મૈ સર્વમિષ્ટં પ્રયચ્છતિ ॥ ૫૮॥

માધવસ્ય સિતે પક્ષે તૃતીયા યાક્ષયાભિધા ।
તસ્યાં યો જગદમ્બાયા વ્રતં કુર્યાદતન્દ્રિતઃ ॥ ૫૯॥

મલ્લિકામાલતીચમ્પાજપાબન્ધૂકપઙ્કજૈઃ ।
કુસુમૈઃ પૂજયેદ્ગૌરીં શઙ્કરેણ સમન્વિતામ્ ॥ ૫.૫૧.૬૦॥

કોટિજન્મકૃતં પાપં મનોવાક્કાયસમ્ભવમ્ ।
નિર્ધૂય ચતુરો વર્ગાનક્ષયાનિહ સોઽશ્નુતે ॥ ૬૧॥

જ્યેષ્ઠે શુક્લતૃતીયાયાં વ્રતં કૃત્વા મહેશ્વરીમ્ ।
યોઽર્ચયેત્પરમપ્રીત્યા તસ્યાસાધ્યં ન કિઞ્ચન ॥ ૬૨॥

આષાઢશુક્લપક્ષીયતૃતીયાયાં રથોત્સવમ ।
દેવ્યાઃ પ્રિયતમં કુર્યાદ્યથાવિત્તાનુસારતઃ ॥ ૬૩॥

રથં પૃથ્વીં વિજાનીયાદ્રથાઙ્ગે ચન્દ્રભાસ્કરૌ ।
વેદાનશ્વાન્વિજાનીયાત્સારથિં પદ્મસમ્ભવમ્ ॥ ૬૪॥

નાનામણિગણાકીર્ણં પુષ્પમાલાવિરાજિતમ્ ।
એવં રથં કલ્પયિત્વા તસ્મિન્ સંસ્થાપયેચ્છિવામ્ ॥ ૬૫॥

લોકસંરક્ષણાર્થાય લોકં દ્રષ્ટું પરામ્બિકા ।

રથમધ્યે સંસ્થિતેતિ ભાવયેન્મતિમાન્નરઃ ॥ ૬૬॥

રથે પ્રચલિતે મન્દં જયશબ્દમુદીરયેત્ ।
પાહિ દેવિ જનાનસ્માન્પ્રપન્નાન્દીનવત્સલે ॥ ૬૭॥

ઇતિ વાક્યૈસ્તોષયેચ્ચ નાનાવાદિત્રનિઃસ્વનૈઃ ।
સીમાન્તે તુ રથં નીત્વા તત્ર સમ્પૂજયેદ્રથે ॥ ૬૮॥

નાનાસ્તોત્રૈસ્તતઃ સ્તુત્વાપ્યાનયેત્તાં સ્વવેશ્મનિ ।
પ્રણિપાતશતં કૃત્વા પ્રાર્થયેજ્જગદમ્બિકામ્ ॥ ૬૯॥

એવં યઃ કુરુતે વિદ્વાન્પૂજાવ્રતરથોત્સવમ્ ।
ઇહ ભુક્ત્વાખિલાન્ભોગાન્સોઽન્તે દેવીપદં વ્રજેત્ ॥ ૫.૫૧.૭૦॥

શુક્લાયાં તુ તૃતીયાયામેવં શ્રાવણભાદ્રયોઃ ।
યો વ્રતં કુરુતેઽમ્બાયાઃ પૂજનં ચ યથાવિધિ ॥ ૭૧॥

મોદતે પુત્રપૌત્રાદ્યૈર્ધનાદ્યૈરિહ સન્તતમ્ ।
સોઽન્તે ગચ્છેદુમાલોકં સર્વલોકોપરિ સ્થિતમ્ ॥ ૭૨॥

આશ્વિને ધવલે પક્ષે નવરાત્રવ્રતં ચરેત્ ।
યત્કૃતે સકલાઃ કામાઃ સિદ્ધ્યન્ત્યેવ ન સંશયઃ ॥ ૭૩॥

નવરાત્રવ્રતસ્યાસ્ય પ્રભાવં વક્તુમીશ્વરઃ ।
ચતુરાસ્યો ન પઞ્ચાસ્યો ન ષડાસ્યો ન કોઽપરઃ ॥ ૭૪॥

નવરાત્રવ્રતં કૃત્વા ભૂપાલો વિરથાત્મજઃ ।
હૃતં રાજ્યં નિજં લેભે સુરથો મુનિસત્તમાઃ ॥ ૭૫॥

ધ્રુવસન્ધિસુતો ધીમાનયોધ્યાધિપતિર્નૃપઃ ।
સુદર્શનો હૃતં રાજ્યં પ્રાપદસ્ય પ્રભાવતઃ ॥ ૭૬॥

વ્રતરાજમિમં કૃત્વા સમારાધ્ય મહેશ્વરીમ્ ।
સંસારબન્ધનાન્મુક્તઃ સમાધિર્મુક્તિભાગભૂત્ ॥ ૭૭॥

તૃતીયાયાં ચ પઞ્ચમ્યાં સપ્તમ્યામષ્ટમીતિથૌ ।
નવમ્યાં વા ચતુર્દશ્યાં યો દેવી પૂજયેન્નરઃ ॥ ૭૮॥

આશ્વિનસ્ય સિતે પક્ષે વ્રતં કૃત્વા વિધાનતઃ ।
તસ્ય સર્વં મનોઽભીષ્ટં પૂરયત્યનિશં શિવા ॥ ૭૯॥

યઃ કાર્ત્તિકસ્ય માર્ગસ્ય પૌષસ્ય તપસસ્તથા ।
તપસ્યસ્ય સિતે પક્ષે તૃતીયાયાં વ્રતં ચરેત્ ॥ ૫.૫૧.૮૦॥

લોહિતૈઃ કરવીરાદ્યૈઃ પુષ્પૈર્ધૂપૈઃ સુગન્ધિતૈઃ ।
પૂજયેન્મઙ્ગલાં દેવીં સ સર્વં મઙ્ગલં લભેત્ ॥ ૮૧॥

સૌભાગ્યાય સદા સ્ત્રીભિઃ કાર્યમેતન્મહાવ્રતમ્ ।
વિદ્યાધનસુતાપ્ત્યર્થં વિધેયં પુરુષૈરપિ ॥ ૮૨॥

ઉમામહેશ્વરાદીનિ વ્રતાન્યન્યાનિ યાન્યપિ ।
દેવીપ્રિયાણિ કાર્યાણિ સ્વભક્ત્યૈવં મુમુક્ષુભિઃ ॥ ૮૩॥

સંહિતેયં મહાપુણ્યા શિવભક્તિવિવર્ધિની ।
નાનાખ્યાનસમાયુક્તા ભુક્તિમુક્તિપ્રદા શિવા ॥ ૮૪॥

ય એનાં શ◌ૃણુયાદ્ભક્ત્યા શ્રાવયેદ્વા સમાહિતઃ ।
પઠેદ્વા પાઠયેદ્વાપિ સ યાતિ પરમાં ગતિમ્ ॥ ૮૫॥

યસ્ય ગેહે સ્થિતા ચેયં લિખિતા લલિતાક્ષરૈઃ ।
સમ્પૂજિતા ચ વિધિવત્સર્વાન્કામાન્સ આપ્નુયાત્ ॥ ૮૬॥

ભૂતપ્રેતપિશાચાદિદુષ્ટેભ્યો ન ભયં ક્વચિત્ ।
પુત્રપૌત્રાદિસમ્પત્તીર્લભત્યેવ ન સંશયઃ ॥ ૮૭॥

તસ્માદિયં મહાપુણ્યા રમ્યોમાસંહિતા સદા ।
શ્રોતવ્યા પઠિતવ્યા ચ શિવભક્તિમભીપ્સુભિઃ ॥ ૮૮॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયાં ક્રિયાયોગનિરૂપણં નામૈકપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૫.૫૧॥

॥ સમાપ્તેયં પઞ્ચમ્યુમાસંહિતા ॥

Proofreading by H Revathy Rajaraman / Uma Mahesh

*Shri Shiva Mahapuranam 5 Uma Samhita*
pdf was typeset on January 23, 2026

Please send corrections to *sanskrit@cheerful.com*